यापोथीचीपत्रे ८४ आहेत पुढचीसमाप्तीचीपत्रेनाहीत

भवानंदीव्याख्याटीकामहादेवपु
णतामकरकृता

4

भ०टी०
१

॥श्रीगणेशाय नमः॥ ॥श्रीसरस्वत्यै नमः॥ ॥त्रिपुरारातिपादाब्जनरजश्चन्द्रसमुद्भवाः॥ कान्तपः शुभदाः सन्तु मम ज्ञानतमोभि-
दः॥१॥ यत्पदालंबनतो मन्दः स्वेष्टार्थिकार्यधुरंधरः॥ बुधो भवति तं वन्दे गुरुं श्रीकण्ठदीक्षितम्॥२॥ भवानन्दकृता व्याख्याऽनुमानमणिदीधितेः
व्याख्यायते निरूढा श्रीमहादेवेन तन्यते॥ भवानन्दकृता स्वस्य विस्तरेण विरचिता मया॥ अतः संक्षेपतः कुर्वे व्याख्यां सर्वोपकारिणीम्॥४॥ ॥
प्रारिप्सितनिर्विघ्नसमाप्तिकामनया कृतं गुरुनमस्काररूपं मङ्गलं शिष्यशिक्षायै निबध्नं चिकीर्षितं प्रतिजानीते॥ नमस्कृत्येति॥ सारमिति
निरूढमित्यस्य विशेषणम्॥ ननु परमात्मनः सत्त्वे नमस्कार्यतावच्छेदकरूपोपात्तं परमहत्त्वं न परममहत्परिमाणवत्त्वं तस्यापि अस्मत्कृतयाऽनम-
स्कार्यतावच्छेदकत्वासंभवादत आह॥ सर्वोत्कृष्टात्मन इति॥ यत्किंचिद्बाधकोत्कृष्टत्वस्य यावच्चेतनापेक्षया सर्वेति॥ उत्कर्षमेवाह॥ उत्कर्ष इति॥ एक-
रूपस्येति॥ केवलस्येत्यर्थः॥ विचित्रसहकारिरहितस्येति यावत् ईश्वरस्य विशेषणः॥ विचित्रेति॥ विचित्रकार्यकारित्वस्य विचित्रसहकारि-
नियतत्वादिति भावः॥ एतेनैकरूपस्येत्यादेः स्वाजन्मोऽनादिविचित्रकार्यकारित्वेऽपि नासंगतिः॥ नन्वौमित्यस्य नतः कथं अप्रविष्टकर्मिवास-
कलाभः ओमित्यस्येश्वरेऽरूढत्वादत आह॥ ओंकारेति॥ तथा चोमित्यस्यैव योगिकरूढत्वमिति भावः॥ निधोज्येति॥ नियोगः प्रेरणं अह-
स्तु कूलो व्यापार इति यावत्॥ स चेच्छा सकर्तृश्वरेस्तु लभः धात्वर्थतावच्छेदकव्यवृत्ति सत्तया ज्ञाणिनां कर्मतेति ध्येयम्॥ पिष्टंभश्चेसादिवदंती संत-
निकोमंथः॥ संयोगविशेषः॥ विशिष्टः संयोगः॥ विजातीयसंयोग इति यावत्॥ वेजात्यपश्चिचपायधारणानुकूल इति विशेषणम्॥ ध

नविषयत्वादिवद्धस्तादावादृशसंयोगप्रतियोगित्वमेवकर्मत्वम् ॥ ईश्वरे आकाशधारकत्वाभावेन सर्वभूतविष्टंभकत्वासंभवात् ॥ हगमस्तेनिगक्त
तएव ॥ विभुनिष्ठसंयोगबोधकपदसमभिव्याहृतपदेन विभोरसंग्राह्यत्वादेव ॥ विश्वव्यापीति ॥ व्यापित्वं निरुक्तसंयोगित्वं तच्चेवतास्वेपीत्यर्थः ॥ अस्मा
त्स्मैतरसाधारण्यान्नप्रकृतोपष्टंभासंगतेश्च ॥ सर्वमूर्तधारकत्वमुपपादयति ॥ अपलेति ॥ भगवत्त्वे योगस्येति ॥ संयोगवतो भगवत इत्यर्थः ॥ धा
रकत्वमित्यस्य पतनप्रतिबंधकत्वमित्यर्थः ॥ तु यथाश्रुतमेव सम्यक् ॥ वदंतीत्यस्य स्वरसवीजंतु भूतपदस्य मूर्त्तपरत्वे लक्षणापत्तिरेवमेव ॥
मतेति ॥ स्वमते इत्यर्थः ॥ तथा च भूतपदं यथाश्रुतमेवेत्यर्थः ॥ तत्प्रतियोगिकेति ॥ यथेन्द्रस्वत्विसंयोगवत्त्वस्य स्वात्मिवृत्तित्वादिदमसंगत
मिति तद्ज्ञानविशेषितम् ॥ स्वविशिष्टमेसप्रयोगेण प्रतियोगित्वस्यैव द्वितीयार्थत्वात् ॥ ईश्वरीयनित्यस्पर्शे मानमाह ॥ नित्यमिति ॥ प्रतिपा
दयंतीति श्रुतिविशेषणम् ॥ नामार्थयोर्भेदान्वयस्याव्युत्पन्नतया ऽभेदान्वयस्य च बाधिततया श्रुतेर्महत्त्वपर्यायाद्वृत्समभिव्याहारेणानेन विशिष्टस्य
नित्यत्वप्रतिपादकत्वमिति भावः ॥ प्रतिपादयंतीति ॥ वेदे विशेषणत्वेनान्वयस्यौत्सर्गिकत्वादिति भावः ॥ नन्वेवं स्पर्शस्य नित्यत्वसा
धारण्येन पुरस्य ज्ञानस्य तावच्छेदकत्वानुपपत्तिरत आह ॥ तथा चेति ॥ ननु विशिष्टवैशिष्ट्यान्वयमहिम्ना संगतिं प्रदर्शयन्ति त्वादि
नालध्यायांसंगतिप्रदर्शनेन विशिष्टप्रतिज्ञायां पूर्वापरेत्वादिलभ्यस्य समुचितफलद्वयान्वयस्यासंभव इत्यतो भावार्थमाह ॥ संगतिप्रद
र्शनस्येति ॥ विशेषणस्येत्यर्थः ॥ अनुमाननिरूपणप्रतिज्ञाया इति ॥ विशेष्यरूपाया इत्यर्थः ॥ इत्यर्थ इति ॥ इति भावार्थ इत्यर्थः ॥

भ०टी०
२

विशेषणविशेष्यभावासत्त्वे विशिष्टशब्दभेदेन समुच्चितफलद्वयान्वयो नासंभवी साधारणं ॥ एवं न संगतिप्रदर्शनस्य सा दिगन्यस्यैकैक
स्य प्रसेकं फलद्वयेनान्वयपरत्वेऽपि समवतां चकाराः संगच्छन्ते न स्वारस्यम् ॥ संगतिप्रदर्शनफलैः कथा वा स्यतामप्रतिपन्नेरनपेक्षामाशंक्याह
प्रयोजनेन वक्तव्यमिति ॥ तथा चैकवाक्यतामप्रतिपन्नेरनपेक्षा याः पूर्वग्रन्थप्रयोजने फले श्रोतृणामुत्तरग्रन्थश्रवणस्यानुपपत्तिरिति भावः ॥ ननु श्रो
तॄणां सहोक्तावपि न निस्तारः ॥ भगोधाभिर्विप्रसेकं साकांक्षत्वादत आह ॥ यदि भागे इति ॥ पदान्तरव्यतिरेकप्रयुक्तान्वयाननुभावकत्वरूपा
कांक्षा पूर्वापरग्रन्थयोर्न संभवतीत्यत आह ॥ परस्परार्थेति ॥ तथा च समभ्याहृतपदार्थस्मारितार्थजिज्ञासारूपाकां
क्षाभिविष्टा सा च पूर्वापरग्रन्थयोः संभवतीति ॥ अत एव वक्ष्यति कारणकथनानन्तरं कार्यस्याकथने किमस्य कार्यमित्याकांक्षेति
ति भावः ॥ प्रमाणतत्त्वविवेचनमेवेति ॥ प्रत्यक्षादिचतुष्टयधर्मिकप्रमाणेतरभेदप्रतियोगिकरेव सर्वः ॥ विभिन्नता सर्पिरपीति ॥ न च
संगतेर्निरूपणीयमिच्छेन ग्रन्थाहृतितया कथमेतदिति वाच्यम् ॥ स्वरूपासिद्धिकारणपत्वात् अवसेतिपादकत्वस्यैव हेतुतावच्छेदकसंबन्धत
या तेन संबन्धेन संगतेर्ग्रन्थकृत्तितात् ॥ तयेति ॥ लिंगविधया साद्ध्ये ॥ संगतिव्यवहारेणेत्युपदर्शितपरंपरासंबन्धेन साध्यः ॥ नातो निरू
पणीययोरेव संगतिव्यवहारादनुपपत्तिः ॥ अनुप्रवेशात् ॥ अनन्तराभिधानविशिष्टत्वेनानुप्रवेशात् ॥ न च संगतेरेकवाक्यताघटित एम
त्वे लिंगज्ञानकाल एव तद्घटितैकवाक्यत्वस्य मिष्यमानत्वाल्लिंगसाधनमिति वाच्यम् ॥ एकवाक्यतापन्नग्रन्थत्वाद्यन्त चर्याकुतैकवाक्यत्वस्यैव २

संगतिघटकत्वात्॥ अनुचितइति॥ आरम्भेपरंथस्य स्वरसंवृत्तितस्मैं धारणस्यसंप्रदायप्रसिद्धत्वादितिभावः॥ प्रसक्तेति॥ प्रसक्तविस्मादी
सर्थः॥ इतिशब्दः स्वरूपपरः एतस्यचप्रतिज्ञानीतइति क्रियाविशेषणत्वेनान्वयः॥ सर्वत्रप्रतीकस्य क्रियाविशेषणत्वेनैवान्वयात्॥ एवंचपू
र्वापरग्रंथैकवाक्यताप्रतिपत्त्यर्थाशिष्यावधानार्थीच यासंलक्ष्यविसाधभिन्नसंगतिप्रदर्शनविशिष्टानुमाननिरूपणविषयकप्रतिज्ञात
कत्वेतिसमुदितान्वयबोधइतिभावः॥ उभयत्रेव॥ प्रमितिप्रमाणयोरेव॥ तत्प्रदर्शनेति॥ संगतिप्रदर्शनेत्यर्थः॥ अत्रप्रसक्तपद
त्वरूपेप्रतिनतेप्रसक्तंप्रसक्तमितियोगिकंफलेचरूढम्॥ अनुमानपदंकरणमुत्पन्नं स्वरूपपरं भावमुत्पन्नंफलपरमित्युभय
त्रमूलेस्यसंगतिप्रदर्शनपरत्वमितिसर्वधेयम्॥ अतएव॥ निरूपणक्रमनियामकत्वेनफलयोः स्वरूपयोश्चसंगतेराकांक्षितत्वादे
व॥ जिज्ञासोपयोगित्वादिति॥ स्वरूपयोः कार्यकारणभावः किंप्रसक्तः कार्यमितिजिज्ञासायामुपयुक्तः फलयोः कार्यकारणभाव
स्तु किंप्रसक्तफलोपजीवकफलकमितिजिज्ञासायामुपयुक्तइतिभावः॥ आकुरिति॥ अंकुरबीजंतुफलयोः कार्यकारणभावस्या
प्युक्तरीत्यासाक्षाद्बोधोपयोगसंभवेपरंपरयोपयोगवर्णनानौचित्यमेव॥ अतएव॥ संगतेरनंतराभिधानप्रयोज्यत्वादेव॥ उप
जीवकत्वादिति॥ उपजीवकमित्युत्क्षेप्ताप्रिज्ञानप्रज्ञाप्यस्तबोधकपंचम्याप्रसक्तोपजीवकत्वे अनंतराभिधानप्रयोज्यत्वलाभादि
भावः॥ आहेति॥ यद्युपजीवकंतन्निरूपणानंतरंनिरूप्यमितिव्याप्तौ व्यभिचाराभावमाहेत्यर्थः॥ विशिष्टवैशिष्ट्येति॥ वी

3

क

म०टी० ३ मसर्थतावानदेशस्त्वाकारकेत्यर्थः॥नचानुमित्यासंविशेषणधीमूलकत्वमस्त्वमेवंकुतो नोक्तमितिवाच्यम्॥तथासत्यनुमितिम्
त्वपरामर्शस्यापि विशेषणधीत्वेनासाधारण्यालाभात्॥मुनिमिति॥मुनिनागोतमेन॥आदृतः॥तासर्थविषयीकृतः॥उक्तसत्यानुमा
नोपमानशब्दाः प्रमाणानीतिविशेषोद्देशपरत्वात्दृष्टक्रमेपिसंगतेरेवबीजत्वात्॥अथमुनिनाताहशोपजीवकत्वादेरसूत्र(
स्यादुष्टत्वेपिग्रहीतग्रंथे किमायातमितिचेन्न॥मणौसांगत्येवप्रयोजनवत्त्वेनादुष्टत्वात्॥स्वतस्यदुष्टत्वेमणेरपिदुष्टत्वंस्या
दितिमुख्यतस्तत्रैवसंगतेरभिधेयत्वात्॥मूलकृतांतुहरणतदनुमितेर्मणिकारस्यापितदादरणात्॥ननूपजीव
कतायाएवानंतराभिधानप्रयोजनकत्वेनोपजीवकत्वेतस्यपुरस्कृतत्वानुपपत्तिरतआह॥उपजीवकतोत्कर्षइत्यादि
प्रसक्षफलत्वावच्छेदेन॥प्रत्यक्षप्रमितित्वावच्छेदेन॥यागादेरेवादृष्टजनकत्वेनानुमितेरदृष्टजनकत्वाभावादाह॥अ
दृष्टप्रयोजिकाभिमिति॥तत्र॥इष्टसाधनताज्ञाने॥कारणमिति॥परार्थोपस्थितिद्वारेतिशेषः॥इसनुमितिरूपमिति॥इ
सनुमानजन्यानुमितिरूपमित्यर्थः॥अस्यव्याख्यानेनेति॥शक्तिग्रहस्यकारणत्वरूपव्याख्यानमेवव्याख्यानंवाध्यम्॥एवं
रूपेति॥एवंरूपानुमानजन्येत्यर्थः॥यदिष्टसाधनत्वानुमितीति॥एतज्जनकंचेदंयदिष्टसाधनंतच्चेनाज्ञोत्कत्वादिस राम
नुमानेवोध्यम्॥नन्वीश्वरप्रत्यक्षस्याफलत्वेपिप्रत्यक्षप्रमितित्वावच्छेदेनानुमित्युपजीवकत्वमतआह॥तथाचेति॥ ३

असत्त्वेति॥ असत्त्वं न फलतावच्छेदकं निरसमाधारणत्वात्॥ किंतु जन्यप्रसक्तत्वमेवेति तद्यवच्छेदेनानुमितिस्वरूपजीवकत्वमस्तीति भावः॥ निरूपितप्रसक्तत्वस्य निरूपितप्र
सक्तेः निरूपकतावच्छेदककोटिप्रविष्टत्वेनाप्रसक्तत्वमिति यावत्॥ वह्निमत्त्वं तोहेत्वेकदेशत्वपर्वततावच्छेदेन वह्निमत्तान्वयपरत्वद्वारतावच्छेदेन दृष्टान्तेपेनासर्वमिसा
मा॰ सपक्षेनाहर॥ दृष्टान्तकमिति॥ तेन के संनिकर्षपादित्युदाहरणादित्योक्तेऽपि वननैवपरामर्शः॥ दृष्टमात्रेहेतुहेतुकत्वेऽवदृष्टेतादृशहेतुकत्वस्यादृष्टहेतुकत्वं तत्र विशेष्यवेप
र्थ्यविशेषणे दृष्टान्तरत्वेनादृष्टानिवेशे गौरवं चेत्साध्येनोहेतु॥ अदृष्टेति॥ तत्त्वं च स्वजनकादृष्टाजनकत्वेन निरूपितत्वम्॥ उपजीवकत्वमिति॥ निरूप्यतावच्छेदकावच्छे
देनोपजीवकत्वमित्यर्थः॥ अतएव तत्त्वमिति विहाय तथात्वमित्युक्तम्॥ दृष्टद्वारकत्वमिहादृष्टद्वारकत्वमित्यपि निरूप्यतावच्छेदकावच्छेदेनेत्यपि वा हेतुत्वेन
त्वमित्येवोक्तमिति ध्येयम्॥ अदृष्टद्वारकोपपादनेति॥ कार्यमात्रजनकादृष्टस्योपपादानप्रसक्तजन्यतामादाय हेतुसिद्धिलाभादिति भावः॥ परंपरानुधावनप्रया
सोऽसह॥ वस्तुतद्विति॥ व्याप्तिज्ञानत्वेनेति॥ एवंकारेण जन्यतानभिव्यवच्छेदः॥ नन्वीश्वरज्ञानस्यानुमितिकरणत्वे तस्य कार्यमात्रजनकत्वव्याघातइत्य
तउक्तमनुमितिंभावयतोपीति॥ तत्रानुपपन्नेभावयतरस्य जनयतरस्यार्थकतया तस्यानुमितिजनकत्वेऽपि करणत्वनिषेधासंगतेः करणत्वादिकजन
कतायामानाभावादिसत आह॥ भावयतद्वति॥ उपादानप्रसक्तविधया॥ उपादानप्रसक्तत्वेन॥ तथैवोपादानेप्रसक्ततावच्छिन्नजनकतायाः सत्त्वेपिन
व्याप्तिज्ञानत्वावच्छिन्नकरणत्वनिषेधासंगतेः तद्धर्मावच्छिन्नकरणत्वस्य तद्धर्मेतरधर्मावच्छिन्नजनकतानात्मकत्वादिति भावः॥ अनुमितिकलोप
हितेति॥ अजनितपरामर्शस्य व्याप्तिज्ञानस्यानुमितिं प्रतिस्वरूपयोग्यतयापरामर्शस्यानुमितिकरणतासामान्येनिर्वाहकअसामग्रीत्वं न संभवती

H

मं०टी० ४ तिकरणतास्पदस्य फलोपहितकरणतापदत्वमप्यपेक्ष्य फलोपहिते स्वरूपसम्॥ अनुमितिं प्रति व्याप्तिज्ञानस्य लाघवात् [illegible] समवायेनैव हेतुतया प
रामर्शसंबंधेन न हेतुत्वमत आह॥ सर्वत्रेति॥ नष्टस्यापि करणस्य स्वजन्यव्यापारद्वाराफलं प्रति करणत्वानुपपत्त्या व्यापारसंबंधावच्छिन्नकारणत्वस्यैव
करणत्वादिति भावः४॥ नन्वीश्वरीयव्याप्तिज्ञाने विशेषणज्ञानत्वेन स्वजन्यपरामर्शरूपानुमितिफलोपहितकरणतानिर्वाहकप्रत्यासत्त्यभावेनानुमि
त्यकरणत्वसाधनेनाधस्वरूपासिद्धौ ईश्वरज्ञानस्य सर्वविषयकत्वेन विशेषणज्ञानत्वात्तथाविशेषणज्ञानत्वेन स्वजन्यास्मदादिपरामर्शसंबंधेना
नुमितिफलोपहितकरणत्वादित्याह॥ विशेषणज्ञानत्वेनेति॥ नन्वेवमपीश्वरज्ञानेऽनुमितिकरणतासामान्यशून्यत्वमसिद्धं तस्य फलोपहितकारणत्वा
भावेप्यनुमितिं प्रति स्वरूपयोग्यत्वेनानुमितिकरणतासामान्यशून्यत्वासिद्धेरसंभवादत आह॥ अनुमितेरेकविशेषणाद्येऽपरविशेषणप्रकारकत्वे नियमात्स्व
त्वाह॥ नित्यस्येति॥ आशयइति॥ तथाचनित्यसद्विशिष्टस्वरूपयोग्यत्वव्यापकफलावश्यंभावाभावेन नित्यस्येश्वरज्ञानस्य नित्यत्वविशिष्टस्वरूप
योग्यताभावस्य स्वरूपयोग्यताभावपर्यवसन्नस्यतज्जन्यव्याप्तिज्ञानत्वेऽस्येवानुमितिस्वरूपयोग्यरूपतासंगीकृत्यसाधनेनैकविशेषणाभा
वादनुमितिकरणतासामान्यशून्यत्वं नासिद्धमिति भावः४॥ एतेन॥ बहुष्वमात्रैः॥ अप्रत्यासत्त्यस्यापि॥ स्वजन्यम्यादिरूपप्रत्यासत्त्यभावव
त्वोऽपि॥ करणत्वात्॥ स्वरूपयोग्यत्वात्॥ प्रत्यासत्त्यभावः४॥ फलोपहितरूपकरणतानिर्वाहकप्रत्यासत्त्यभावः४॥ कारणत्वाभावसाधकः४॥ करण एम ४
तासामान्याभावसाधकः४॥ पद्यतः फलोपहितकरणतानिर्वाहकप्रत्यासत्तिमत्त्वं तत्तत्करणतासामान्यशून्यमितिसामान्यमुखव्याप्तिरदृष्य

स्वरूपहेतौ व्यभिचारेणासंभवादिति भावः॥ सामान्यतः इति॥ व्याप्तेरिति शेषः॥ अनभिधानात्॥ असाधारण्यादिदूषणं तस्य सोलक्ष्येन सामान्यतो व्याप्तेरन
ति भिहितत्वादिति भावः॥ यद्यप्यनित्यत्वं सर्वव्याप्तिज्ञाने व्यभिचारवारणाय हेतौ निवेशितविशेषणस्यावश्यकतया सामान्यतो व्याप्त्यभिधानेपि नारएप
स्वरूपहेतौ व्यभिचारस्तथापि वारितोपि पुनर्वाच्य इति न्यायेन वस्तुगतिमनुरुध्यानेनापि प्रकारेण व्यभिचारवारितं इति ज्ञेयम्॥ इति वंधाक
स्य चिन्नत दूषणमुखेन संबंधको विशेषणज्ञानहेतो सत्यप्रयोजनं नैव क्रमुपक्रमते॥ यत्किंचिदिति॥ भवत्येवेति॥ तथा च बाधस्वरूपासिद्धिरिति भा
वः॥ परामर्शेति॥ स्वअधिकरणस्यादिः॥ असंभवादिति॥ तथा च नवाधादिति भावः॥ नन्वीश्वरज्ञानस्य यथाकथंचित्स्वजन्यव्यापारसंबंधे
न फलोपहितत्वेपि निरस्य स्यादित्यातिरभंगात् व्याप्तिज्ञानत्वस्यैव स्वरूपयोग्यतारूपतयाऽनुमितिं प्रति स्वरूपयोग्यताद्यवधानादवश्यमिस्सा
श्ये नाशंकते॥ न चेति॥ अबाधः॥ अभंगः॥ निष्प्रयोजनकेति॥ निरस्यापि गगनादेर्यत्किंचित्संबंधघटितफलोपधानसंभवेनाव्यावर्त
कत्वादिति भावः॥ कश्चिदिति अत्र फलायोगव्यवच्छिन्नकारणस्य करणत्वे सर्वं पुनरिंद्रियसंनिकर्षमनंधासंगतिरस्वरसः॥ निरस्येति न्यायभंगम
रि संभव्यात्॥ निरस्य वैयर्थ्यं न तस्मादिति यादृष्टेनैव घटादेरूपादिवदीश्वरेपि फलसंभवेनादृष्टविरहेण फलाभावोऽनुपपन्न इत्यत आह॥ व्यादीति॥
व्यादिना लब्धनोयोगादिपरिग्रहः॥ अप्रयोजकत्वादिति॥ इत्थं त्वादेरपि पक्षधर्मतयाऽन्यथासिद्धत्वेन कपालादेस्तेन रूपेण घटादिजनकत्वा
प्रसंभवादिति भावः॥ स्वजनकेति॥ इह स्वजनको दृष्टजनका निरूपितत्वमदृष्टाद्वारकत्वं जन्यत्वमेव चोपजीवकत्वमभिमतम्॥ अत्र

5

मं०टी०
५

तत्त्व० प्रमेये वैयर्थ्यं स्फोरयिष्यति॥ अदृष्टाजनकत्वमिंद्रियेपि नास्ति गंगादर्शनादिना स्वर्गादिजनकादृष्टोत्पत्तेरत आह स्वजनकेति। गंगादर्शनादिजन्यादृष्ट
स्य च नानुमानमात्रजनकत्वं मानाभावादित्युक्तं स्वोचितमिति॥ अपि नानिंद्रियेंद्रियं स्मरणमनुमानं वापेक्षत इत्यस्य समुचितत्वादिति भावः॥ तद्दर्शना
नादि ति॥ स्वजनकादृष्टाजनकनिरूपितत्वात्मकादृष्टद्वारकत्वविवक्षणेनेश्वरज्ञानस्येंद्रियजनकादृष्टं प्रत्यजनकतया तद्वारणमिति
भावः॥ हेतुपंचमी॥ न व्यापकत्वपर्यवसितत्वज्ञानज्ञाप्यत्वार्थिकोपंचमी॥ अनुपपन्नेति। वक्ष्यमाणव्यभिचारादिति भावः॥ स्फुरणात्प्रवर्तेत
इत्याशयेन ज्ञानजन्यजिज्ञासाप्रयोज्यत्वार्थकत्वं लक्षणमभिसंधायेनाह॥ तत्त्वज्ञानजन्येति॥ आनंतर्येत्यादि। एनंतर्याभिधानप्रयोजकं जिज्ञासा
जनकं प्रज्ञानंतद्विषयत्वार्थकत्वेन लक्षणादेवेति संगत्यास्तत आह॥ आनंतर्याभिधानेत्यादि। एवं च जिज्ञासाद्वारकाभिधानप्रयोजकत्वस्येव
निर्वचनेनोक्तातिप्रसंगवारणाय॥ अतिव्याप्तिवारणाय॥ प्रत्यक्षादित्यंगतित्ववारणाय॥ लक्षणसंगमनाय प्रेनक्रमेण जिज्ञासायामान
नंतर्याभिधानप्रयोजकत्वं तत्क्रममाह॥ प्रत्यक्षस्येति॥ गुरुणा प्रत्यक्षे निरूपिते सतीत्यादिः॥ इतिक्रमेण॥ इति ज्ञानक्रमेण॥ कार्यसामा
न्यज्ञानम्॥ कार्यसामान्यस्मरणमेव॥ बुद्धप्रयोगः॥ स्वजिज्ञासाबोधकप्रश्नवाक्यप्रयोगः॥ इष्टसाधनताज्ञानेन॥ शिष्यीयप्रत्यक्षा
र्थज्ञानरूपेष्टसाधनताज्ञानेन॥ अनुमानाभिधाने व्यादिद्वारेति शेषः॥ अनंतराभिधानम्॥ प्रत्यक्षानंतरं शब्दस्य कानुमानाभिधा एम
नम्॥ स्मानविशेष्यकत्वेति॥ नन्वेवं सति जिज्ञासाघटकीभूतं ज्ञानपदं व्यर्थम्॥ न च फले क्षाजनकीभूतफलज्ञानप्रकारे फलवृत्ति ५

धर्मेऽतिव्याप्तिवारणायैवेतदिति वाच्यम्॥ तत्त्वविवक्षायां पदार्थासंभवादिति चेन्न॥ विवक्षितजनकताविशेषलाभायैव तल्लाभस्यावश्यकत्वात्॥ आनंत
र्येति॥ आनंतर्याभिधानप्रयोजकजिज्ञासासाधारण्यादिति भावः॥ न चैवमोजकांतंमदे प्रमेवेति वाच्यम्॥ तथासत्यतिप्रसंगवारकविषयवि
शेषघटितहेतुतामादायेष्टसाधनत्वेऽतिप्रसंगात्॥ स्वांतंत्र्येण॥ इष्टसाधनताज्ञानपार्थक्येन॥ नत्वतिरिक्ति॥ इष्टसाधनताज्ञानमुद्दिश्यासामा
न्यधर्मप्रकारकज्ञाने जनकतामादायैव लक्षणगमनादिति भावः॥ स्वातंत्र्येणान्वयव्यतिरेकाभ्यां तस्य स्वातंत्र्येण जनकत्वमस्त्येतमिस
स्वरसादाह॥ केचिदिति॥ अपि कं मन्त्रेन भवानंदीप्रकाशे द्रष्टव्यम्॥ ज्ञापकत्वम्॥ ज्ञानसंपादकत्वम्॥ न च धूमादिहेतुकोपस्थापकतया के
चिच्चेत्प्रमाणसहकारितया तत्राप्यमाह॥ एवमिंद्रियेति॥ द्वितीयमाह॥ एवं विशिष्टेति॥ ज्ञापकत्व॥ प्रमाणसहकारि॥ अनुमितौ तु॥ अनुमि
तिहेतुत्वे साधकप्रमाणसहकारित्वापत्तिरिति तर्कनिरूपणमिति भावः॥ एवमिति॥ अत्र च घटत्वं घटकीकृतघटत्वादिस्वरूपमिति घटत्वादी
नामुपाधुतमध्ये निवेशः॥ एवमनुपेक्षणीयत्वमनुपेक्षणीयवृत्तिधर्मस्वरूपमिति साध्येत्वादेः प्रसंगमध्ये निवेश इति ध्येयम्॥ आ
धेयत्वादिरूपोपाधुतत्वाभावेन न प्रसंगत्वेऽपि घटपदवाच्यत्वादिरूपोपाधुतत्वमेव न प्रसंगत्वं च विधसंगतिभिन्नसंगतेरेव प्रसंगत्वादिति स्व
6 रसादाह॥ केचिदिति॥ संभावनात्मकप्रतिसंधानेन जिज्ञासानुदयः॥ निर्णयप्रतिसंधानं च न सार्वत्रिकमित्यस्वरसादाह॥ केचिदिति॥ सक२
अत्र चैषां तव केपदद्वयघटितपाठः॥ आमादिकः॥ तथासति व्यक्तेरनुपेक्षणीयत्वप्रतिसंधानासंगतेः॥ पर्यवसानमिति॥ पूर्वोक्तस्यो

मं०टी०
६

ज्ञासानिवृत्तिघटितत्वेनासंगतामेवाभावः॥ देयमिति॥ यथा चैवं संगतिलिंगकैकवाक्यतानुमानेन निषिद्धसाधनं तथाग्रे वक्ष्यमाणं सर्वमिति॥
कथितजिज्ञासां विनापि लाभादीतिवृत्तेर्वेगुरुत्वेण निरूपणादिति भावः॥ एतेन यच्च निरूपणं तज्जिज्ञासोत्थापकत्वोपधानमावश्यकं ज्ञानार्थनिरू ला
पणस्य ज्ञाने च्छां विनाऽसंभवादिति दूषणं निरस्तम्॥ असंगाघ्यतमत्वमिति॥ अत्र निरूक्ष्य निष्ठत्वे सतीति देयम्॥ तेनानिरूपिते पि कार्य
तादेः संगतित्वोपपत्तिरिति दूषणं प्रयुक्तम्॥ यत्तु प्रमेयपदत्वमिति॥ जिज्ञासयानिरूपणे प्रमेयमात्रस्य संगतित्वानुपपत्तिरतो दृष्टान्त
तमत्वस्य प्रसिद्धिरिति केचिद् दूषणमुक्तम्॥ तन्न॥ तावद्वृत्तित्वस्य शून्यत्वात्तत्वस्यान्यतमत्वस्य च त्वात्॥ कारणे व्यभिचारात्॥ तत्का
रणमेतन्नो व्यभिचारतः॥ किंचेति॥ एवं च समानवित्तिवेद्यतया नैतयोः जिज्ञासाजनकज्ञानविषयत्वरूपसंगतित्वलक्षणम् अभिधान
पि मूलत एव लब्धमिति ध्येयम्॥ उपमितीत्यादि॥ अतिरिक्तां तमंतरपदस्यार्थः॥ अतिदेशवाक्यार्थांतर्गतोपमितिविषयगवयादि
ए वृत्तस्य शक्त्वरूपलाक्षणिकतया तत्र युक्तिमाह कानुमानस्यापेक्षा न संभवतीति तदुपादानम्॥ नत्वेपमितावपीति॥ न चोपमानइ
त्यपि द्रष्टव्यम्॥ अविषयत्वादिति॥ समयपदकतयेत्यादिः॥ उपजीव्यत्वेन॥ उपमित्युपजीव्यत्वेन॥ सर्वं च दीधितिस्थोपमानप
दं भावव्युत्पत्त्या सोपमितिपरं द्रष्टव्यम्॥ तत्र वृत्तिनिमित्तकत्वेनोधकानुमानपदस्योपमितिविशेषणगवयपदशक्तिनिमित्तत्वाविष एम
यत्वेकेन विशेषणग्राहकत्वेनोपयोगो न संभवतीत्यत आह॥ समानेति॥ किंचिद्धर्मावच्छिन्न एतस्मिन्नत्वे हि तत्र वृत्तिनिमित्तत्वम् ६

तथा च गवयपदे किंचिद्धर्मावच्छिन्नशक्तिमत्त्वेन ग्रहमाणं किंचिद्धर्मे गवयपदशक्यतावच्छेदकत्वस्याप्यग्रहादिति भावः॥ इत्यस्येवेति॥ तथा चैत
न्मते निरुक्तसादृश्यज्ञानजन्यत्वस्योपमितिलक्षणस्य पदार्थबोधकानुमानस्योपमितिरूपतायामेव असंभवति किंतु गवयपदं शक्यत्वसाधुपदत्वादिसाधकानुमा
नस्यैवेति भावः॥ असंगत्याह॥ अत्रेति॥ ननु कार्यकारणभावस्यानन्तराभिधाननियामकत्वे संगतेरेव तन्नियामकत्वमागतमत आह॥
एवं चेति॥ नो कुद्दि॥ निरूपयोः कार्यकारणभावस्यैव संगतित्वादिति भावः॥ न दोषः॥ नैसंगतेरनन्तराभिधाननियामकत्वापत्तेः॥
यथा कथंचित्ज्ञातो सेति॥ उपलक्ष्यनिरूपणोपजीवकनिरूपकं किंमिति जिज्ञासेत्यर्थः॥ संगतिरेव॥ परंपरयानिरूपयोः
संगतिरेव॥ कश्चिदिति संगतेरनन्तराभिधाननियामकत्वापत्तेरास्वरसः॥ कश्चिदिति॥ उद्देश्यतावच्छेदकस्वरसः॥ इति शेषइति॥ स्वत्र
नुमानपदस्यानुमितिपरतया व्याख्याने ऽनुमानमिसस्यापि शेषांतर्भावः यथा श्रुतार्थकत्वे ऽनुमाने मितिप्रतीकमुपादेय इत्येव शेषइति ध्येयम्॥
यथासेति॥ खंडपदाधिकरणतंत्रो अभिधाय इदं सपदम्॥ उपरिदेशे॥ उपरिदेशावच्छेदेन॥ सूत्रस्थाना नाममुपनेत्यावर्त्यांतरमाह॥ पदेति॥
पूर्वमिति॥ अन्वयव्यतिरेकयोः पौर्वापर्यादन्वयव्यतिरेकिणः पूर्वशेषवत्त्वेन तु व्याप्तिज्ञसंबंधस्येवानुमानतया व्याप्त्यादिप्रसक्तपूर्वकत्व
मनुमितिलक्षणं संभवति नानुमानलक्षणमत आह॥ अत्र चेति॥ तेनेति॥ इंद्रियासंबद्धस्य स्वरूपज्ञानं विनेंद्रियार्थसंनिकर्षोस्य
सेनयफलीभूततत्संबंधज्ञानासंभवादिति भावः॥ अन्यथा॥ असलक्ष्यमात्रपरामर्शे॥ असंगतिरिति॥ फलतः स्वरूपतश्चेत्यत्र फलत इत्यस्य स्वरूप

म०टी० ७ योरनंतरमभिधाननियामकस्याप्यपेक्षितत्वेनप्रकृतत्वादितिभावः॥ तत्रापि॥ असत्त्वं व्याप्तिमादृत्यमितिअसत्त्वविशेष्यकबोधेपि हेतुत्वा
नुपजीव्यम्॥ असत्त्वानिरूपणेन असत्त्वेन प्रसुप्तानां विशेष्यतावच्छेदकप्रकारकज्ञानाभावेन असत्त्वसिद्धिप्रतिबंधव्याप्तिग्राहकसंबंधेष्वा
भगाहिबोधासंभवादितिभावः॥ ननूपमानभिन्नत्वेनानुमाननिरूपणस्योपमाननिरूपणाधीनत्वमिवेतिपरीसंधिं न स्यादत आह॥
अनुमानस्येति॥ एवं द्वैविध्ये नाम॥ उपमानाप्रामाण्यवादिनाम्॥ उपमानकार्यमिति॥ उपमानाप्रामाण्यवादिनो ह्यनुमानेनैवोपमानं
कार्यमिति परिच्छेदनमुपगच्छंति॥ निरूपितम्॥ सर्वैरुपमानप्रामाण्यवादिभिर्निरूपितम्॥ आद्युरूपितमिति॥ अतियोगि
निरूपणाधीनत्वात्संगतिनिरूपणस्येति भावः॥ ॥इति श्रीमहादेवविरचितायां सर्वोपकारिण्यां भवानंदीव्याख्यायां संगतिग्रंथ
व्याख्यानं समाप्तम्॥ ॥अनुमानलक्षणे॥ अनुमानलक्षणेपि॥ केचिदिति॥ आहेति कश्चित्पतपाजाक्षे॥ फलतः स्वरूपतश्चेति ग्रंथप
र्यालोचनया पूर्वमनुमितिलक्षणाभावस्येवातिव्याप्तत्वेन विनिगमकाभावादितिभावः॥ अनुमितिः॥ अनुमितिरेव॥ किमितीति॥
आद्यविशेषः॥ एतेनानुमितिनिरूपणस्यापि पूर्वमपेक्षितत्वेनानुमितिः किमिति लक्षिते संगतमिति शंकापास्ता अनवकाशः
विभागादीति॥ आदिना तत्रानुमानं परार्थं स्वार्थमपि समस्तपरिग्रहः॥ विशेषणत्वादिति॥ न च विशेषणत्वे स्यादेवनिरूपणं एम ७
प्रयोजकत्वे आस्तां देव्यादौ निरूपणमुचितं तस्यानुमितिलक्षणे विशेषणत्वादिति वाच्यम्॥ आसवनुमितिनिरूपणोपजीव्यत्वे

वत्प्रयोजकानतुविशेषणत्वं ननु आदावनुमानमुपेक्ष्यानुमितेर्निरूपणे संगतिविनिगमकाभिलाषः स्यात्। ननु प्रामाण्यनिरूपणे हेतुलाघवभावेन प्रामाण्य(दे
ह्निमित्तिनिरूपणीयानुपपन्नेसत आह। तत्त्वेति। प्रकारितायामिति। प्रकारितायां वैशिष्ट्यरूपतया इत्यंशे तल्लक्षणे तत्तीयेति भावः। ननु लक्षणादिप्रकारज्ञानि
र्णीयस्येव निरूपणे न यत् अनिरूढाक्षयपालक्षणे साहित्यतीयोनार्थानन्वयप्रसंग आह। निरूपणीयदिति। विशिष्टवाचकपदस्य विशेषणबोधकप
दसमभिव्याहारे विशेष्यमात्रपरत्वादिति भावः। विशेषणे हेतानुप्रवृत्तिरूपत्वसमन्वयार्थहासंभवादाह। तथा चेति। अनुमानस्यानुमितिसाधारणभागाद्
दृ। स्वविषयकेति। स्वपदमनुमानपरं। एवं स्वस्य निरूपणस्य निर्विषयकत्वादाह। प्रकारत्वमिति। मतान्तरमाह। अनुमानइति। इत्यर्थः। इतिप
र्यवसितार्थः। मतान्तरमाह। अनुमानेति। नन्वेवं तत्रानुमाननिरूपणे इत्येवकुतो नोक्तमत आह। अनुमानस्येति। परामर्शस्येति। तच्छब्देन निषे
धः। असंभवादिति। तथोक्तमिति। स्वेनान्वयः। नन्वेवं निरूपणीयानुमानस्यानिर्णयत्वात् संगतिरत आह। विशेषणस्येति। निरूपणस्यस्वस्यार्थः
विशिष्टेति। निरूपणीयानुमाने। विशेष्यतादिति। स विशेषणेहीति न्यायादिति भावः। तथोक्तम्। अनुमाननिरूपणइति विहायानुमाननि
रूपणीयेइत्युक्तम्। ननु मतद्वयेपि समन्वयार्थस्य रूपमनुपस्थितेऽनुमाननिरूपणेऽन्वयइत्यत आह। चेति। उभयत्रापि। मतद्वयेपि
इत्यन्वयइति। अनुमितिरित्यस्य लक्षणत्वात् अपकर्षेण निरूप्यतइति पक्षे क्रियानुषंगेण च तथान्वय इति भावः। अत्रानुमितिनि
रूपणइत्यस्य पर्यवसितज्ञानत्वेन ज्ञानविषयज्ञानत्वानुपपत्तिर्मतद्वयेपि स्वरसो बोध्यः। सर्वत्र। लक्षणादौ। अन्यथापि। व्याप्तिज्ञानका

भ॰टी॰
८

दिनापि॥ करणस्वरूपस्य क्रियाभेदेऽभिन्नत्वाभावादाह॥ अन्येति॥ क्रियाशक्तिभेदान्न करणताभेदोऽत आह॥ भेद इति॥ भिन्नप्रमाणत्वमिति॥
प्रमाणैक्ये ज्ञानस्य प्रमाणताभेदकत्वादिति भावः॥ ननु स्वरूपभेदादेव भिन्नप्रमाणतास्त्विति तत्राह॥ आश्रीति॥ अनन्यपादिति॥ एकविशेष
णतये स्वादित्यस्य सन्निविशेषणादिति भावः॥ लक्षणेति॥ न च नीलादिपदस्य गुणे एकत्वान्न तत्र लक्षणेति वाच्यम्॥ तस्य गुणिनि निरूढलाक्ष
णिकत्वेपि प्रकृते शाब्दान्वये गुणोपस्थितत्वं स्वार्थस्य लक्षणया आवश्यकत्वात्॥ गौरवस्यानाकाङ्क्षितत्वेनादोषादाह॥ नीलत्वोत्पलत्वयोरि
रिति॥ बाधितत्वादिति॥ तथा च भावप्रत्ययस्य कर्मधारयत्वोत्तरत्वोपपत्तिरिति भावः॥ अनुभवविरोधमप्याह॥ नीलत्वादि॥ कल्पद्वयेपि दोषमा
ह॥ एवमिति॥ अप्रसिद्धत्वादिति॥ इतरत्वस्याख्यातं वर्तकत्वादिति तस्य तत्त्वानियोगितावच्छेदकत्वादिति भावः॥ गुणेऽप्यवच्छेदकत्वेपि दोषमाह
घटत्वादिति॥ कथाञ्चेति॥ न च घटपदसमभिव्याहारोऽत्र लक्ष्यघटेनान्वितत्वस्य न बाध इति वाच्यम्॥ तस्येतरत्वनिरूपितावच्छिन्नाभावत्वरूपत्वा
स्यतावच्छेदकानाक्रान्तत्वेन बाधासंभवदशायामेव॥ न चैकपदोपात्तानां परस्परमन्वयेन कथं विशिष्टलाभ इत्यत आह॥ प्रसन्नीति॥ नीलत्वे सम
न्वाप्यभिन्नेति॥ न च समवायाभेदयोऽसंसर्गतया समन्वयाव्यभिन्नसमवेतत्वपर्यवसानस्य कथं लाभ इति वाच्यम्॥ संबंधसंबंधोपि विशिष्टबुद्धिभा
सकत्वात्स्वरूपान्यायमनावलंबेनैवेतदभिधानात्॥ स्वरूपसंबंधेनेव॥ स्वांशकसंबंधेनेव॥ आनमिति॥ संबंधांतर्गतत्वेसादिश॥ तदेवाह राम
अभेदांशस्येति॥ वस्तुतस्तु स्वरूपसंबंधेनैव विशिष्टनिरूपितायाः समवायसंबंधावच्छिन्नाधिकरणतात्वस्य संबंधेनैवतादृ ८

णाधिकरणतायां विशिष्टनिरूपितसमवायरूपत्वं तस्य च विशिष्टेतरविवेकेन विशिष्टरूपत्वमिति रीत्या विशिष्टस्वरूपत्वात् स्वरूपसंबंधत्वमि-
ति भावः ॥ सामानाधिकरण्यस्यापि भानमिति ॥ एवं च दीधितौ सामानाधिकरण्यपदं वाचकत्वोद्दिष्टस्य यथाकथंचित् सामानाधिकरण्यबोधकत्वा-
दित्येवार्थ इति ध्येयम् ॥ तद्वृत्ति समवेतत्वस्येति ॥ घटादिसम्भिन्नमेयानान्वयः ॥ इदं च सर्वं विशिष्टनिरूपितसमवायसंबंधावच्छिन्नाधिक-
रणत्वं विशिष्टसमवायरूपत्वं तस्य च विशिष्टानतिरिक्ततया समवायरूपत्वमिति साधारणेनयेन तत्त्वं चनापि च सामान्यत एव विशिष्टस्यान- न
तिरेकितया स्वरूपत्वम् ॥ अत एव प्रकृतिग्रन्थेऽपि प्रकारतावच्छेदकसंबंधेनेव तद्वृत्तित्वस्य तद्वृत्तित्वाभिधानेन नात्र स्वात्मकसं-
बंधस्य निरूपकाधिकरणत्वस्यैव वा तादृशसंबंधत्वेन समवेतत्वस्यैवाभिवेशात् व्याप्त्यसंगतिः ॥ एवं पूर्वोक्तं नीलत्वसमवायस्य भानादि-
सप्रसंगतं समवेतत्वस्यैवाप्रवेशात् तत्कथं भिन्नस्वरूपसंबंधत्वरूप सामानाधिकरण्यत्वेन सामानाधिकरण्यभानानिर्वाहाच्चेत्सा-
शंकायामत्र नवकारः ॥ विवक्षितत्वादिति ॥ न चैवमुक्तरीत्या सामानाधिकरण्यालाभः ॥ आशंकितस्थल एवैतद्विवक्षणेनान्यत्र पूर्वो-
क्तस्यैवादरणात् ॥ न चैवं घटत्वमिति सोऽयं देवदत्त इत्यादौ भानमिति ग्रंथासंगतिरिति वाच्यम् ॥ वक्ष्यमाणसन्निधानबहुव्रीहिणा महत्त्वमि-
त्यत्र सत्तायां न भानमित्यर्थकत्वात् ॥ यद्वा ॥ सर्वत्रोक्तविशेषणोपि प्रतियोगितावच्छेदकतया प्रकृते सर्वत्र व्यावच्छेदकता घटकसंबंधनिवेशेनो-
क्तरीत्या सामानाधिकरण्यलाभान्न दोषः ॥ संबंधेनेव ॥ प्रकृते सर्वत्रावच्छेदकसंबंधेनेव ॥ इदं च यथाश्रुताभिप्रायेण ॥ उक्तनिष्कर्षे तु इदं

म०टी० द्रूपेण तियोगिताया न संबंधावच्छिन्नत्वनिवेशो वोध्यः॥ जातिस्विकरूपेण॥ विशिष्य॥ नन्वेतत् समभिव्याहारे एतद्वत्तस्संबंधज्ञानेन तमंतमप्य
९ शक्यत्वानेसमत आह॥ पदेति॥ धर्मत्वेनैवेति॥ इतरवृत्तित्वादौ शक्तिकल्पनापेक्षया धर्मत्वावच्छिन्ने शक्तिकल्पने लाघवादिति भावः॥ नि
रूपितसंबंधेन॥ निरूपितत्वविशिष्टप्रकारसंबंधतावच्छेदकतया घटकसंबंधेन॥ पक्षद्वयेपि दीधिकारसंमतिमाह॥ अत एवेति॥ अन्यदेतदि
ति॥ विशेषरूपेणानुभवे विशेषशक्तिपक्षः॥ नो चेद्धर्मत्वेनैकशक्तिपक्ष इति भावः॥ विशिष्यशक्तौ चेति॥ एवं च सामानाधिकरण्यान
न्वयनत्वादिति दीधितिग्रंथस्य सामानाधिकरण्यवाचकत्वादिसेवार्थ इति ध्येयम्॥ मतांतरमाह॥ घटपटत्वेभिसादि॥ सामान्यशक्त्या
भावप्रसंगाभाववच्छिन्नप्रतीत्या रूपेण शक्त्या॥ मुख्यविशेष्यान्वये संभवतितत्वा॥ तस्यानोचितसभिसामग्र्येनाह॥ अवच्छेदकसंबंधेने
ति॥ केचिदिति॥ अन्यत्र गुणप्रवृत्तिद्वयविरोधप्रकरणे नैमित्तिकविहेशक्तिद्वयेन निर्वाहान्नोचितसंचारस्वरसः॥ इदानीयादिति॥ सा
मानाधिकरण्यानुयोगिप्रतियोगिवाचकपदेतरपदसामानाधिकरण्यवाचकपदं तद्भिन्नतरपदज्ञानपदं तत्र तद्घटन्तरस्मिन्नेतदन्यतर
सामानाधिकरण्यावगाहिज्ञानं वोधयतीति युक्तसंगीके न्नुर्मतानुसरणादिति भावः॥ अत एव॥ तन्मतानुसरणे तादृशर्थालाभादेव तिर
अनेनैवदोषेण॥ आंतानुमिस्याभिन्नपदे दोषेणैव॥ इदम्॥ तपाध्यायमतम्॥ विशिष्यवृत्तिव्यति॥ भ्रमस्थलेवेत्यादिनादूषयिष्यति॥ एम
संदर्भविरोध्यात्॥ ज्ञानपदोपसंदानेनेत्यादिग्रंथस्य भ्रमस्थले चेत्यादिग्रंथस्य च विभिन्नतासपर्यवसंगतात्॥ [illegible]॥ ९

द्वेष्टित्वमिति ॥ अस्मिंस्तेनैव एकता सूर्यस्य संभवेन न विभिन्नता सूर्यकल्पनस्यानौचित्यादिति भावः ॥ संबंधभानवत्त्वा ॥ संबंधसंबंधभानवत्त्वा ॥ किंचि
ति ॥ अत्र संबंधसंबंधभाने नैव सामानाधिकरण्यभानसिद्धौ पृथक् सामानाधिकरण्यभानसाधनं वैयर्थ्यमिति अस्वरसः ॥ विषयतावै
लक्षण्यादेवेति ॥ अन्यथा विशिष्टज्ञानस्य संबंधसंबंधविषयकत्वेपि संबंधविषयकसमूहालंबनाद्भेदानुपपत्तेरिति भावः ॥ ज्ञानमि
ति ॥ ज्ञानातिरिक्तविषयानभ्युपगंतृसाकारवादिना विषयावैलक्षण्येपि आकारवैलक्षण्येनैव ज्ञानवैलक्षण्यमुपपादितुं शक्यमि
त्यिति भावः ॥ रसनुरोधादिति ॥ प्राचीनमतानुरोधात् ॥ लाघवादाह ॥ ज्ञातत्वप्रकारतासामान्यस्यैवेति ॥ इदं रजतमिति ॥ प्रमात्वप्र
ज्ञानीयप्रकारत्वस्य यत्किंचित्समानाधिकरणप्रकारतानियामकसंबंधनिरूपितत्वनियमस्य तेनासंबंधे विशिष्टभाने व्यर्थत्वस्तन्निरासेन संबं
धतीतिसामान्यसेमूलम् ॥ संबंधनिरूपितत्वेति प्रकारतामात्रसंबंधानिरूपितत्वेन संबंधानिरूपितत्वमित्याशयः ॥ अर्थतदनुक्ते
यविवृणोति ॥ अस्यादिति ॥ ज्ञानपदं प्रतिपादयति ॥ पूर्वपक्षिमतानुसारेणादिति भावः ॥ तादृशलक्षणाम् ॥ एतादृशलक्षणादे
नाभिमतम् ॥ नैतादृशेति ॥ अयोग्यतानिर्णये तत्प्रतिबंधात् ॥ लक्षणावाच्यजन्यप्रतिपत्तेरसंभवे नैतादृशलक्षणस्य लक्षणावाच्यजन्य
प्रतिपत्तिविषयत्वरूपलक्षणया व्यप्रतिपाद्यतासंभवेन लक्षणतासंभवेपि लक्षणसत्त्वरूपाया आदिर्दुर्वारैवेति भावः ॥ ननु आदि
विशिष्टत्वसामानाधिकरण्येन हृदयंगमत्वलौपमिसयोग्यतानिर्णये व्याप्तिविशिष्टत्वसामानाधिकरण्यविशेषतापन्नहृदयंगमत्वस्य ॥ ०

10

ज्ञानान्वयासंभवेपिस्वातंत्र्येणतस्यज्ञानान्वयेबाधकाभावइतिचेन्न॥ एकविशेषणतयोपस्थितस्यान्यत्रस्वातंत्र्येणविशेषणतयान्वयस्या
व्युत्पन्नत्वात्॥ पूर्वोपदर्शितव्युत्पत्तेर्मानाभावेनपूर्वोपदर्शितमतानुसरणस्याप्र[illegible]णात्॥ तस्यस्वातंत्र्येणज्ञानान्वयेभावकसप श्र
स्यकर्मधारयेतात्पर्यानुपपत्तेश्चेतिदिक्॥ वकारणभावेनदोषांतरपरत्वेऽसामंजस्यमितिऽस्वरसादाह॥ कश्चिदिति॥ सामानाधिक
रण्येन॥ तद्भावनिश्चयस्यसामानाधिकरण्येनतद्विशिष्टबुद्धौवप्रतिबंधकत्वादाह॥ विषयतावच्छेदेनेति॥ ननुतादृशशाब्दबो
धेविषयतांशेशब्दसंबंधिनस्तादात्म्येनसम्भवात्तथापितत्शब्दसंबंधिभेदनिश्चयस्यैवविरोधितयाशब्दसंबंधाभावनिश्चयदशाया
मिसंसर्गतमतन्त्र्याह॥ शब्दविषयोसत्वेति॥ षष्ठ्यर्थलक्षणया॥ षष्ठ्यर्थसंबंधवतिलक्षणया॥ विरोधी॥ मानाभावेनेत्याद्य
पिस्वातंत्र्येणविरोधी॥ यत्तुशब्दसंबंधाभाववत्पदस्यशब्दसंबंधेनाभावइतिव्युत्पत्त्याशब्दसंबंधावच्छिन्नप्रतियोगिताकभेदेप
रतयातन्निश्चयस्यसाक्षाभावावगाहितयेनविरोधित्वसंभवेनाप्रकृतग्रंथस्यस्वातंत्र्येणविरोधितापरत्ववर्णनमयुक्तमिति
तदसत्॥ नामार्थस्यशब्दस्यनामार्थसंबंधेभेदेनान्वयस्यासंभवेनशब्दा[illegible]पदस्यशब्दप्रतियोगिकत्वलक्षणमुपेत्यशब्दप्रतियोगि
काभिन्नसंबंधस्यैवशब्दसंबंधपदार्थत्वमुपेयंतदवच्छिन्नभेद[illegible]पदस्यचप्रतियोगितयाशब्दावच्छिन्नसंबंधवद्भेदस्य
हेतुत्वात्तेनैवविरोधितयाप्रकृतग्रंथस्यतत्परत्वस्यतात्पर्यावधारणत्वेन॥ उत्तयाशब्दसंबंधाभाववत्पदस्यशब्दसंबंधासंता

भावपरत्वनुपेयस्वात् अन्यविरोधिताप्रत्वस्यैवयुक्तत्वात्॥ एतत्संबंधिभेदनिश्चयदशायामिति स्वपेक्षायां बीजाभावाच्च॥ केचित्तु तद्धर्म्मस्य तत्संताभावा
वच्छेदकत्वमुपगच्छतां मुख्यायानां मते एतत्संबंधाभावनिश्चयोपि ग्राह्याभावावगाहित्वेन विरोधीतिआह॥ प्रमाकरणलक्षणोपयोगिनीति॥ यदिच्छांनिः
प्रमाकरणलक्षणोपयोगिनीत्यत्र द्वाप्रमावह्निव्याप्यवान्नतेवृमिल्लो एतपवः॥ इत्यर्थः॥ इतिभावार्थः॥ प्रमाकरणलक्षणानुपयोगिनीतिपाठेर्थ इति
यथाश्रुतमेव॥ भानेति॥ व्यापकताघटकसंबंधेनेवानुमितौ व्यापकस्यभानं॥ नियमादितिभावः॥ भासतएवेति॥ तादृशनियमे भानाभावादितिभावः॥
व्यांतानुमितेरपि किंचिदंशेप्रमात्वादाह॥ यावदूमेति॥ व्यापकत्वावगाहिना॥ वह्निव्याप्यधूलीपटलवान्पर्वततद्रूसादिपरामर्शेन॥ पक्षधर्मत्वाव
गाहिना॥ वह्निव्याप्यमहानसीयधूमवान्पर्वततद्रूसादिपरामर्शेन॥ नच धूमत्वावच्छिन्ना[illegible]द्देशप्रसिद्धव्याप्तिवैशिष्ट्यस्य पक्षधर्मत्वसामानाधिक
रण्यावगाहित्वस्योक्तपरामर्शयोःसंभवान्नाव्याप्तिरितिवाच्यम्॥ पक्षधर्मतांशेप्रमात्वस्यकाद्यपरामर्शजन्यानुमितौ व्याप्तिवैशिष्ट्यांशेप्रमा
त्वस्य द्वितीयपरामर्शजन्यानुमितौ चाव्यापेरुक्तत्वात् हेतुत्वाभावादिति॥ निरस्येसादिव्याप्तिबलाद्धेतुतायांसामानाधिकरण्यस्यप्रसक्ति
त्वाच्चेतिभावः॥ ननुज्ञानांतर्कर्मधारयपक्षेपि वक्ष्यमाणरीत्याज्ञातिघटितलक्षणमावश्यकमितिप्रमापि तादृशलक्षणाकरणत्वेनोक्ताव्याप्तिः
व्याप्त्यविषयकत्वेन जन्यज्ञानविशेषणत्वेन तादृशस्यैव तद्धीदृजातिमत्त्वाय प्रसक्तप्रसाद्यावतिव्याप्तिरसपितुस्योमिति चेन्न॥ तथापि दैवात्
तादृशसामानाधिकरण्यावगाहिकांक्षाज्ञानादिजन्यव्याप्त्यविषयकज्ञानसादृश्यविशेषत्वादिजातिमत्त्वायप्रसक्तावतिव्याप्तेर्दुर्वारत्वात्

म०टी० न च ज्ञानांतकर्मधारयपक्षेपि उक्तातिव्याप्तिवारणाय कारणतावच्छेदककविवक्षावश्यकीति समापितद्विवक्षया नोक्तातिव्याप्तिरिति वाच्यम्
११ ज्ञानांतकर्मधारयलभ्यव्याप्तिप्रकारकपक्षधर्मताज्ञानगाहित्वस्य लघुत्वात्कारणतावच्छेदकत्वेन तस्य कारणतावच्छेदकविवक्षासंभवेपि तस्य
लम्यत्वेनुभयसामानाधिकरण्यावगाहित्वस्य गौरवेण कारणतानवच्छेदकत्वेन तस्य कारणतावच्छेदकविवक्षाया असंभवात्॥ अन्ये
तु वक्ष्यमाणद्वंद्वसमासपक्षे वक्ष्यमाणदूषणानामपि दुरुद्धरत्वेति ध्येयम्॥ एतेन विशिष्टस्यानतिरिक्ततया विशिष्टघटकपदार्थस
मूह एव विशिष्टपदार्थः विषयतावैलक्षण्यादेव तावत्पदार्थगोचरसमूहालंबनतो विशिष्टज्ञानस्य भेदः॥ तथा च व्याप्तिवैशिष्ट्यपक्षध
र्मितासामानाधिकरण्यपदेन तत्तद्घटकीभूतानां तावतां पदार्थानामेवोक्तत्वाच्च सिद्धमेवेतेषां ज्ञानांतकर्मधारयपक्षेपि वक्ष्यमाणरीत्याखिल
लक्षणविषयितया ज्ञाने ऽन्यथा न कोपि दोषः॥ तादृशविषयितायां त्वमात्मलक्षणमेवोज्जातिइच्छायामा॥ एवं वक्ष्यमाणद्वंद्वसमासलभ्यं लक्षण
एग मपि न वक्ष्यमाणातिव्याप्त्यतिदुष्टं च ह्रिभान्यो धूमो ऽग्निवान्पर्वत इत्यादिज्ञानानां जिलक्षणविषयितया व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयघ
टाभावेन तज्ज्ञाने विवक्षितलक्षणाभावात्॥ एवं च यत्संतकर्मधारयद्वंद्वसमासयोरपि निर्दुष्टतया शेषमिति कृतस्तयोर्विशेषमुपन्यस्य ज्ञा
नांतकर्मधारयपक्षाद्दोषसंगतेरुपिपुरस्कारः॥ उक्तरीत्या कारणतावच्छेदककविवक्षावश्यकीतदवच्छेदकं च विषयितया व्याप्तिप्रकारक एम
पक्षधर्मताघटकीभूतानां तत्पदार्थविशेष्यकस्तिं व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वमेवेत्यतोक्तसमासाभ्यां लघुत्वरूपां व्याघ्रसामाना ११

धिकरणं धर्मद्वितीयैवेति प्लां धर्मस्याधिकस्य प्रतिपादनादिति तत्प्रतिपादनयोग्यज्ञानं तत्कर्मधारयपक्ष एव दीधितिकृतेति तत्र आदौ निरूपितसंक्षेपसूत्रगएक
विषयत्वाभावादिति ॥ घटाद्यसादौ सरूपैकशेषविषयस्य पदार्थतावच्छेदकभावेन द्वंद्वविषयत्वादिति भावः ॥ न चाक्षाद्यसादेस्तुल्यमात्वैकविषयत्वमस्येवेति
वाच्यम् ॥ सामान्यविशेषयोरेवापवादापवादकभावेन सरूपैकशेषस्य द्वंद्वविषयविषयत्वे द्वंद्वापवादकत्वानुपपत्तेः ॥ पदार्थतावच्छेदकभे
दे नैव सैव कारसंवलितदीधितिसत्ताद्वहृ ॥ अक्षाद्यसादौ ॥ नानार्थ एवेत्यादि - घटाद्यसादौ बहुवचनेन घटत्वप्रकारकसंभवे सरूपैकशेषोऽनि
ष्टार्थकः ॥ अक्षाद्यसादौ तु सरूपैकशेषविधेर्न द्वित्वादिविशिष्टसंख्यानुसंधानावच्छिन्नपदमेकत्वावच्छेदकावच्छिन्नबोधयतो सार्थकत्वमितिदुरु
क्तेति मुख्यविशेषादिति तत्र सरूपैकशेषस्य सार्थकत्वसंशयः ॥ न च सरूपैकशेषे तु नेत्यनुसत्त्वानानाभावेन सरूपैकशेषो व्यर्थ एवेति वा
च्यम् ॥ तथापि प्राचीनमते पुनरुक्तिद्वयविशेषेण सरूपैकशेषस्य सार्थकत्वात् ॥ न चास्तु लोके शब्दविशेषेऽपि मानाभावेन सरूपैकशेषो व्यर्थ
एवेति प्राकृत ॥ यथा श्रुतेऽपि ॥ पदार्थतावच्छेदकभेदे नैव द्वंद्व इति पक्षान्तरं दीधितिग्रंथेऽपि ॥ असाफल्येति ॥ एकत्वेति ॥ एकत्वविवक्षायां बहुव
चनस्यासाफल्यादिति भावः ॥ पदसाफल्यायैवेति ॥ न च व्यक्त्यादिस्तुशास्त्रस्यैव द्वित्वादिविवक्षायामेव द्विवचनादिविधायकत्वात् कथं पदसा
फल्यमिति वाच्यम् ॥ द्वित्वादिविधायकस्याद्यन्तरसकद्विवचनादिशास्त्रस्य द्विवचनादिसंज्ञावत्वादेव च द्विवचनादेर्द्वित्वाद्यर्थकत्वज्ञापनात् स्वद्वि
वचनाद्यविधायकतया द्वित्वादिविवक्षायां द्विवचनाद्यसाफल्यत्वेऽपि विवक्षायां तु यथा प्रयोगं वचनं साधिमेवेतन्निषमपरतया सर्वसिद्धेः

12

म०टी० तेनानुपपत्त्यभावात्॥ किमर्थमिति॥ पक्षद्वयेपि द्वित्वावच्छिन्नत्वाविशिष्टत्वादिति भावः॥ स्वरसविरुद्धमिति॥ यथा चैतत्तत्त्वाभ्यवानं दीर्घकाले विवेचि
१२ १ तमस्माभिः॥ ननु चैत्रश्चैत्रश्च स्वपदद्वंद्वसहेनैकशेषापत्तिरस्त्येव॥ न च तत्रैकशेषापत्तिः॥ चैत्रादिपदानां शरीरभेदेनकत्वाद्वित्वान्वयासंभवेन
चैत्रावितिप्रयोगस्य साधुत्वानुपपत्तिरित्यत आह॥ एवमप्याकाशावीश्वरावित्यादिप्रयोगापत्तेः॥ न चाकाशत्वाभावः॥ नीलघटयोरित्यादिवद्द्वंद्वसाधि
नयत्वात्तत्र च संभवादित्यत आह॥ किं चेति॥ विशेषणत्वे विशेष्यत्वे विवक्षितावधारणम्॥ द्वन्द्वाद्यन्यभावेदिति॥ न च द्वन्द्वानुपपत्त्याभावेपि एकशेषा
पत्तिर्दुर्वारेति वाच्यम्॥ द्वंद्वसमासाविषये एकशेषप्रसक्तेः॥ इत्यादि॥ उक्तरीत्या द्वंद्वानुपपत्त्यभावादित्यर्थः॥ एतेन सादि वक्ष्यमाणदोषाद्याह॥ न पुंस
कदंसादिः॥ ननु व्याप्यतावच्छेदकरूपेण व्याप्तिज्ञानपक्षधर्मताज्ञानयोर्हेतुत्वाद्विशिष्टमांसकमिते दक्षिणानुपपत्तिरनुमितिसाधकत्वाभावानां व्याप्तिरत
त्याह॥ पक्षतावच्छेदकेति॥ मेयत्वमिति॥ व्यापकेन व्याप्तिप्रकारतावच्छिन्नपक्षधर्मताज्ञानं च नैकहेतुकेन भवेदिति भावः॥ अन्वेष्यादि
ति॥ अन्यथा कालांतरीयपुरुषांतरीयव्याप्तिमहमाद्यापत्तिसंस्कारादिति भावः॥ तदसंभवात्॥ निरूढत्वेनाधिकरणावगाहित्वात्सं
भवात्॥ विशिष्टबुद्धौ संबंधसंबंधावगाहितया सामान्यलक्षणादिति भावः॥ न च पक्षमर्थेनिनियमतद्दंसादिना स्वप्रागभिधानात्पौ
नरुक्त्यमिति वाच्यम्॥ पूर्वमुपाध्यायमतदूषणत्वेनाभिमतमतदूषणत्वेनाभिधानेनादोषात्॥ तात्र किं च चकारविनिर्णतस्व मिश्रोक्तं राम
संबंधसंबंधग्रहास्वीकारात्पौनरुक्त्यासंबोधपरिहारेषथाकांक्षां व्याप्तिविशिष्टवैशिष्ट्यावगाहीतिपर्यवसितोर्थः॥ १२

पक्षधर्मतापदस्यार्थस्पष्टमेवेसत्त्वात्तोक्तो ध्य४ विकाशतथासंग्राहकत्वपा आप्तिज्ञानसहेतुज्ञानत्वादिनैवकारणतया ४

परामर्शेति॥ वह्निव्याप्यो धूमो धूमवांश्चायमिति ज्ञानाव्यापकत्वादित्यर्थः॥ इदंच तादृशज्ञानान्नुमितिर्व्याप्तिप्रकारकपक्षधर्मताज्ञानत्वमात्रेण हेतुत्व
स वादिनां आचार्यमभिमतमित्याशयेनोक्तम्॥ तस्मादनुमित्यंगीकारे तत्खंडव्यातिरिक्तलिंगविशेष्यमाणरीत्या व्याप्तिबोधे साकूतः॥ कश्चिदिति॥ स्वजो त्कुले
कार्यत्वाच्चिह्नत्वनिर्वाहाय विषयस्य तत्त्वेन हेतुत्वस्यावश्यकत्वमिति सत्त्वस्यैव॥ तद्व्यारणादिति॥ तत्रापि पर्वतसंयोगरूपपक्षधर्मताविषयकत्वस्य स
यो त्वादित्याशयः॥ कश्चिदिति॥ तदुक्तदिशा वह्निव्याप्यधूमसंयुक्तसत्त्वे संबंधितावच्छेदकवह्निव्याप्तिप्रकारकधूमज्ञानत्वेन हेतुतया तत्रातिप्रसं
गकारणपर्याप्तिज्ञानत्वेन कारणताभावात्कारणताद्युपगमासंभवइत्यस्वरसादाह॥ अन्यइति॥ साधारणधर्मवद्धर्मिज्ञानस्य संशयहे
तुत्वानंगीकारेत्वाह॥ वस्तुतस्त्विति॥ केवलान्वय्यनुमानानुपगंतृमतेसाध्याभावप्रदृष्टित्वादिरूपव्याप्तेरैंद्रियकत्वादाह॥ निष्कृष्टमतइ
ति॥ अतींद्रियेति॥ सकलधूमाधिकरणसंनिकर्षविरहेणयोग्यानुपलब्धिविरहाद्धूमाधिकरणवृत्त्यभावप्रतियोगितावच्छेदकत्व
स्यावच्छिन्नाभावलौकिकप्रत्यक्षासंभवेनतद्घटितव्याप्तेरतींद्रियत्वमितिभावः॥ ननुतथापिवह्निमानेन धूमादित्यादौ योग्यानुपलब्धिसंभवे
नव्याप्तेरैंद्रियकतयावह्निव्याप्येतद्धूमवान्पर्वतोनास्तीत्यभावलौकिकप्रत्यक्षेः निप्रसंगोस्त्वेवेत्यतआह॥ एवमिति॥ वस्तुतोव्याप्तोवि
अनुमितित्वावच्छिन्नंप्रत्यभावप्रकारकज्ञानत्वेनहेतुत्वादितिभावः॥ स्फुटवन्निषेधइति॥ पदाभावान्नपर्वतोनास्तीत्यादिप्रसक्तेरित्यर्थः॥
अव्याप्तिरिति॥ पक्षधर्मत्वस्यपक्षाभेदेनज्ञानाहार्यकोपादानेऽन्यानुमितावव्याप्तिरितिभावः॥ अतिव्याप्तिश्चेति धूमवान्पर्वतोनास्तीति

13

म॰टी॰ १३ दि२ प्रसक्तत्वान्निर्व्याप्तिकत्व॥ तेनेत्याप्तिपदस्य लक्षणभिन्नाभावमात्रपरत्वं तथा च व्याप्तिविषयकत्वोपादानेनात्याप्ति॰ व्याप्तेरननुगतत्वादित्यत आह॥
ग्रस्तत्वस्थिति॥ व्याप्तेरिति॥ आदिना विशिष्टस्यातिप्रसिद्ध॰॥ व्याप्तिप्रकारकेति॥ व्याप्तिपदं स्वघटकहेतुपरं तेन घटत्ववान्पर्वतो नास्तीत्यादि
प्रसक्तेनातिव्याप्ति॰॥ विशिष्टपदेन प्रकारतारूपवैशिष्ट्यस्य न विवक्षितत्वमित्याशयेनाह॥ प्रकारपरमिति॥ अथ तस्य दुर्वचत्वादाह॥ तज्ज्ञेति॥
प्रकारतायां विशेष्यतादिनिरूपितत्वस्यैव पक्षे प्रकारइत्यतीतिस्य वहायायां पक्षनिरूपितत्वमपि दुरपह्नवमित्याशयेनाह॥ पक्षनिरूपि
तप्रकारतेति॥ वह्निव्याप्यधूमवान्पर्वत इत्यादौ तु व्याप्तिप्रकारतायाः पर्वतनिरूपितधूमादिप्रकारतावच्छिन्नत्वमस्त्येव सम्भवति तत्र वैल
क्षण्यानुरोधादित्याशयेनाह॥ धर्मेति॥ खर्वमुख्यादृशं घटत्वसमानाधिकरणत्वादिना॥ भावइति॥ तथा च भ्रमात्मकपरामर्शजन्यत्वात्तादृशानुमिते
रपि पूर्वं प्रमानुमितात्व्याप्तिरूपकारइदानीं तु भ्रमानुमितावित्येव विशेषइत्याशय॰॥ भ्रमेत्वेति॥ व्यभिचारिप्रामत्वसंयोगेन साध्यसंबंधित्व
हेतुसंबंधित्वयो॰ असिद्धिरिति भाव॰॥ नत्वप्रतिपत्तिमेवाह॥ धमेति॥ योध्यमिति॥ व्यधिकरणं हेतुमदित्यादिक्रमेण ता
दृशावगाहिपरामर्शजन्यत्वात्तादृशानुमितावपि तथापि हेतुतावच्छेदकावच्छिन्नहेतुप्रकारतानिरूपिताधिकरणप्रकारतानिरूपित
त्वादिक्रमेण व्याप्तिघटकनिखिलपदार्थप्रकारतानिवेशनैयाइ सर्वथा न विरोधीति॥ तथा चोभयव्याप्तिप्रकारतयोर्नीरू राम
पेणानुगमसम्भवइति भाव॰॥ तत्तद्रूपस्यैतिव्यभिचारिःवच्छिन्नत्वम्॥ तुल्यतानस्यापि धूमादिविशेष्यकव्यभिचारधीविरोधित्वमसम्भवे १३

तत्राह॥ पक्षधर्मतांशइति॥ पक्षधर्मतयाज्ञातेइत्यर्थः॥ सत्प्रतिपक्षविशेषणेतरव्यभिचारधियामन्वेति॥ नन्वेवमपितादृशरासभवान्धूमवांश्च
पर्वतइतिसमूहालंबनज्ञानस्यसद्धेतुत्वापत्तिरसिद्धत्वाद्धूमस्यापिपक्षधर्मतयाज्ञानादतआह॥ तद्विशिष्टेत्यादि॥ पक्षनिरूपिततद्धर्मावच्छिन्नप्र
कारतानवच्छिन्नायातद्धर्मावच्छिन्नविशेष्यतायाः व्यभिचारधीसावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारतानवच्छिन्नज्ञानत्वस्य
त्वमित्यर्थः॥ यथाश्रुतेसमूहालंबनानांवारणात्॥ उक्तज्ञानेतुनप्रतिबंधकस्याव्यतारणात्॥ उक्तज्ञानंतुविरोधित्वे॥ मणिमंत्रादिन्यायेनापिविरोधि
त्वे॥ समानाभावइति॥ अन्वयव्यतिरेकानुविधानस्यासिद्धत्वादितिभावः॥ कदाचित्तुव्याप्तिनिश्चयपरामर्शाद्युक्तरूपव्यभिचारधीविरो
धित्वसंभवेपि व्यतिरेकव्याप्तेस्तत्रासंभवइत्याशयेनाह॥ केवलेति॥ उक्तज्ञानविच्छेदकत्वादिविषयाचोक्तज्ञानेप्रसक्तेत्याशंकितिमा क्
श्र्यः॥ तस्यैकरूपेणैवेति॥ एवंचैकरूपावच्छिन्नज्ञानकतानिवेशेपरस्परावच्छिन्नज्ञानानुमितावव्याप्तिरितिभावः॥ मतांतरमाह॥
नन्विति॥ क्वचिदवेति॥ एतन्मतेऽन्वयव्यतिरेकानुविधानमंगीकृत्यतद्व्यभिचारेपपादनेस्वावच्छिन्नकारणेतुतदंगीकारएवेतिनस्यावतार
णाविशेषशंका॥ तादृशेति॥ व्याप्त्याभावावगाहितयाऽच्छेदप्रतिबंधकतानाम्व्यभिचारज्ञानसंपादकत्वमित्यर्थः॥ कश्चित्विति॥ अन्व
यव्यतिरेकानुविधानस्वेतरद्वेमणिमंत्रादिन्यायेनविरोधित्वेमानंज्ञानांतरकल्पनेगौरवादित्यत्ररसोद्धेयः॥ भ्रमसंशययोरनु
14 गमकरूपाभावेनतदुभयान्यसद्धेतुगतविशेषदर्शनहेतुत्वासंभवादाह॥ अत्रेति॥ तेनेत्यादि॥ वक्ष्यमाणरीत्याह॥ विपरीतंचेति॥

प०टी० नस्त्विति ॥ नाननुगमः ॥ संबंधाननुगमस्यादोषत्वादिति भावः ॥ कार्यतावच्छेदके निर्णयत्वं प्रयोजनमाह ॥ नवेति ॥ तत्संशये ॥ विपरीतज्ञाने त
१४ रसंशये ॥ योग्यतासंशयोत्तरं शाब्दबोधे व्यभिचारवारणाय कार्यतावच्छेदकेऽसत्त्वहानि >प्रवेश= वैयर्थ्यम् ॥ हेतुतामतरसेनेन स्वचितमस्य
रसमाह ॥ तथाप्यापमतद्रसादिनाभिधोसे येरुंतेन ॥ संशयोत्तरं संशये व्यभिचारादाह ॥ तन्निर्णयं प्रतीति ॥ तदभाववज्ञानत्वेनैवेति ॥ एव
कारेण तदभाववन्निर्णयत्वस्य च्छेदकत्वे ॥ ननु तदभाववज्ञानसत्त्वेपि विशेषदर्शनकालेऽसत्त्वे निर्णयोत्पत्त्या व्यभिचार इत्यत आह ॥ नचे
ति ॥ कंठकाग्रहेति ॥ जो हि व्यंजकसामग्रीवत्त्वाप्रमः हेत्वर्थः ॥ तन्निर्णयेति ॥ एतत्पूर्वं व्यंजकमहालोकसमवधानेसतीति अ
लेच व्यभिचारवारणायेति पूरणीयमतो नान्वयः ॥ एवं तन्निर्णयमात्रे ॥ तदभाववज्ञानत्वेन विशेष्यत्वे ॥ यत्स्वमाणपरामर्शव्यक्ते
र्हेतुकत्वमाह ॥ संशयानंतरमिति ॥ बाधनिर्णयेऽनुमितेरनुत्पादात्संशयत्वानुधावनेष्टः ॥ अनुमितिसामग्रीमाह ॥ वह्निव्या
प्येति ॥ एतत्परामर्शजन्यानुमित्युत्पत्तौ सिद्धिसत्त्वेन पक्षताविरहादेव न पुनरनुमित्यापत्तिरित्यत आह ॥ भावीति ॥ बाधनिश्चयो
त्पत्तिकाले परामर्शस्य नाशेन परामर्शाभावेन पुनरनुमित्यापत्तेरसंभवादाह ॥ अपेक्षाबुद्ध्यात्मकृदिति ॥ परामर्शस्य चाक्षुष
त्वेऽचाक्षुषानुमित्सासामान्यगृहमाद्यक्षणमहत्त्वेन तत्त्वानुपपत्तिरित्यत आह ॥ मानसइति ॥ अनुमितेरेवानुसंतौ परामर्शस्य एम
नो तेउकत्वमत आह ॥ तत इति ॥ पर्यवमानुमित्सासत्त्वे सिद्धावप्यामाणपरामर्शसत्त्वेन पुनरनुमित्यापत्ताविष्टापत्तिरित्यत आह ॥ १४

ततइति॥तद्भावव्याप्यवत्ताज्ञानरूपपरामर्शस्यसत्वेपिपर्वतोवह्न्यभाववत्ताज्ञानमितितत्प्रतिबंधकत्वमाह॥लौकिकेति॥अनुमित्सापत्तिरिति॥पूर्वानुमित्स
तुरूपेणलौकिकसंनिकर्षाजन्यतत्परामर्शसत्वेनविशेषदर्शनविरहविशेषणेतद्भावज्ञानाभावादितिभावः॥आलोकसमवधानस्योत्तेजकत्वमाह॥अंधकारस्थे
ति॥घटनिर्णयसामग्रीमाह॥आलोकेति॥घटनिर्णयानुकूलतयालोकसमवधानस्योत्तेजकत्वमतआह॥घटनिर्णयेति॥संशयोत्तरभावेघटनिश्च
यापत्तावित्यापत्तिरतआह॥पुनरिति॥आलोकासमवधानप्रयुक्तसंशयोत्तरसंभवादनुपयोगाच्चाह॥विशेषेति॥विशेषदर्शनसत्वेनिश्चयस्यैवोत्प
त्तेर्विनैवेति॥पूर्वोत्तेजकस्य॥पूर्वोक्तन्नघटविशेष्यानुरोधेनावश्यकव्यक्तीयोत्तेजकताकस्य॥तत्तत्कालेति॥कालोक्षणः॥तेनसत्वेकालमादायनदोषः॥
तद्भावज्ञानत्वेनविरोधितायांनिर्णयस्येवत्वेप्रतिबध्यतावच्छेदकेनिवेशवाधनिश्चयोत्तरसंशयापत्तिरतआह॥तस्यप्रत्यक्षविरोधिताव्यवस्थापकत्वेन
कत्वकालेवाधनिश्चयसत्वेनपुनरनुमित्सापत्तेरभावेनतत्तत्कालावच्छिन्नत्वंविशेषदर्शनेनदेयमित्साशयेनाह॥वाधनिश्चयस्येति॥साक्षात्प्रत्ये
पार्थस्येनविरोधितायामिति॥तुशब्दोऽन्यरसेसचततत्कालावच्छिन्नत्वतत्तल्लौकिकसन्निकर्षजन्यतत्परामर्शोत्तरसंशयेऽव्यभिचारेणोक्त
प्रतिबध्यतायांनिर्णयत्वानिवेशेनस्वातंत्र्येणवाधनिश्चयस्यविरोधित्वेमानाभावइति॥एकस्यविरोधित्वस्याभावेप्यननुगततावच्छेदे
तान्यतमत्वसंबंधेनविपरीतज्ञानत्वेनहेतुत्वसंभवादाह॥किंचेति॥तत्संशयापत्तिः॥निर्णयात्मकघटप्रत्यक्षापत्तिः॥सामाग्रीकगौर
वस्यादोषत्वादाह॥पुरुषांतरेति॥अतिप्रसंगः॥पुरुषांतरीयविशेषदर्शनमादायातिप्रसंगः॥विरोधितस्यविरोध्योपधायकत्वेनाह॥एवमि

15

म०टी०
३५
ति॥ प्रमाणत्वसहेत्वार्थसमाजनकस्यापि कार्यतावच्छेदकत्वमाह॥ किंचेति॥ तद्धेतुत्वे इति॥ विपरीतज्ञानानुत्पत्तेरित्यर्थः॥ सामग्र्यन्तरकल्पने॥ विपरीतज्ञा
नाभावरूपसामग्र्यन्तरकल्पने॥ प्रमाणत्वहेतोर्गौरवं न दोषायेत्यत आह॥ ना नाभावस्येति॥ अन्वयव्यतिरेकाभ्यां विशेषदर्शनहेतुत्वं स्यादित्यत आह॥ ए
वं चेति॥ आपाद्येति॥ एवं च हेतुतामतद्रूपस्य विशेषदर्शनत्वेन हेतुतामतेरित्यर्थः॥ विशेषणप्रयोजनं हेतुत्वस्य युक्तिसिद्धत्वमाह॥ कुचिदिति॥ मै
थिलास्त्वीश्वरज्ञानजन्यतामाहुः प्रमातिप्रसंगवारणाय जन्यतापर्याप्तिविशेष्यकत्वावच्छिन्नत्वनिवेशेन विशेषणज्ञानजन्यतापर्याप्ता तथा॰ त्वो
न न्न दोष इति प्राहुः॥ विशेषदर्शनस्य विपरीतज्ञानविरोधित्वेन हेतुत्वे युक्त्यन्तरमाह॥ अपि चेति॥ तत्कालीनसाऽऽलोकादिसाधारण्येनैव हेतुतासंभवे
हेतुताद्वयं गौरवग्रस्तत्वमाह॥ केचिदिति॥ अंधकारस्थघटसंशयोत्तरजसम्यग्व्यभिचारवारणाय कालीनांतसंशयविशेषणम्॥ तादृशसंशयेति
तद्विषयकसंशयेत्यर्थः॥ एवमग्रेऽपि संशयो भ्रमस्याप्युपलक्षकः॥ बोधः॥ धूमज्ञानजन्यवह्निमत्पर्वतानि भिन्नधर्मव्यापकवह्निमद्भिन्नधूम
वद्भिन्नवह्निव्याप्यधूमसंबंधीपर्वतो वह्निव्याप्यधूमज्ञानजन्यवह्निसंबंधीसाकारको बोधः॥ समनंतरेति॥ स्वप्रमनये वक्तव्यं प्रेमहाह॥ अन्यार्थ
बोधकत्वं इत्यादिति भावः॥ नेति॥ नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति भावः॥ मनु प्रसमानार्थद्वारकप्रकारताप्राह॥ साक्षादिति॥ प्रकारतया॥
साक्षात्प्रकारतया॥ तादृशनिर्णयत्वेन॥ पक्षांशे साक्षात्प्रकारकनिर्णयत्वेन॥ असिद्ध एवेति॥ जातिशब्दादित्वेन साध्यादिबोधकपदे दृढे एम
दृहश्याद्विप्रयोगस्यौचित्यादिति भावः॥ घटत्वादिविशेषधर्मप्रकारकप्रत्यक्षस्यानुपपन्नत्वमाह॥ विशेषेति॥ मानसीति॥ विशेषधर्मप्रकार ३५

करणाद्रजतत्वप्रकारकानुभवसामग्र्याः सत्त्वादिति भावः॥ नावांतरेति॥ खले कपोतन्यायेनैव भ्रमत्वबोधादिति भावः॥ प्रसादयिष्यत इतीति॥ राजपुरप्र
वेशन्यायेनापि शाब्दबोधस्य भ्रमत्वापत्तेरिति भावः॥ पदजन्यत्वस्येतीति॥ न चैवमप्रत्यक्षेऽपीति न्यायेन तादृशनिश्चयपदत्वेन हेतुत्वमस्त्वेनेति वाच्यम्
तादृशनिश्चयपदपर्याप्तावच्छेदकत्वस्य हेतुतावच्छेदकत्वात्॥ कलशादिपदस्याधारणापादाह॥ घटोपस्थापकेति॥ स्वजन्यघटोपस्थितिरिति॥ अत्रस्व
जन्योपस्थितिनिष्ठं विवक्षितं घटनिवेशस्य स्फुटत्वार्थः॥ तेन न चैवमपि साधर्म्येनन शंकायानानुपपत्तिः॥ तथैव॥ उक्तरीत्यैव॥ उद्बोधकविधया
उद्बोधकत्वेन॥ पदज्ञानान्वितत्वेऽपि शिष्यत्वं तृतीयार्थः॥ अनांतरवाक्यार्थबोधपर्यवसितमहावाक्यार्थबोधस्य प्रयोजने आपाततः समारोपरूपत्वासंभवादाह
शाब्दबोधरूपतयापीति॥ आहुरिति॥ उक्तयुक्त्या पदज्ञानजन्यत्वस्यैवानिवेशे पदजन्यत्वमधिकं अविष्टमिति स्फुटितेऽसंगते स्वरसो बोध्यः॥
तादृशप्रत्यक्षेति॥ इदं चदीधितौ तादृशप्रत्यक्षे शाब्दबोधे चेति पाठाभिप्रायेण॥ वह्निव्याप्यधूमवत्पर्वतवानिति शब्दप्रयोगोत्तरं अनुपदं संबंधिबो
धकतया वह्निव्याप्यधूमविशिष्टपर्वतविशिष्टधियोऽसंभवदृष्टांतेनाह॥ तद्धानिनीति॥ तच्छुद्धेनेत्यादिना पौनरुक्त्यमोक्षं स्याह॥ तादृशविशि
ष्टवैशिष्ट्यावगाहीत्यादि॥ तथा च पूर्वं विशिष्य हेतुतामादाय तिव्याप्तिरुक्ते इदानीं तु सामान्यहेतुतामादायेति न पौनरुक्त्यमिति भावः॥ संशयका
ले विशेष्ये विशेषणाभिमतिरीत्या बोधाभावे विनाशादाह॥ यद्वेति॥ लौकिकप्रत्यक्षजनकेंद्रियसंबद्धविशेषणतौ विशिष्टवैशिष्ट्यावगाहि
बोधसत्त्वेन कार्यतावच्छेदकतया लौकिकप्रत्यक्षापत्त्यसंभवादाह॥ मानसेति॥ स्यादितीति॥ बाधाभाववत्त्वादिति भावः॥ तादृशबोधे निरुक्तसं

16

भ०टी०
३६

पयस्य प्रतिबंधकत्वकल्पने नापेक्षास्तीत्याह ॥ अभावइति ॥ कारणादिति ॥ तथा चापादकाभावादेव नापत्तिरिति भावः ॥ तादृशविशिष्टवैशिष्ट्यावगाहि
बोधत्वस्य तादृशाभावबोधाभावकाले संभवेन तावदवच्छेदकत्वेपि न क्षतिरित्याशयेनाह ॥ यत्र तत्रेति ॥ प्रसिद्धमिति ॥ तथा च तादृशबुद्धित्वं प्रति तादृशसं
शयस्य प्रतिबंधकत्वकल्पनान्योन्यापत्तिरिति भावः ॥ प्रतिबंधकत्वाच्चेति ॥ अथैवं तत्र तादृशविशेषणतावच्छेदकप्रकारकनिश्चयत्वेन हेतुत्वेमाना
भावः ॥ विशेषणतावच्छेदकप्रकारकज्ञानत्वेन हेतुत्वादेव निर्विकल्पकोत्तरं तत्रापत्तिकारणसंभवादिति चेन्न ॥ असंतादृशनिश्चयत्वेसादिति प्रमादेवत
ल्लिंदृष्टं ॥ अतएव ॥ विशेष्ये विशेषणमिति विषयतापा विशिष्टवैशिष्ट्यविषयतापत्वादेव ॥ अवृत्त्वाद्रीति ॥ आदिनानुमित्यादिपरिग्रहः ॥
जनकत्वेति ॥ इष्टसाधनताज्ञानपरामर्शादिनिष्ठजनकत्वेसत्वर्थः ॥ तस्यानिश्चितत्वा व्यभिचारकत्वादिति भावः ॥ एकत्रा ॥ उभयसाधारणी ॥ विषयता
द्वयमिति ॥ परस्परविरुद्धमित्यादिः ॥ साधकाभावमुक्त्वा बाधकमप्याह ॥ विशिष्टवैशिष्ट्यबोधेपीति ॥ ननु व्याप्यव्यापकभावापन्नो विषय
तानिष्प्रामाणिका इत्यत आह ॥ अधिकमिति ॥ क्वचित्स्थले कपोतन्यायेन क्वचिच्च राजपुरप्रवेशन्यायेन पदार्थानां भानस्य तत्रापि क्वचिद्विशे
षणतावच्छेदकतया क्वचिच्च विशेष्यतावच्छेदकतया भानस्यानुभवसिद्धत्वात् तासां दुरपह्नवत्वादिति भावः ॥ ननु विशेष्ये विशेषणमिति
विषयतामात्रशालि बोधस्यापि वस्तुगत्या रजतत्वादिविशिष्टरंगादिवैशिष्ट्यावगाहितया तत्र विशेषणतावच्छेदकप्रकारकनिश्चयहेतुतायां रा०म
व्यभिचार इत्यत आह ॥ रजतं रंगं चेति ॥ आलस्यादिति ॥ विशिष्टपर्याप्तेसत्वर्थः ॥ एकत्रा ॥ विशेष्ये विशेषणमिति विषयतामात्रशालि ३६

बोधस्याघृत्ता॥ तथा च तस्या एव तादृशनिश्चयकार्यतावच्छेदकत्वान्न व्यभिचार इति भावः॥ वैज्ञानिकमिति गतत्वं च रक्तत्वादिना ज्ञायमानत्वमग्न्यन्याच
विशेष्ये विशेषणमिति विषयताभावशालिबोधसाधारणी॥ इदं त्वविशिष्टाविच्छिन्नेति॥ इदं च रक्तत्वप्रकारकेऽसंस्पृक्ते रक्तत्वप्रकारकत्वेऽभिव्यम् ल
कारणतावच्छेदकमिति॥ यद्यप्येतादृशनिश्चयत्वस्य कारणतावच्छेदकत्वे मानाभावः॥ न च संशयकाले विशिष्टवैशिष्ट्यबोधापत्तिरेव मानमिति वा
च्यम्॥ संशयकालेपि रक्तदण्डवान्नवेत्यादिसंशयात्मकविशिष्टवैशिष्ट्यबोधे दृष्टापत्तेः॥ निश्चयत्वस्य कार्यतानवच्छेदकत्वेन तद्वच्छिन्नापत्ते
भावात्॥ तथापि संशयकाले रक्तत्वांशे संशयात्मकस्मरणत्वतद्भाववद्दण्डज्ञाने साद्विशिष्टवैशिष्ट्यबोधस्यापत्तेः निश्चयत्वस्य कारणता
ध्रे वच्छेदकत्वमावश्यकम्॥ विशेष्यतावच्छेदकांश इव विशेषणतावच्छेदकांशेऽपि संशयस्यानुभवविरुद्धतया दृष्टापत्तेरसंभवात्॥ अनुभवविरुद्धत
येति॥ यत्त्वनुमित्यादिजनकतावच्छेदकत्वेनैव विशिष्टवैशिष्ट्यविषयतासिद्धिः॥ विशेष्ये विशेषणमिति विषयतायास्तत्त्वे तत्साध्यांशे सं
त्रि शयात्मकपरामर्शसाधारण्येन तदंशे निर्णीतत्वविषयतासाधारण्येन निरुक्तविषयताया एव जनकतावच्छेदकत्वौचित्यादिति नवीनैरुक्तं
तदूषयति॥ यदि चेत्यादिना पूर्वसंशयस्मरणनिबन्धकत्वेन स्यात्कार्यकालवृत्तित्वात्तदुपगमेनोक्तलाघवाभावात्॥ आपि तद्भावव्यत्ययसत्त्वे बुद्धी
न परामर्शे विशिष्टवैशिष्ट्यविषयतासत्त्वेन तस्या जनकतावच्छेदकत्वेऽपि निश्चयत्वनिवेशस्यावश्यकत्वाच्च॥ अत एव परामर्शांशे यदीदि
तिकृत् व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेनानुमितिहेतुत्वादिति वक्ष्यति॥ संदिग्धव्यभिचारकत्वया निरुक्तविषयताया जनकताव

17

भ०टी०
३०

च्छेदकत्वासंभवाच्च लाघवेनातिरिक्तविषयताया जनकतावच्छेदकत्वकल्पनेन नवीनानामेव नतस्य प्रतिबंदिसहस्रकवलितलोकैरुपेक्षितत्वाच्च॥
अथ विकल्पपरामर्शसंपोवस्त्रामसं॥ यद्यपि निरूक्तविषयताया अनुभवसिद्धत्वेपि तत्कालिज्ञाने विशेषणतावच्छेदकप्रकारकज्ञानहेतुत्वे मानाभावः
रक्तत्वनिर्विकल्पकज्ञानस्य रक्तत्वप्रकारकज्ञानेन विशिष्टवैशिष्ट्यबोधजननस्य सर्वसंमतत्वेन कारणविलंबस्य च पञ्चनिर्दीपतयाननिर्विक-
ल्पकेनापि तदभ्युपगमे क्षतिविरहात् तृतीयवदंति॥ तदप्यसत्त्वात् तथाप्युक्तहेतुताभावे आकांक्षाज्ञानादिघटितरक्तदंडवानिसादिशा-
ब्दसामग्र्या भिन्नविषयकप्रत्यक्षादिप्रतिबंधकतायामंशे कं विशेषणविशेष्योपस्थितिद्वयनिवेशे गौरवम्॥ न हेतुतोक्तो दंडइसाधे-
कधानन्निवेशे लाघवमिति तन्नहेतुतासिद्धेर्वलक्षण्यापि वारयितुमशक्यत्वादिति संक्षेपः॥ अधिकमस्मत्कृतभवानंदीप्रकाशेऽनुसंधेयम्
दंडत्वप्रकारकधीत्वेनेति॥ अत्रेदं बोध्यम्॥ विशेषणतावच्छेदकप्रकारकविशेषणनिश्चयत्वमेव जनकतावच्छेदकं न तु विशेषणतावच्छे-
दकप्रकारकनिश्चयत्वमात्रमिति प्राचीनमते ऽत्र विशेषणतावच्छेदकदंडत्वांशे निश्चयत्वानिवेशेपि दंडरूपविशेषणविषयकत्वमवश्यं
निवेशनीयम्॥ अन्यथा विशेषणतावच्छेदकप्रकारकविशेषणज्ञानं विना विशिष्टबोधस्य क्वाप्यदर्शनेनात्र तद्विनापि वैशिष्ट्यवैशिष्ट्य-
बोधापत्तेः॥ प्रकृतग्रंथोपि विशेषणतावच्छेदकांशे निश्चयत्वप्रतिक्षेपपरतया संगमनीयः॥ यदि च विशेषणतावच्छेदकप्रकारक- रम ३०
निश्चयत्वेनैव हेतुत्वं न तु विशेषणस्यापि तदंशेपीति नवीनमतमालंब्यते तदा यथाश्रुतमेव ग्रंथः समीचीन इति॥ अनुभवसिद्ध

स्मृत्यंशे रजतमिदं ज्ञानमवगाहि तस्यास्मृत्यंशप्रकाशो लौहो॥ विशेष्य इति॥ घटत्वविशिष्टेति॥ न च घटत्वविशिष्टस्यैव शाब्दे विषयतासंबंधेनाप्रकारत
या विषयितास्य कथं प्रकारत्वमिति वाच्यम्॥ विषयितास्य हस्तनियामकत्वासंभवेऽपि ज्ञानवच्छेदकत्वेन घटभिन्नाभिन्नपटभिन्नास्यानुरोधेन प्रका
रतायाश्चावश्यकत्वात्॥ अत एवैतादृशज्ञानस्य विषये तद्बोधकद्वितीयान्तं नोल्लिख्य संगच्छते॥ एतदभिप्रायेणैव दीधितिकृतोपाधानप
दमुपात्तम्॥ अन्यथा तद्वैयर्थ्यापत्तेः॥ साक्षात्कारत्वं इच्छालौंशे निर्विकल्पकसाक्षात्कारत्वइच्छालौंशे सविकल्पकस्य विषयांशे सविकल्पके च्छा
लौंशे निर्विकल्पकत्व एवासंभवेन न तत्र व्यभिचारप्रसक्तेः॥ इच्छेति॥ एतदभावे नाभ्युपगमासंभव इति स्वरूपनाशपत्तमादोषापादानम्॥
कथमिति॥ आवश्यकविषयस्मृतेरेव विशेषणतावच्छेदकप्रकारकत्वादिति भावः॥ विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां ज्ञा
नत्वाश्रवेच्छाभावाह॥ तद्विषयकगुणानामिति॥ लाघवादाह प्रकारतयेति॥ उद्बुद्धसंस्कारसत्त्वे आपत्तेरेहग उद्बुद्धेति॥ ज्ञानसेति॥
ज्ञानस्यैवेत्यर्थः॥ तथा च रजतत्वांशे संनिकर्षाभावान्नोक्तापत्तिरिति भावः॥ विशेषणतावच्छेदकप्रकारकसंशयान्यत्वेन हेतुता
न तेन विषयस्य सप्रकारकत्वेनैव प्रसासक्तिरित्याह॥ प्रसासक्तिरेपीति॥ संशयान्यत्वं विहाय संशयाविशिष्टत्वस्यावच्छेदकत्वो
पगमे नोक्तापत्तिरित्याह॥ एवमिति॥ न चेष्टापत्तिः॥ तत्र प्रथमत एव तादृशबोधानुभवात्॥ तत्र घटत्वेनेति॥ तथा चात्र वि
शेषणसामग्र्यभावान्नोक्तापत्तिरिति भावः॥ भवतामपि॥ ज्ञानत्वेन हेतुतावादिनामपि॥ स्मृतिविशेषेति॥ नो द्रव्यबोधहेतुत्वेन॥

18

वस्यकल्पनीयस्मृतिविशेषेसमर्थः॥ गौरवेति॥ अस्मन्मतेचसंस्कारएवेहवनाद्वारणोद्बोधनिवीहान्नतत्कल्पनेतिभावः॥ पुरुषसंनिकर्षदशायामुद्बोधक
समवधानेसप्रकारकत्वेनहेतुतामतेच [illegible] प्रसक्तसाम्यावलंबनान्नस्मृतिसंभवइत्यतआह॥ एवेसाद्वि॥ स्मृतिरिति॥ अत्रस्मृतित्वरूपेणसंनि
कर्षोसन्निरपिबोध्या॥ एतदनंतरंतत्त्वविशिष्टवैशिष्ट्यावगाहिअसक्तमितिपूरणीयम्॥ असक्तमपिकिंअसपि॥ तत्स्मृतेरोसन्नप्रसक्तांमपिकिंअसपि॥
आपिनोभयथासिद्धस्यस्मृतिंप्रतिहेतुत्वस्यसमुच्चयः॥ गौरवमिति॥ संस्कारमात्रप्रयोज्यतादृशबोधेउद्बोधकहेतुत्वेतत्कारीसागौरवाभावेपिस्मृतिप्रयो
ज्यतादृशबोधेतद्धेतुत्वकल्पनेगौरवमितिभावः॥ तादृशप्रसक्तेति॥ संस्कारप्रयोज्यतादृशबोधविशेषसामग्रींविनापुत्रस्थलेतादृशप्रसक्ते
स्यादेनतादृशसामग्रीविरहस्याकिंचित्करत्वादितिभावः॥ पुरुषसंनिकर्षदशायामेवेति॥ तत्कस्यतादृशायामुद्बोधकसमवधानेतत्रस्मृ
तेरुभयसिद्धत्वेनतादृशोद्बोधकहेतुत्वमप्युभयसिद्धमितिज्ञानत्वेनहेतुतामतेवक्ष्यमाणगौरवासंभवइत्यतस्तद्दशायामेवेत्युक्तम्॥ अ
त्रएवकारेणसंनिकर्षोद्बोधकयोःसमनैयत्यंविवक्षितम्॥ तेनसन्निकर्षकालेप्युद्बोधकविरहकालेस्मृतिवारणायतन्मतेतद्धेतु
तावश्यकत्वेनसन्निकर्षाभावकालइत्यर्थइतिशंकायाअनवकाशः॥ सन्निकर्षकालेउद्बोधकविरहासंभवात्॥ तादृशसन्निकर्षाभाव
कालइति॥ नचसप्रकारकत्वेनहेतुतामतेप्येतत्तुल्यमितिवाच्यम्॥ तन्मतेतत्रउद्बोधकांतरस्यस्मृतिविशेषसामग्रीविरहादेवस्मृतिवा रम
रणात्॥ ज्ञानत्वेनहेतुतामतेतत्स्थलेस्मृतिंविनाप्रसक्त्यसंभवेनतादृशविशेषसामग्रींविनापितादृशसमूहसत्त्वात्तादृशविशेषा १८

सामग्रीविरहस्य। किंचिज्जनकतया तादृशस्य स्मृत्यादेर्विशेषसामग्र्यंतरस्यावश्यकतया तद्धेतुत्वावश्यकत्वात्। तुल्यत्वादिति। तथा च ज्ञानत्वेन हेतुतामते
पि स्थूलविशेषगौरवसत्वेन सप्रकारकत्वेन हेतुतामते न पूर्वोक्तगौरवस्य दोषत्वमिति भावः॥ अथैवमप्यनुद्बुद्धसंस्कारदशायां सामान्यसामग्रीबला
द्विशिष्टवैशिष्ट्यबोधापत्तिर्दुर्वारैव॥ संस्कारप्रयोज्यविशिष्टवैशिष्ट्यबोधस्थले विशेषसामग्रीं विनापि फलोत्पादेन तद्विरहस्यापि किंचिज्जनकत्वादि
ति चेन्न॥ एतद्दोषभयेनापि ज्ञानत्वेन हेतुत्वस्यावश्यकतया अतिव्याप्तेर्दुर्वारत्वं विभाव्य व्याप्यविषयकत्वेन उपस्थितज्ञानं विशेषणीयमिति सम्यग्वक्ष्यमाण
त्वात्॥ अत एव॥ उद्बोधकानां तत्तद्व्यक्तित्वेन प्रत्यासत्तिहेतुत्वादेव॥ न चास्य संस्कार एवोद्बुद्धत्वात् संस्कार एव एवकारेण तस्य निमित्तच्छेदः॥ हेतुरिति॥
अन्यथानुद्बुद्धसंस्कारादुपनीतभानापत्तौ ज्ञानत्वेनैवोपनायकत्वे संस्कारस्य तद्धेतुत्वासंभवादिति भावः॥ मणिकारमते त्विति। उक्तापत्ति
ज्ञानत्वेनैवोपनायकत्वेनोद्बुद्धसंस्कारादप्युपनीतभानासंभवेन ततः स्मरणोत्पादेन क्षणविलंबेनैवोपनीतभाननिर्वाह इति मणिकाराश
यः॥ तुशब्दोऽस्वरससूचकः॥ सोऽरूपसभावेन क्षणविलंबे मानाभाव इति॥ ज्ञानत्वेनैव॥ तद्व्यक्तित्वधर्मेणैव॥ एवमग्रेऽपि गवत्वं कुतः संशयात्
त्वादेरप्यवच्छेदकत्वेनैव कारणत्वोपपत्तेः॥ तादृशेति॥ लाघविक इति॥ अन्ययोपनीतभानानंतरमपि तादृशानुव्यवसायः स्यादिति भावः॥ अवच्छे
दक इति॥ संसर्गतयेत्यादि॥ तेन नाग्रिमग्रंथविरोधः॥ उक्तानुव्यवसायसाक्षिकं विषयतामात्रमेव लौकिकसंनिकर्षजन्यज्ञानस्य हेतुत्वाच्च ना
क्रि२ तिप्रसंग इत आह॥ यद्भावादि॥ लौकिकसंनिकर्षजन्यज्ञानुपस्थितिकालेऽपि सौरभं न पश्यामीति ज्ञानोत्पत्त्या तादृशसंनिकर्षजन्य

19

म०टी० ज्ञानाभावस्य तद्विषयत्वासंभवादिति भावः॥ तादृश्यविषयतयेति॥ अननुगतत्वेन प्रकारतयावच्छेदकत्वं न संभवतीति भावः॥ तेनेति॥ परमाण्व
२९ एवादीनां लौकिकप्रत्यक्षे वारणाय महत्त्वोद्भूतरूपादीनामनेककारणत्वापेक्षया विषयत्वेनैककारणत्वलघुत्वमिति भावः॥ ज्ञेयत्वादिति॥ टी २
ज्ञेयत्वं च स्वाश्रयविषयत्वसंबंधेन ज्ञानत्वमतो नानुगमः॥ विषयाजन्यतेति॥ हेतुगर्भं विशेषणम्॥ ज्ञानिकोपनीतभानस्य किंचिद्देश विषय
जन्यत्वेन संग्राह्यत्वादाह॥ सर्वथेति॥ सर्वत्र॥ सकलसर्वज्ञोपनीतभाने॥ उपनीतं विशेषणं तथैवेति नियमेन तस्य मानसज्ञानियमादिति भा
वः॥ कामिनीजिज्ञासादीति॥ आदिना स्वेतरज्ञोजिज्ञासापरिग्रहः॥ तेन प्रतिबंधकसत्वे नान्येतरविषयकत्वासंभवोपि निरस्तः॥ वस्तुतस्तु
कामिनीजिज्ञासादिरूपस्यैव सर्वज्ञोपनीतभानस्य संभव इति ध्येयम्॥ न व्यभिचार इति॥ तादृशविषयतायाः कार्यतावच्छेदकसंबंधत्वे
ज्ञानिकोपनीतभानेन व्यभिचारः॥ तादात्म्यस्य हेतुतावच्छेदकत्वाच्च नातिप्रसंगस्तेन व्यभिचार इति भावः॥ न चोत्कटीसाविषयस्य हेतुत्वे मह
त्त्वोद्भूतरूपयोर्हेतुत्वस्य तत्रोक्तिसंगतेव स्यादिति वाच्यम्॥ स्वतंत्रान्वयव्यतिरेकानुविधानेन तद्धेतुत्वसिद्धावपि नत्वसंगमात्॥ वस्तुतस्तु तादृ
शानुविधानस्यासिद्धतया तद्धेतुत्वमसामान्यरूपमेवेति ध्येयम्॥ अत्रेदं बोध्यम्॥ विषयत्वेन हेतुत्वेपि परमाण्वादीनां विषयत्वमेव कुतो
नास्तीति प्रश्ने योग्यसंनिकर्ष एव प्रत्यक्षजनकः॥ योग्यत्वं च महत्त्वोद्भूतरूपवत्त्वगुरुत्वादिभिन्नत्वरूपम्॥ तथा च प्रत्यक्षे हेतुयोग्यसंनि गुम
कर्षाभावान्नोक्तरूपं विषयत्वमित्येवोत्तरम्॥ एवं च तत एव परमाण्वादीनां प्रत्यक्षवारणे विषयत्वेन हेतुत्वस्मानाभावः॥ अत एव प २९

स्वपरम्परिश्रेरपियोग्यसंनिकर्ष एव ग्राहकौ न तु सन्निकर्षमात्रमिति सूक्ष्मपरिच्छेदेन क्रमः॥ समवायेनानात्वे चक्षुस्तत्र यस्य॥ महत्त्वोद्भूतरूपस
मानाधिकरणसमवाये न च क्षत्यः संयोगः स्वरूपादिसमवायघटितश्चक्षुःसंयुक्तसमवायादिरूपसन्निकर्षहेतुतादिव परमाणवादीनां स्वस्व
वारणम्॥ विषयत्वेनियामकतया तस्यावश्याभ्युपेयत्वादिति॥ अतीति व्यासीति॥ अवच्छेदकतापर्याप्तिघटितलक्षणानि व्याप्तौ सर्वथा॥
अत एव॥ अप्रामाण्यज्ञानाभावस्य स्वातन्त्र्येण हेतुत्वादेव॥ न क्षतिः॥ न विनिगमनाविरहश्च पुनः क्षतिः॥ क्षसभावमेवोपपादयति॥ आ
दृश्येति॥ नन्ववच्छेदकतापर्याप्तिः अप्रामाण्यज्ञानाभावस्य कारणतावच्छेदकत्वेऽपि न क्षतिरत आह॥ अन्यथेति॥ तस्यावच्छेद
कत्वे सर्वथा॥ तत्स्वरूपेयेति॥ तत्कालीनेत्यपि दूषणम्॥ अनंतेति॥ कालपुरुषभेदेनेत्यादि॥ न च स्वविशेष्यत्वसामानाधिकरण्यो
भयसंबन्धावच्छिन्नप्रतियोगिताकाप्रामाण्यज्ञानाभावस्यावच्छेदकत्वेनापदोष इति वाच्यम्॥ तस्य नियामकसंबन्धस्य प्रतियोगितानवच्छे
दकत्वेन तथा वक्तुमशक्यत्वात्॥ अलं कौ चेनैवोपपत्तौ संकोचस्यान्याय्यत्वमित्यस्वरसात् आह॥ कृप्त्यादीति॥ अत्रेदं बोध्यम्॥ अप्रामाण्यज्ञा
नास्कन्दितत्वेन स्फुरति जनकतस्यानुभवविरुद्धतया अप्रामाण्यज्ञानास्कन्दितत्वं स्फुरति जनकतावच्छेदकमपीति स्यादिति स्वघटेव॥ एतेना
नुमितिजनकतायामनाहार्यत्वनिवेशपक्षं चोनिविष्टं न स्फुरति जनकतायामाहार्यत्वसंशयाद्यस्फुरत्वादिति व्याप्ति दुर्घटैव स्यान्निरस ८२
स्तम्॥ आहार्यत्वसंशयाद्येस्फुटत्वे नतु भेदेन तज्जनकतायामप्यनाहार्यत्वनिवेशस्यावश्यकत्वात्॥ दीधितौ संकरेति॥ तद्दूषक

20

भ०टी०
२०

तावीजं च देवदत्तादिप्रभवतावच्छेदकवैजात्यानां देवदत्तीयत्वानुमापकत्वानुपपत्तिरित्यादिकं द्रष्टव्यम् आस्वाद्याम् ॥ तद्रूपावच्छिन्नात्मत्व
त्तिनिरूपकजनकत्वाजिज्ञासितविषयतावच्छिन्नत्वात् तद्रूपावच्छिन्नं च सिद्धार्थज्ञानमिष्टवियोगज्ञानं वोध्यम् ॥ तत्रावच्छिन्नेति ॥ उपेक्षात्मक
त्तेनेत्यादि ॥ स्मरणमेव ॥ संस्कारजनकत्वज्ञानं विनापि ग्रहीतुं शक्यमेव ॥ तथा च नान्योन्याश्रय इति भावः ॥ एतेनानोपेक्षात्मकस्मर
णोत्पत्तौ चोपेक्षात्मकस्येत्यादिना दुर्ग्रहत्वोक्त्या पूर्वापरविरोधोद्भावनं परास्तम् ॥ अन्योन्याश्रयं पूर्वपक्षोक्तस्मरणहेतुत्वस्य मात्र दुर्ग्रहत्वे
नोक्तविरोधात् ॥ अत एव ॥ उपेक्षात्मकस्य विषयविशेषनियंत्रितत्वादेव ॥ संस्कारं प्रति तद्व्यक्तित्वे विरहो नियतत्वेनोपेक्षाज्ञानस्याजनकत्वं
हेतुत्वं साधारणरूपेण हेतुत्वं चोपेक्षास्वन्योन्याश्रयवारणसंभवतीति तत्र संस्कारं दूषयति ॥ न चेति ॥ कोपि दोष इति भावः ॥ अतिव्याप्तिरूपदो
षः ॥ उपेक्षान्यत्वाप्रवेशादिति ॥ तथा चोपेक्षाव्यावृत्तत्वावच्छिन्नत्वेन संस्कारजनकत्वेनोपेक्षाज्ञानात् संस्काराभावेनास्मरणोपपत्तौ
स्मृतिजनकतायामुपेक्षान्यनिवेशाभावेन स्मरणातिव्याप्तिर्दुर्वारैवेति भावः ॥ तत्त्वेन ॥ तत्तद्व्यक्तित्वेन ॥ तुल्यन्यायतयेति ॥ संशयस्मृ
तेः संस्कारादिकल्पनेगौरवेण संस्कारजत्वेन निश्चयत्वेन हेतुत्वस्यैवोचितत्वादिति भावः ॥ नेति ॥ तथा च नातिव्याप्तिरिति भावः ॥ अ
न्यथा ॥ असंताडनकसाधारणरूपेण हेतुत्वे ॥ ज्ञानत्वेनैव ॥ एवकारेणाविषयत्वव्यवच्छेदः ॥ हेतुता ॥ स्मृतिं प्रति हेतुता ॥ संस्कारेति ॥ तद्वि
षयकसंस्कारे सत्यर्थः ॥ स्मरणाभावः ॥ तद्विषयकस्मरणाभावः ॥ इत्यपीति ॥ ज्ञाननिष्ठसंस्कारजनकतायां संस्कारनिष्ठस्मृतिजनक

एम
२०

तासां च विषयनिवेशेनैवोपपत्तौ ज्ञाननिष्ठस्मृतिजनकतायां तन्निवेशो नातिव्याप्त्यापादकत्वमेवासंगतं स्यादिति भावः॥ उद्दीयतादिति॥ अत
त्वपूर्वमसंताजनकव्यावृत्तत्वे संभवतीत्युक्तमिति भावः॥ विरोधसंबंधेनेति॥ ततो पार्थोऽवच्छिन्नहेतुघटत्वाभावप्रकारतायामन्वितत्वात्॥ संश्लेषेणे
त्वमेनोभयत्वेऽदोषो वापि विरोधः॥ संसर्गतया भासत इत्याशयेनेदं ते न न कोऽपि दोषः॥ स्मृतिजनकतायां नि[illegible]प्रतिनिवेशेऽप्युपपत्तेरसलुक्
स्यचिन्मतं दूषयितुमुपन्यस्यति॥ यद्वेति॥ संशयपक्षे संस्कारवृत्त्या गौरवेण तज्जनकतायामेव निश्चयत्वनिवेश्यतामत आह॥ अ
न्यथेति॥ संस्कारजनकतायां निश्चयत्वनिवेश इत्यर्थः॥ केवलधर्मीति॥ तथा च केवलधर्मिस्मरणानुरोधेन संस्कारस्यावश्यकतया
न गौरवमिति भावः॥ निवेश्यतइति॥ तथा च नातिव्याप्त्यसंगतिरिति भावः॥ न तु केवलधर्मिस्मरणानुपपत्तिसिद्धं संस्कारं प्रति संश
यसाधारणं हेतुत्वमेव संस्कारस्य धर्मितावच्छेदकावच्छेदेन घटत्वप्रकारकत्वकल्पनेमानमसंताजनकेत्यादिनि[illegible]यमस्य नाभ्युप
गतइत्यत आह॥ अन्यथेति॥ तादृशनियमानभ्युपगम इत्यर्थः॥ इसेवेति॥ एवं कारेणोत्प्रकारत्वावच्छेदः॥ किंनस्यादिति॥ तथा चेदं त्वाव
च्छेदेन घटत्वप्रकारकसंस्कारकल्पनलाघवेन संस्कारजनकतायां निश्चयत्वनिवेशेनैव तथात्वस्मृतिवारणे स्मृतिजनकतायां तस्य वि
षयस्य वा निवेशे नातिव्याप्त्यसंगतिरेवस्यादिति भावः॥ असंतेत्यादिन्यायाभ्युपगमे न स्मृतिजनकतायां तन्निवेशे तु मदुक्तपक्षा
भिद्दएवेत्याशयः॥ केवलधर्मिस्मरणानुपपत्तेरेव संस्कारजनकतायां निश्चयत्वनिवेशासंभव इत्यत आह॥ अुदेत्यादि॥ सर्वसंमत
त्वपेक्षात्तौ संस्कारादिकारणाद्यपेक्षाज्ञानानां तत्र व्यक्तित्वेन संस्कारं प्रति प्रतिवंधकत्वेऽन्वीक्षिपते सर्वोऽप्यपेक्षाज्ञानस्य प्रतिबध्यतावच्छेदकं संस्कारत्वं आपि कोपे
क्षाज्ञानस्य तद्विषयकसंस्कारत्वमतो नाधिकताना द्विषयान्तरसंस्कारानुत्पत्तिप्रसंग इति

प्र०टी० २१ त्वेनैवेति ॥ घटत्वाद्यप्रकारकस्मृतौ धर्मितावच्छेदकप्रकारकधर्मिज्ञानस्य हेतुत्वे तु ... प्रकारेणानिर्वाहादिति भावः ॥ प्रकारनिष्ठप्रत्यासत्त्या हेतु-
त्वे प्रकाराणि निवेशे प्रयुक्तलाघवमभिप्रेत्याह ॥ सप्रकारकेति ॥ प्रकारतायाः संबंधत्वेप्यजनकसाधारण्यवारणाय सप्रकारकत्वनिवेशः ॥
॥ वं जन्यत्वानिवेशेपि अजनकसाधारण्यवारणायाह ॥ सप्रकारकेति ॥ हेत्वादिति ॥ संस्कारस्य सविषयकत्वाभावेनैकविषयकज्ञा-
नोत्पादकविषयकसंस्कारस्याप्रसिद्ध्यासंभवादिति भावः ॥ नातिप्रसंगः ॥ नोपेक्षात्मकज्ञानात्संस्कारापत्तिः ॥ संस्कारद्वारेण ॥ स्वजन्यसंस्का-
रसंबंधेन ॥ नातिप्रसंगः ॥ न संस्कारपतनस्मरणापत्तिश्च नवापटादिज्ञानात्घटादिस्मृत्यापत्तिः ॥ नहीति ॥ निर्धर्मितावच्छेदकसंब-
न्धाभावादिति भावः ॥ सविशेष्यकत्वस्य वस्तुतः सप्रकारकत्वमुपपादयति ॥ एवमिति ॥ एवं च सादृश्ये पदसंसर्गे क्रमं यथा ॥ स्मृ-
तित्वेनैव संस्कारत्वेनैवेत्यपि द्रष्टव्यम् ॥ एतत्कल्प्ये ॥ संस्कारस्य विशिष्यहेतुत्वकल्प्ये ॥ विशेषरूपेणापि ॥ विशेषरूपेण कार्य-
कारणभावेपि ॥ इति तु पुरुषधौरेयाः इति ॥ अयं तु स्मरणातिव्याप्तिवारणमार्गो ह्युपेक्षितः कृतद्वारेणभावात्समीचीनश्चरमज्ञानप-
दस्यानुभवपरत्वाभावेन लाघवादिति भावः ॥ न तु संस्कारस्य विशेषहेतुतया ज्ञानस्य विशेषहेतुतानिरासोऽसंगतः ॥ उपेक्षा-
त्वविशेषादिति नैयायिकमतम् ॥ तदसत् ॥ ज्ञानहेतुकस्यावबोधेनोपेक्षात्वबाधात्मकोपेक्षात्वविशेषस्याभावात् ॥ अस्य हेतुरनुभवेन ॥ राम
स्मरणोत्तरं पुनरनुभवेन ॥ एतत्संस्कारेति ॥ पुनरनुभवजन्यसंस्कारे सत्येव ॥ संभवतीति ॥ तथा च न स्मरणोत्तरमस्मरणापत्तिः २१

गइति भावः॥ समानाकारस्येति॥ नचैवं घटपटगोचरस्यैकसंस्कारद्वयस्य तदुभयसमूहालंबनस्मरणनाश्यत्वेन स्यादिति वाच्यम्॥ अन्यूनाकार
स्वरूपसमानाकारत्वस्याभिप्रेतत्वात् तत्स्मृतीति॥ घटादिविषयकस्मृतीत्यर्थः॥ एवमग्रेपि॥ इदं च परिचायकम्॥ ननु संबंधानिविष्टैकस्
पजनकतायाः अन्यसंबंधघटिताभावेनैवादोषात्॥ अस्मत्सन्निरिति॥ तथा चैकप्रतियोगिता संबंधेन तद्विषयकसंस्कारनाश्यजनकता संबंधेन तद्वि
षयकस्मृतेर्हेतुत्वमिति भावः॥ जनकत्वं चोपधायकत्वं तेन स्मृतिजन्यसंस्कारस्य स्वजनकस्मृतिस्वरूपयोग्यत्वेपि न क्षतिः॥ अनाश्यत्वेति॥
शब्दमस्येव द्वितीयस्याप्यसमानाकारत्वादिति भावः॥ कारणांतरादेवा॥ कालादेरेव॥ नाशकत्वमिति॥ कालादिजन्यनाशजनकत्वं प्रतियोगिवि
धया संस्कारस्येति भावः॥ नाश्यत्वमिति पाठस्तु क्रमएव॥ नाशकत्वकल्पने च॥ फलनाशकत्वकल्पने च॥ चरमफलमेव यदुत्तरं न समा
नविषयकस्मरणांतरं तादृशस्मृतिरूपमेव नाशकमिति॥ तच्छिन्नत्वेनेत्यादि॥ अक्षितिति॥ तथा चानुभवत्वेन हेतुत्वेपि न स्मरणे चरमस्म
रणप्रसंग इति भावः॥ लाघवेति हाह॥ वस्तुतस्त्विति॥ अनन्यगतिकत्वात्॥ अनुगतजनकतावच्छेदकासंभवात्॥ स्मृतौ तु॥ समानाकारसं
स्कारजन्यस्मृतौ च॥ संस्कारेति॥ समानाकारसंस्कारेत्यर्थः॥ चरमेति॥ समानाकारतत्तद्ज्ञानजन्यसंस्कारजन्यस्मृतिषु या चरमस्मृति
स्तन्मात्रवृत्तिरित्यर्थः॥ कल्प्यत इति॥ समूहालंबनभिन्नसमानाकारस्मृतेरेव नाशकत्वाभ्युपगमाच्च न सांकर्यमिति भावः॥ चरमत्वस्य
३२ दुर्वचतया चतसृरित्याशयः॥ विजातीयस्मृतिविशिष्टेति॥ कालादिजन्यसंस्कारनाशे व्यभिचारवारणायेदं संस्कारविशेषणम्॥

भ०टी० अत एव वा विजातीयस्यैव विशेषणत्वाद्वा॥ विजातीयस्य विलम्बेति॥ न चानुभवत्वेन हेतुत्वे स्मृतेः संस्कारजनकत्वादसंगतिरिति वाच्यम् अगत्या
२२ नत्वेन हेतुत्ववादिनोपि तत्र स्मृतिजन्यसंस्कारस्य क्षणिकत्ववारणाय लाघवेनैकधारानिवेशस्य मुचितत्वानवतत्स्मृतिजनकत्वं नाश्यतापांशसा
मग्रिरित्यावयोरेतद्दोषसाम्यमिति साभाष्यताम्॥ कालान्तरे विजातीयस्य स्वरूपयोग्यकत्वादि॥ उपधायकतासंबंधेन कालान्तरीयविजातीयस्य
स्वरूपलक्षितस्यापि॥ उक्तस्यैव॥ उपधायकतासंबंधेन विजातीयस्मृतिविशिष्टत्वस्यैव॥ अनतिप्रसक्तत्वात्॥ स्मृतिजन्यसंस्कारस्यापि न
त्वात्॥ पुनःपुनः स्मरणमेवेति॥ तथा च तादृशस्मरणजन्यदृढतरसंस्कारेण जन्यप्रतिस्मरणे च व्यभिचार इत्यनुभवत्वेन हेतुत्वमि
ति भावः॥ अत एव॥ पूर्वपूर्वस्मरणसंस्कारद्वारा दृढतरसंस्कारहेतुत्वादेव गतत्वस्मृतीनां तेन हेतुत्वमङ्गीकुर्वतां मतमाह॥ स्मृति
निष्ठत्वेति॥ जातिविशिष्टेति॥ तथा च पुनःपुनः स्मरणानां जातिरेवेति भावः॥ जातिविशेषाङ्गीकारेप्युक्तानुगमपरिहाराय तद्वृ
त्तिजन्यत्वेनाप्रतिपन्नस्मृतीनां तत्त्वेन हेतुत्वमावश्यकमेवेत्यस्वरसादाह॥ कश्चिदिति॥ तादृशजातौ दृढतरत्वे॥ मानाभाव इति॥ तथा चानुभ
वत्वेन हेतुत्वे न दोष इति भावः॥ तदवच्छेदेनैव॥ ज्ञानत्वावच्छेदेनैव॥ पक्षधर्मवत्त्वेन सत्त्वानुमितित्वापत्त्या शिवत्वपक्षानिश्चयत्वेन हेतुत्वं न स्या
त् ज्ञानत्वस्य त्वनुमितित्वसंदेहेनं तस्य संदिग्धव्यभिचारकत्वयानिश्चितव्यभिचारकेण व्याप्यतावच्छेदकत्वासम्भवात् पक्षधर्मताज्ञानत्वेनैवा सम
नुमितिहेतुत्वस्य युक्तत्वात्॥ तथापि लाघवसत्त्वे संदिग्धव्यभिचारकेणापि स्वेन कारणत्वं कल्प्यते लाघवज्ञानस्योत्तेजकत्वया व्यभिचा २२

रशंकापाठप्रतिबंधकत्वासंभवात्॥ एवं च व्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वमित्यशंकाबीजं॥ यत्र तु कालीनत्वनत्वस्फुरणी
यगत्वप्रमाणव्याप्यवच्छेदकधर्मप्रकारकपक्षधर्मताज्ञानत्वेनैव हेतुत्वं वाच्यमिति गौरवं तत्र परामर्शप्राप्यवत्पक्ष। निश्चयत्वेन हेतुतायां लाघवं र
स्फुटमेव॥ न चैवं स्मृतिजन्यानंतसंस्कारकल्पनप्रयुक्तलाघवसत्त्वेनानुभवत्वस्य संस्कारध्वंसाभिचारकत्वेपि तेन रूपेण हेतुत्वं निर्युक्तमिति
वाच्यम्॥ तादृशसंस्कारकल्पनस्य फलमुखत्वेनादोषत्वादिति दिक्॥ विशिष्टानुभवत्वमिति॥ विशिष्टज्ञानत्वस्य संस्कारध्वंसाभिचा
रकत्वादिति भावः॥ अप्रसिद्धं तदिति॥ संस्कारस्य स्मृतिजन्यत्वे इत्यादिः॥ तत्र तु॥ ज्ञानं तत्र स्यत्र विशेषगुणमुद्रया कल्पनः॥ तद्धीना
मिति॥ स्वजन्यसंस्कारनाश्यानामिति भावः॥ अनुभवपरत्वादिति॥ ननु हेतुतायाः संबंधभेदेन भिन्नतया समवायसंबंधावच्छिन्न
हेतुतानिवेशेनैव स्वजन्यसंस्कारसंबंधेन प्राप्यवत्प्रत्यक्षनिश्चयजन्मायां स्मृतावतिव्याप्तिवारणसंभवे चरमज्ञानपदस्यानुभव
परत्वमफलमिति चेन्न॥ परामर्शस्यानुमितौ समवायेन विषयनिष्ठप्रत्यासत्त्या वा हेतुत्वमिति संदेहेन तदुभयसाधारण्येन हेतु
तानिवेशस्यावश्यकतया समवायसंबंधावच्छिन्नहेतुतानिवेशासंभवात्॥ अत एव परामर्शानुप्रवेशायेति व्याख्यानंतरमपि सं
गच्छते॥ अन्यथा तत्परामर्शहेतुतायास्तादात्म्यसंबंधावच्छिन्नतया तत्संगत्यापत्तेः॥ न च हेतुतायाः संबंधभेदेन भिन्नतया अ
नुगमकरूपाभावेन च साधारण्येन निवेशासंभव इति वाच्यम्॥ कारणतात्वस्यानुगमकत्वात्॥ स्वावच्छिन्नत्वसंबंधेन व्याप्यव

23

व्यवधानेना२

म०दी० २३ सत्त्वनिश्चयत्वस्यानुमितिमिकत्वासंभवाच्च।। अन्यथासंबंधभेदेनैवकार्यतावच्छेदकभेदेनापितस्याभिन्नत्वयानुमितित्वावच्छिन्नकार्यताघटितत्वविवे
शेन चभ्रमसंशयोत्तरेसाद्दिग्धं येन[illegible] तत्र तत्रातिव्याप्त्यापत्तेः नस्या तदुक्तस्य तस्यासंगतापत्ते रिति संक्षेपः।। इति वं धक सहेतोरनुमित्सा
-द्दीधितिकृतो-घसंभवात्‌ह।। द्विवसादिविलंबइति।। नश्यतीति।। न संभ्रमात्स्मरस्यापत्तिः।। तथा च चरमज्ञानपदस्यानुभवपरत्वं विनेवातिव्या
प्तिवारणं संभवतीतिभावः।। नाश्यत इति।। तथा चोक्तरीत्या संस्कारद्वय मिलनासंभवेन संशयस्मरणस्यापत्त्यभावेनो क्तविवृध्येतिवंधक
भावे मानाभावइत्याशयः।। तादृशेति।। विरोधिविषयकज्ञानस्य स्वज्ञतिवध्य ज्ञानजन्यसंस्कारमात्रनाशकत्वादितिभावः।। असंवाजनकेति।। ना
ल पेनोभयत्र निश्चयनिवेशस्यावश्यकत्वमित्यस्यरस्यादाहच्चाहुरिति।। स्वाव्यवहितेति।। नचैतादृशपरामर्शजन्यत्वस्यानुमितावभावेनासंभवइ
तिवाच्यम्।। व्याप्यताया अस्य सत्वावच्छिन्नहेतुताकस्य स्वाव्यवहितत्व ज्ञानकालवृत्तित्वाभावेन तदुक्तिसंभवात् व्याप्यताया अस्यास्य न वच्छिन्नहेतुत्वविवक्षणे
तात्पर्यात्‌।। सिद्ध्यादीति।। एतच्चपरामर्शद्वितीयक्षणेप्रसक्तानिवाहाय।। अन्यथापिजेविषयेऽनुमिति[illegible]याभग्नावलवलेन तद्दृष्टसंभवात्‌
अत्र सिद्धिविनश्यद्वस्थ सिद्ध्यादिकालीनायसेत्यर्थः।। अन्यथानुमितेरसंभवेनातिव्याप्त्यसंगतेः।। अतएवाह।। धर्म्मवरइति।। तस्मि
न्नेवधर्मिणिपक्षेऽनुमितेरसंभवात्‌।। ननु चिह्नितिद्व्याद्विनाशकालीनेतिपाठस्तत्र स्थित्सिद्ध्यादिनाशकालीनेत्यर्थः।। वह्नित्वादीति।। आदि यजितएष
ना [illegible]वह्निपरिग्रहः।। नाव्याप्तिरिति।। अन्यथा तज्ज्ञाप्याऽन्यत्वरूपसाध्यान्तज्ञान्यत्वाभावेनाव्याप्तिः स्यादितिभावः।। वह्नीति।। अत्रा २३

पियापारभसासमनवच्छिन्नहेतुताभावेतात्पर्यमुक्तपुत्रेऽथग्राह्यकासंतरेणापीतिगचरमज्ञानपदस्यानुभवपरत्वंविनैवेत्यादिष्ठाव्याप्तिप्रकारेणेतिगमना
धेयतावच्छेदकावगाहित्वप्रकारेणतावच्छेदकहेतदनवगाहिनोहेतुतावच्छेदकमुद्दिश्यसंयोगादिनापक्षेहेत्ववगाहित्वानादनुमितिस्तनापत्तिरितिचेन्न॥ अत्रमूलम्॥
हेत्वनिष्ठामहसंबंधस्यसाध्यतावच्छेदकत्वमनभ्युपगच्छतांप्राचांमते आधारतैवेत्येवाभावगर्भस्यहेतुसामानाधिकरण्यस्यव्याप्तिघटकतयाहेतुनिरूपिताधार
ताघवगाहित्वियएवानुमितिजनकतयासर्वआधेयताधारताव्यतएवच्छिन्नसंयोगादिरेवहेतुतावच्छेदकसंबंधतास्युपगमात्॥ नैवंचिन्तुसर्वत्रसंयोगाघव
च्छिन्नाधेयताधारत्वाव्यतरस्यैवहेतुतावच्छेदकसंबंधताभ्युपगमात्॥ नोक्तदोषइतिवदन्तिगतन्निंसम्यक्॥ संयोगादिनासाध्यतायोहेतुयामितापनेकरंथ
स्यसाध्यतावच्छेदकसंबंधसामान्यरसादिप्रतियोगिवेयधिकरण्यनिरुक्तोप्रत्यसंयोगइत्याद्यभिमरीचितिरंगस्यचासंगतेष्ठ॥ संसर्गमर्यादयोभय
विशिष्टावगाहित्वविवक्षणेनसमेयमितिज्ञानधारणा[illegible]दाह॥ साध्येपर्वतइति॥ इत्यादेरिति॥ आदिनापर्वतवान्[illegible]व्याप्यइत्यस्यपरिग्रहः॥
अदोषइति॥ आधेयतानवगाहित्वेनिवेशेपक्षविशेष्यकपक्षधर्मतासंग्रहस्वस्याधेयतानवगाहित्वात्॥ आधेयतानवगाहित्वात् आधारत्वावगाहित्वेनिवे
शेव्याप्यविशेष्यकपक्षधर्मतासंग्रहस्तस्याधेयतावगाहित्वेनाधारतानवगाहित्वात्॥ तयोश्चसमानसंवित्संवेद्यहेतुकोक्तदोषइतिभावः॥ समानसं
वित्संवेद्यत्वेमानाभावादाह॥ कालीत्यादि॥ अन्यतरत्वमेवेति॥ नचतादृशावगाहित्वस्यहेतुतमानदन्यतरत्वस्यहेतुतावच्छेदकत्वाभावादृशं
नातैमन्तदितिवाच्यम्॥ विषयतायाज्ञानस्वरूपत्वेन तादृशावगाहित्वान्यतरत्वस्यतदवगाहित्वानान्यतरत्वरूपत्वात् अन्यतरत्वेनतदवगाहि
त्वान्यतरत्वस्यहेतुतावच्छेदकत्वेतदवच्छेदकस्यान्यतरत्वस्यहेतुतावच्छेदक[illegible]कोटिप्रविष्टस्वरूपहेतुतावच्छेदकत्वसंभवाच्च॥ अन्यतरत्वे

भ०टी० तिपाठस्तस्यागमएवाग यत्तु द्विविधपरामर्शस्योक्तरूपेणैव हेतुत्वेऽसामान्यज्ञानद्वयाभावस्यैकत्रानिवेशात्पक्षसाध्यैकविधाऽसामान्यप्रग्रहस्य हेत्वस्य
२४ विधपरामर्शाद्दनुमित्यनुदयप्रसंग४॥ एवं निर्णयघटितद्वयस्यैकत्रानिवेशात्पक्षसाध्यैकनिर्णयात्मकपरामर्शादनुमित्यनुदयप्रसंगइति नवीनैर्दूषणमु
क्तं तद्सत्॥ समानविषयकत्वेन कार्यकालवृत्तितयाबाधस्य प्रतिबंधकत्वमुपगम्यतां सामग्रीव विधाऽसामान्यग्रहकालीनात्मविधपरामर्शात्मकनिर्ण
स्मात्मकपरामर्शयोरसंभवात्॥ कारणविलंबेन तत्रानुमित्यसंभवाच्च॥ करचित्त्वनेकमयविशेष्यकहेतुव्याप्तेर्ग्रहा॥ लिंगपरामर्श इति॥ व्यापकेति॥ अ
त्वरसम्बन्धात् दृष्टान्तस्त्वीकर्तव्यमतेनाद्दृष्टकार्यकारणभावभंगप्रसंगदूषणपरिहृतं॥ निरुक्तमित्यनेन स्वत्वनप्रतिबंधकत्वोक्ति॥ पर्वतइत्यादिना॥
पेक्षां मिश्रादीनामूचुः॥ प्रकृतविवरणेति॥ यद्यपि प्रतियोगिज्ञानस्यावरणतायां निश्चयत्वमनाहार्यत्वं च न प्रविष्टं किंचारोपकारणतामतेन सारोप
प्रतियोगिज्ञानव्यतिरेकेण कार्यव्यतिरेकाभावात्तदारोपकारणतांतर्गतैवप्रतियोगिज्ञानकारणतानवच्छेदकतव्याप्तिकस्य धर्मस्याविरुद्धंप्रवेशइत्यु
त्यायिरेवत्वास्ति तथापि बाह्यितोपि पुनर्वर्णितइति न्यायेनोपाध्यायोपाध्यायमतदूषकशर्दोषः॥ अन्यप्रतिरेकावेवमानमत आह॥ वस्तुतः
स्विति॥ गतत्वेपिवेति॥ तथा च मतद्वयेपि कार्यतावच्छेदकत्वानात्मभावत्वस्य मितिभावः॥ लत्वेप्रसंगासंभवाद्वा॥ भावत्वेति॥ प्रसंगइति॥ इ
द्रूपसंबद्धविशेषणतयाऽभावप्रत्यक्षस्य तावच्छिन्नत्वेन संभवादितिभावः॥ ज्ञानेति॥ तथा चाभावप्रत्यक्षस्य कार्यतानवच्छेदकतयानतद्वच्छि
न्नंतत्वेतिभावः॥ नन्वेवं विशेष्यविशेषणमिति न्यायेनाभावप्रत्यक्षत्वस्यैवावच्छेदकत्वमाह॥ अतएवेति॥ न्यायेनापीति॥ अपिरत्ववधारणे॥ नाभावे
ति॥ तस्यालौकिकत्वात् तद्ग्रहस्सावश्यकः॥ ननु लौकिकत्वधर्मस्य कार्यतावच्छेदकत्वेपि तद्वच्छिन्नत्वे प्रत्यक्षेणान्वयव्यतिरेकाभ्यां प्रतियोगिज्ञानं हेतुरतआ शम २४

ह॥ अत एवेति॥ न च धारावाहिकयोरन्यथासिद्धत्वादिति भावः॥ व्याप्यविषयकत्वेनेति॥ अथैवं व्याप्यवत्पक्षनिश्चयत्वेन हेतुताविवक्षणमफलं तद्याव
द्विषयकव्याप्यविषयकत्वादेव वारणादिति चेन्न॥ ज्ञायते यावदादिकालीनव्याप्यादिविषयकमशीमकाकांक्षादिज्ञानजन्यघटवत्त्वमित्यादिज्ञानव्यावृत्तिवा
दिवारणस्यैव फलत्वात्॥ तत्रैव॥ विशेषणधियो हेतुत्वम्॥ अथैतद्वचनेन संबंधानिवेशे व्यापकताभेदाभावादाह॥ संस्कारस्येति॥ संस्कारमिति पदं
न घटित्वे सादिनियमेन तस्य व्यापारतावत्संभवतीति भावः॥ विशिष्टज्ञानेति॥ अनुभवात्मकेत्यादिः॥ उक्तरीत्या विशेषणज्ञानहेतुतायां व्यभिचारवा
रणे पि विशेषणतावच्छेदकप्रकारकज्ञानहेतुतायां व्यभिचारो दुर्वार एवेत्यत आह॥ न घटेति॥ स्मृतौ विशिष्टवैशिष्ट्यावगाहिस्मृतौ॥ अपेक्षाबुद्धिज
न्ये विषयस्मृतिकल्पनागौरवेन नियमतः ससंगतमत आह॥ अपेक्षेति॥ नन्वत्र स्यात् इति॥ तेनैव धारादिजननेन तस्य क्षणत्रयस्थायित्वानुपपत्तिरिति भा
वः॥ लक्षणमिति॥ इदं च पक्षतासंपन्नत्वेन लक्ष्यं॥ अनुभवत्वस्याप्यनुभवत्वव्याप्यत्वादाह॥ अन्यत्र वृत्तित्वमिति॥ सामानाधिकरण्यघटितस्य तद्वृत्तित्व
विशेषे गौरवादाह॥ तत्वचेति॥ पदार्थस्तोम एवेति॥ ननु अनुमितित्वस्य कार्यतावच्छेदकतया विशेषणपरंपराया अपवृत्तिसामानाधिकरण्येन तदवच्छे
दकत्वादिसंभवाद्यमेतत् अस्याविशिष्टप्रकारकानां सर्वेषामवच्छेदकत्वेऽवच्छेदकभेदेन कार्यताभेदप्रसंगात् न चानुमितित्वमात्रस्यातिप्रसक्त
तयावच्छेदकत्वे तूभयविशिष्टत्वमिति चायम्॥ विशिष्टस्यानतिप्रसक्तत्वादिति चेन्न॥ विशेष्यविशेषणभावापन्नतावत्पदार्थेषु व्यासज्यवृत्तेरेकस्याः कार्य
तायाः कल्पनमपेक्ष्य तत्र कल्पनस्यैव गौरवमग्रहत्वात्॥ अवच्छेदकभेदस्यैव कार्यताभेदकत्वेनावच्छेदकभेदेऽपि अवच्छेदकतायाः अभिन्नतया कार्य
ताभेदप्रसंगाभावात्॥ यत्तु एवं सति संबंधसंबंधावच्छिन्नावच्छेदकतायाः अस्तमेवैतद्व्याद्यादिविधेयककार्यतोदोषमतीत ● सापत्तेः॥ अनुमिति
25 तत्स्या॰ त्वादौ जातिवादिसतादिनव्यमतानां दूषणोद्भावनम्॥ तदसत् तादृशपरे॥ समवायसंबंधावच्छिन्नत्वस्यापि कल्पनागमेनादोषाच्चेति दिक्

भ०टी० तद्घटत्वेनेति॥ कार्यतावच्छेदकरूपसमर्थघटत्वेनैवार्थः॥ इति भावः॥ तद्दोषसामानाधिकरण्येनावच्छेदकतांशे सामानाधिकरण्येन तद्वच्छेदकत्व पा१
२५ यो दिति भावः॥ आत्मवि =कं= पपकृतौ पिच्छपायामिश्रानेद्वारे लाघवादाह॥ न चेति॥ अव्यवहितो नरत्वं हीति॥ अनन्यथासिद्धस्याव्यवहितत्व
स्य वरमनिर्वचनं च लाघवात्॥ अन्यथात इत्यस्य नेत्यस्य अव्यवहितपाप =भाव= रामभट्ट अव्यवहितत्वं चेत्कालोपपत्तौ रोपपत्तेः॥ संबंधानुपगमस्यादो
पत्ता स्वर्गानुपस्थितेनान्यतमत्वेनानुगमसंभवात्॥ अव्यवहितोत्तरत्वस्य संबंधत्वे नादोषदृष्टापत्तेः॥ न चेति॥ ज्ञानाभावादिति॥ विशिष्टधीनिय
मकस्यैव संबंधतया तेन विशिष्टधियोऽभावेन तस्य संबंधत्वं नास्तीत्याशयः॥ न चैवं परामर्शजन्यपक्षस्यैव हि तनुत्वात् अव्यवहितोत्तरत्वसंबंध
तया विशिष्टं न तु प्रकारतयाऽतो न दोष इत्यस्य व्याख्यानमेव परामर्शोपपत्त्यंशविशेष इति भावः =शिति= मूलं कृतं उभयसाक्षात्परिच्छेदे विशिष्टधीनि
यामकत्वं संबंधत्वमिति स्यात्तन्मतेनास्य संबंधताभावेन तत्त्वक्षणे तस्य संबंधत्वाभावान्न तत्त्वभित्तापत्त्या च तस्य संबंधतास्यापत्ति
रेवामानो नरो ग्रहस्तु मिति लक्षणे तदुत्पत्तिक्षणे ग्रहस्तो कलङ्कता मिति॥ कार्यकारणभावघटितमित्यादि॥ लक्षणांतरमिति॥ तद्घटितमित्यादि
बाधकाभावात्॥ अभिचारमारणान्॥ अनाकुलमनिर्दोषम्॥ नाशपाविशेषविशेषणाभावादव्याप्त्यसंभवदोषाः॥ आहुरिति॥ मतांतरमाहे
तिं गोपहिते स्वादिनावच्छेदी लये तेन॥ विषयतैव वेति॥ तथा च तत्तल्लिंगकत्वतद्धेतुमिति त्वरूपविशेष्यत्वसंबंधेनानुमितौ विशेष्यतासंबंधेन
तल्लिंगकपरामर्शस्य हेतुत्वमिति भावः॥ तत्तल्लिंगकानंतरतद्धेतुमितिस्वरूपस्य तत्तल्लिंगपरामर्शहेतुमितिसाधारण्यव्यवहितोत्तरत्वापेक्षयाल
घुत्वादाह॥ तत्स्वरूपस्येति॥ लक्षणान्तरेति॥ विषयतायाः संबंधत्वं सर्वसिद्धमव्यवहितोत्तरत्वस्य तत्त्वं तु स्वसंबंधत्वमसिद्धमसाधार राम
णत्वात्॥ विषयतायाविशिष्टतालेनैव संबंधत्वं हेतुज्ञानतज्जन्यस्वरूपत्वेन स्वसत्तासमाह॥ वदंतीति॥ सांकर्यापत्तेरित्याह॥ ज्ञानस्य हेतुत्वे ज्ञानत्वेन २५
व्यापकत्वादिना१

विना। तद्वच्छिन्नहेतुनाघटितलक्षणं चातिसन्नमिति भावः॥ अत्राधिकमस्मत्कृतन्यायकौस्तुभे द्रष्टव्यम्॥ विस्तरभियान लिखितम्॥ सन्नादीनामिति॥
परोक्षत्वे चेन ज्ञानादिसाधारण्यात्॥ ज्ञानादावतिप्रसंगादाह॥ तथात्वेति॥ तथैवेति॥ ईश्वरीनांपघटादवीश्वरज्ञानव्यापारतावारणाय तज्ज्ञान्यत्वावच्छेदकाव-
च्छिन्नजनकतस्य व्यापारत्वे घटकत्वादिति भावः॥ कार्यतायावारणायेति॥ तद्वारणे ज्ञत्वस्थलीयहाराप्यतिप्रसंगादिति भावः॥ अआपिनैकमिति॥ तथा अ-
संभव इति भावः॥ इत्यादीति॥ आदिना ज्ञानत्वेन कारणत्वे असंभव इत्यस्य परिग्रहः॥ यथाश्रुतविशेषणत्वे वक्ष्यमाणार्थलाभादाह॥ पक्षत्वस्येति
विशेष्येति॥ अहणापेसारकाहृण्यादीनामिवेश कृते पक्षतायां विशेषणत्वमिति भावः॥ एवं सति पक्षतायां धर्मतायामन्वयः स्यात्तु तज्जन्यता-
याम त आह॥ पक्षधर्मतेति॥ विशेष्यत्वं साध्यासंपर्कसाधारणमिति भावः॥ पक्षतायाश्च परंपराविशेष्यं ज्ञानमात्रपजन्यत्वोन्वयो न तु धर्म-
तायाश्च साध्याद्विशेष्यं तदाद्यापीसत्त्वनियामकमाह॥ तात्पर्येति॥ अविशेषणत्वेपि विशेषणत्वेन तज्जन्यतायामन्वयेपि॥ पक्षतायाश्च अपि
पक्षतायां एव॥ निरुक्तविशेषणत्वं कदेशमत आह॥ लोहितेति॥ आत्मत्वात्॥ सोष्णीषा ऋत्विजः प्रचरन्तीति वाक्यान्तरे एष साधनतायाश्च प्रा-
प्तत्वात्॥ अविवक्षितस्यापि॥ तदुत्साधनतान्वयित्वेनाविवक्षितस्यापि॥ तस्य उष्णीषस्य॥ विशेषणत्वं षष्ठ्यर्थः॥ लौहित्यमिति तेनान्वयी-
कृतस्य विशेषणीकृतलौहित्यमिति पाठः सम्यक् एव॥ पक्षतायाश्च स्वातंत्र्येण सह कृतत्वसंबन्धेन प्रथमज्ञानविशेषणत्वे गौरवमिति स्व-
तन्त्रसाध्यमाह॥ कश्चिदिति॥ पक्षतायाविशिष्टाभावरूपतयाविशेष्याप्रभावरूपत्वमनुपपन्नमत आह॥ विशेषणवतीत्यादि॥ आदिना तु
सिद्धिपरिग्रहेण संभवतीत्यनाभावविशेषरूपत्वमेव ज्ञानस्य प्रतिबंधकतया सिद्धिसत्त्वे तदभावप्रत्यक्षासंभवादिसाधारण्येनाह॥ सत्त्व-

म०टी०
२६

तिपक्षइति॥अभावोपनीतभानमिति॥प्रतियोगिज्ञानजन्यतायांलौकिकत्वनिवेशेनमनोऽयोग्यवन्हिआप्यधूमवत्पर्वताभावविषयकोक्तसम्
हालंबनस्यतदंशेऽलौकिकत्वेनप्रतियोगिज्ञानविधयापरामर्शजन्यत्वासंभवादितिभावः॥तत्वमाप्येति॥अत्रव्याप्तेरयोग्यत्वेनतद्वच्छिन्नमे
दःकथंयोग्यइतितत्राभंकृतीयम्॥प्रतियोगिमत्वेत्यादियोग्यानुपलब्धिसत्वेनपिशाचत्वाद्यवच्छिन्नभेदस्यैवाप्यापियोग्यत्वात्॥अतएवासंता
भावउपेक्षितःपिशाचाद्यसंताभावस्यैवतस्यायोग्यत्वात्॥अफलमिति॥अन्यलिंगकेव्याप्यःप्रतिबंधकत्वमनुपेक्षपक्षतायालिंगभेदानियं
त्रितत्वस्यपक्षतायांवक्ष्यमाणत्वादितिभावः॥पक्षतात्वेनपक्षताजन्यत्वविवक्षणेनैवाननतिप्रसंगेइतरदत्तवैयर्थ्यरूपदोषसत्वादाह॥नापे
क्षेपइति॥पक्षतापरामर्शयोर्जन्यतायांविषयतावच्छेदकस्यानैयत्येव्यभिचारसंभवइत्याशयेनाशंकते॥नचेति॥सामानाधिकरण्यमात्रेणेति॥सामाना
धिकरण्येनसिद्धिकालीनविच्छेदकावच्छेदेनानुमितौव्यभिचारवारणायमात्रपदम्॥व्यभिचारभावादिति॥अवच्छेदकावच्छेदेनानुमितावित्यादिः
अवच्छेदकसादिः॥अत्रसामानाधिकरण्यावगाहीत्यनेनतत्वेनद्विविधपरामर्शयोरप्येकहेतुत्वेमितिसूचितम्॥एवकारेणसामानाधिकरण्ये
नासिद्ध्यभावव्यवच्छेदः॥ननुतर्हिसिद्ध्यभावस्यापिहेतुतापातेतेनतत्वानुरोधेनजन्यतावच्छेदकमेदआवश्यकः॥द्विविधपरामर्शसाधार
णनिरूप्यत्वस्यदुर्वचतेत्यत॥आगामाण्यताचैतेनककत्वानुरोधेनचतस्यैकरूपेणजनकत्वासंभवइत्यत्आह॥द्विकइति॥इत्थंचएकरूपेणै
वोत्तेजककत्वेमन्वेयाकालेऽनुमितेस्ताश्रतस्याःप्रतिबंधकत्वेननिरासाअमिश्रमतेनिश्चयत्वेसाव्याप्यवृत्तिजातितयोभयसाधार
णमपरामर्शस्यमहस्यनोत्तेजकत्वेनद्रमावस्यपक्षतागेहेतुत्वादित्याशयः॥नाविकल्पश्चैवतिमित्तसामानाधिकरण्यभासस्मा॥भा

एम
२६

भावविषयकज्ञानाजन्यात्वृत्तिशाब्दवृत्तिजातिमत्त्वमनुमितित्वमुक्तम् असाधारण्यसन्निवेशेन वा लक्षणाद्विमात्रस्य तादृशेश्वरज्ञानजन्यत्वाल्लक्षणतादृश्यावृत्तित्व
ज्ञानकत्वाभावोऽलक्ष्यतया अभावघटितत्वात् तत्र चाद्वितीयस्वरूपादृश्यज्ञानकरणकोपमितावभावज्ञानाजन्यत्वादुपमितौ नातिप्रसंग इति श्रीहरिरिति संक्षे
पः॥ ॥इति महादेवविरचितायां सर्वोपकारिण्याख्यायां दीधितिव्याख्यायामनुमितिलक्षणम्॥ ॥तत्करणमनुमानमिति सजातत्वेनानुमितित्वेनानु
न मितेः परामर्शलक्षणलक्ष्यतावच्छेदकपोऽस्मेरस्त्वं वाऽनुमानपदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वान्न दोषः॥ लक्षणपक्षेऽसंभवखंडे सा चप्र
माचतुर्विधा प्रत्यक्षानुमित्युपमितिशाब्दभेदादिरूपत्वमेतत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदादित्यनेनानुमानलक्षणस्यो
क्ततया पुनरनुमानलक्षणकरणेऽनाकांक्षितत्वमित्युपनरुक्तत्वे यादृशी टीकायाः स्वनुमितिकरणस्येतरत्वे लक्ष्य एष ज्ञानार्थमात्मानुमितिकरण
त्वरूपलक्षणं स्वतावच्छेदकीकृत्य व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानजातीयकरणत्वरूपलक्षणांतरकरणमित्युक्तपयम्॥ एवं च तच्च
ज्ञेन व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानत्वेनानुमितेः परामर्शः अनुमानपदमनुमितिकरणपरमित्याशयेनाशङ्कते॥ दीधितौ नचे
त्यादि॥ विशिष्टपदस्य प्रकारपरतया ज्ञानान्यविहितेन व्याप्तेः प्रवेश इत्याह॥ व्याप्त्यांशे व्याप्तिज्ञानत्वमिति॥ तथापि निश्चयत्वघटकज्ञानान्तर्वि
तया पक्षधर्मतायाः एवं निवेशेन व्याप्तिप्रकारकज्ञानत्वस्यागमकत्वासंभवादाह॥ पक्षधर्मतांश इति॥ निवेशादिति॥ निश्चयत्वस्य संशयेतरज्ञा
नत्वरूपत्वादिति भावः॥ परामर्शरूपानुमानमित्याशयेनाह॥ व्याप्तिप्रकारकेति॥ ज्ञानत्वादेः तत्राघवस्त्विनस्य॥ ज्ञानेति॥ ज्ञानत्वावच्छिन्ने
त्यर्थः॥ घटितत्वादिति॥ तज्ज्ञानत्वस्य तज्ज्ञानवृत्तित्वादिघटितत्वादिति भावः॥ तस्यैव॥ व्याप्तिज्ञानत्वावच्छिन्नस्यैव॥ न तत्त्वार्थकत्वमिति

27

भ०टी० २८

ननु व्यभिचारवारकस्य व्याप्तिग्रहे उपयोगित्वेनैव भागासिद्धिवारकस्यापि पक्षधर्मताग्रहे उपयोगित्वेन सार्थकत्वमेवास्तां व्याप्यगमकतोपयोगित्वेनोभयथा
रकस्यापि विशेषणस्य सार्थकत्वादिति चेन्न। भागासिद्धत्वेऽपि भागान्तरे तस्य साध्यगमकतासंभवात्। व्यभिचारे च तस्य व्याप्यगमकतायाः कुत्राप्यसंभवा
दिति विशेषेण व्यभिचारवारकोक्तविशेषणस्यैव सार्थकत्वमसाध्यपात्। व्याप्तिज्ञानत्वमेवेति। करणत्वस्य करणतावच्छेदकधर्मरूपत्वादिति भा
वः॥ स्वरूपसंबन्धात्मकत्वेऽपि व्याप्तिज्ञानत्वादिस्वरूपतया भेदाभावेऽस्वरसमाह। वदन्तीति॥ तादृशज्ञानत्वस्य व्याप्तिज्ञानत्वरूपत्वे पुनरुक्ति
दोषप्रसक्तिः एवं परामर्शकरणतापक्ष एवैतादृशज्ञानत्वस्य परामर्शत्वरूपतया तस्य करणतानात्मकत्वासंभवश्चेत्यस्वरसादाह। अन्ये इति। हे
तौ व्यापकतावच्छेदककोटिप्रविष्टहेतौ। वैयर्थ्यशंकेति। व्यापकेऽप्यर्थविशेषणत्वस्यादोषत्वादिति भावः॥ ॥ इति सर्वोपकारिण्यामनुमा
नलक्षणम्॥ ॥ एवं करणकालनतत्साध्याकारेण व्याप्तेराह। ज्ञानत्वावच्छिन्नेति। अनुमितिप्रतिबंधसामान्यतो ज्ञानत्वेन करणत्वान्ना
तिव्याप्तिः॥ यद्यपि तत्रापि ज्ञानत्वादिनैव करणत्वं न त्वितिप्रसक्तज्ञानत्वेन तदाह। ज्ञानाकरणकत्वेति। व्याप्यवादिकेति। तथा च प्रत्यक्षलक्ष हे
णमत्यदेव कार्यमिति = व्याप्ति = भावः॥ ॥ इति सर्वोपकारिण्यामनुमानलक्षणपरिष्कारः॥ ॥ अनुमेयेति। पर्यवसितेऽनुमानपदस्य
यस्मज्ञानत्वावच्छिन्नेलाक्षणिकत्वादिति भावः॥ ननु पारमार्थिकस्यैव पदार्थत्वेनालीकस्य कथमनुमानपदार्थत्वमत आह। तन्मतइति। अ
लीक एव एवकारेण पारमार्थिकस्य व्यवच्छेदः॥ अलीकत्वादिति। गोत्वादेरतद्व्यावृत्तात्मकतयाऽलीकत्वेन विशिष्टस्याप्यलीकत्वादिति भावः॥ एम
प्रमाणान्तरेति। प्रमान्तरेत्यर्थः॥ अलीकेति हेतुगर्भविशेषणम्। धर्मस्य व्यावर्तकत्वे स्वस्य व्यावर्तकत्वाभावादाह। तन्मतइति। अनभ्युपा २८

पादिति॥ तस्मेतधारमार्थिकस्यामेदेनैवधर्मि... मावादितिभावः॥ एतेनासाधारणतयास्वस्यैवस्वव्यावर्तकत्वेनैव एतन्प्रमाणांतरेसा
द्धिनिरूपणम्॥ एकैकेति॥ एकैकंभिन्नंपतत्स्वलक्षणं तद्विषयकत्वादित्यर्थः॥ अपायासंभवइतिभावः॥ द्वयोरेकविषयत्वेनदोषइत्यत आह
अगतइति॥ अगतत्वंक्षणभंगित्वात्सिद्धत्वादाद्य॥ किंचेति॥ असंस्पर्शीति॥ अविषयीकरणात्॥ अस्यासद्विषयकत्वेप्रमाणापत्तेरि
तिभावः॥ इत्यविरोधेति॥ तस्मेनेविकल्पो द्विविधः अध्यक्षमूलकः अनादिवासनापुरःपाकमात्रमूलकश्चेत आद्योवह्न्यादिविक
ल्पः अंत्यः शशविषाणादिविकल्पइत्यर्थः॥ वारणार्थम्॥ संवाद घटवत्त्वे वारणार्थं तद्विषयविषयत्वस्य संवादत्वे वारणार्थमि
तिभावः॥ तथाचेति॥ तथाचनोपक्रमोपसंहारविरोध इत्यर्थः॥ एकतरेति॥ आद्यं चार्वाकसिद्धं द्वितीयं सिद्धांतसिद्धम्॥ आपाद
नायैव॥ संपादनायैव॥ निश्चितं घटादिदृष्टांतस्वरूपम्॥ तत्स्वरूपस्या नाश्रणीकृतपालघुकर्मधारयमाह॥ दृष्टं ज्ञायमानमिति॥
इत्यनेनदृसंतेन॥ तत्रव्यवहारेति॥ अनुमानाप्रमाण्यादिव्यवहारइत्यर्थः॥ संभावनायामितिसतिसप्तमी॥ कथमिति॥ व्यवहर्तुः
व्यनिश्चयस्यव्यवहारहेतुत्वादित्याशयः॥ व्यवहर्तृव्यक्तिज्ञानमात्रस्यहेतुत्वेत्वाह॥ कथंचेति॥ अभिहितमेवेत्येकोवेत्यर्थमस्यरसइत्याश रस
पेनाह॥ आचक्षुरिति॥ नाप्रामाण्यभावेति॥ असद्विषयकत्वरूपस्यमहत्त्वस्यप्रामाण्यवद्विशेष्यकत्वेविनाप्युपपत्तेरनुमानप्रामाण्य
साधकत्वादितिभावः॥ रजतत्वप्रकारकत्वेति॥ इदं चैतेनापिकरीत्या॥ तस्मेनेनिर्विकल्पकस्येव प्रमात्वेनरजतत्वप्रकारकत्वस्यतद्व
तितयासाधारणधर्मत्वानुपपत्तेः॥ त्वासकेनेति॥ तस्मेनेसद्विषयकत्वंप्रामाण्यम्॥ सत्वोविषयहेतुत्वेत्यभिरेवतत्रधर्मीतएवमावादि

२४

भ०टी० सात्पक्षगाननुसन्धानावलंबनत्वादिकमपि स्वतएव गम्यत्वान्मतत्राह ॥ असदिति ॥ ननु सत्वाव्याप्यस्य विषयिताकत्वे सन्मात्रावलंबन
२८ त्वं नास्य स्फुटितमत्र किंकमत आह ॥ विषयितेति ॥ सन्मात्रविषयकत्वादेः स्वविषयत्वे तु स्वव्याप्यत्वान्न द्विषयकत्वेपि तत्त्वं वाच्यं एवं तद्विषयत्व
वेपीति भावः ॥ अप्रामाणिकत्वापातात् ॥ असत्त्वापातात् ॥ अत्रैव हेतुमाह ॥ संभावनामात्रादिति ॥ ॥ इति सर्वोपकारिण्यामनुमानखं
डे व्याप्तिनिरूपणम् ॥ ॥ व्याप्तिस्वरूपज्ञाने हीति सतिसप्तमी ॥ एतस्य शक्तिपाद्दर्शयितुं उपक्रमते इत्यनेनान्वयः ॥ तथा चानुमानप्रामाण्य प्रवक्ष्या
निर्वाहकव्याप्तिग्रहोपायनिरूपणोपजीव्यत्वेन प्रथमं व्याप्तिस्वरूपनिरूपणमिति भावः ॥ कपिसंयोगीति ॥ न च साध्याभावेन ति
योगिविशेषणिक्रियाणाऽनिवेशेनाव्याप्तिरिति वाच्यम् ॥ प्रतियोगिमद्भिन्नत्वरूपप्रतियोगिवैयधिकरण्यघटकस्य भेदस्य कृते साध्यवद्भि
न्नत्वपर्यवसानेनेतद्दूषितस्येव वृत्तीयलक्षणरूपत्वात् ॥ ननु तथापि वृक्षमात्रवृत्तिसत्ताध्वंसकालाग्रहविरोधितामह विषयसंबंधेन सा
ध्याभाववत्वं वाच्यं तथा चाव्याप्यवृत्तिसाध्यके [illegible] निरवच्छिन्नविशेषणतानिवेशवस्येव नाद्यत्वान्नाव्याप्तिरिति चेत् ॥ अत्राहुः ॥ ए
तद्दापणेनैव दीधितावव्याप्तिमाशंक्याहेसत्वम् ॥ अभयाऽव्याप्त्यंहेतुवोस्यात् ॥ तथा चाग्रेऽव्ये स्वरूपपथाकृतेऽव्याप्तिशंकया
लक्षणांतरं न तु केवलसाऽव्याप्तिप्रवृत्तिसावत्वात् ॥ अत एव ग्रंथकारेण संगति अनवधानिकर्षे प्रमाणेत्रापि दी
धस्यासंभवादिति ध्येयम् ॥ कर्मधारये लघुत्वे कर्मधारयस्यांगीकारे ॥ असवृत्तित्वस्येति साध्याभाववृत्तेरन्यत्वादिति भावः ॥ नैवेयधिकरण्य एम
धारयपक्षेपि नवेयधिकरण्यम् ॥ अधिकरणभेदेनाभावभेदाभावेनाप्यवद्वेयधिकरण्यासंभवादाह ॥ अधिकरणभेदेनेति ॥ पक्ष एवेति ॥ २८

अन्यथाऽव्याप्यवृत्तिसाध्यकाव्याप्तिः स्यादिति भावः॥ न हीति॥ तथा च घटत्वाभावादिकमादाय सर्वत्र लक्षणासञ्चारणाय साध्यपदमि-
ति भावः॥ अभ्युपेत्याह॥ यद्वेति॥ भोऽेन मात्रस्यैव॥ समप्रपदे र्थरूपाभावमात्रस्यैव॥ तेन नाप्रसिद्ध्यसंभवापसंगतिः॥ उपाध्यलक्षणाक्रा-
रभिप्रेतम्॥ असंभवादिति॥ यथाश्रुताभिप्रायेणावश्यमाशङ्क्य साध्यवन्नान्हविशिष्टेन हविषयत्वं धेनाभावव त्प्रविपक्षेणाह॥ अत्रापीति
स्याभावसाध्यकहेत्वादिः॥ तद्धि वह्नेणोभावसाध्यके विशेषणताविशेषस्यैव ताहृशत्वेन तेन संबंधेन भावस्याधिकरणाप्रसिद्धाऽभावस्य चाधिकर-
णभेदेन भिन्नत्वाल्लक्षणसंगमसंभवाभावादिति भावः॥ तेनेत्यादि॥ अयमाशयः॥ संबंधसामान्येन साध्याभाववद्वृत्तिवह्नेणोभावसाध्य-
के कालिकादिसंबंधमादायाव्याप्तिरिति विशेषणताविशेषेणेत्युक्तम्॥ तस्य च भावाभावसाधारणत्वेन घटत्वाभावादिसाध्यकेनाव्याप्तिरेवं चा-
त्र तेन संबंधेनासत्त्वरूपसाध्याभावाधिकरणे हेतोरसत्त्वादव्याप्तिरिति तत्संबंधेन न हि वह्नेणे कालिकसंबंधेन तद्वृत्तिकाले हेतोरसत्त्वान्नाव्या- तादृशेन
प्तिरिति॥ कर्मणि चेत्याशयमनुमानसारेणाह॥ धेनो कर्मत्वादिति॥ व्यास्याप्रसिद्धकर्मत्वमिति॥ एतेन कर्मत्वादिसनेनोक्तम्पाकपि-
संयोगादिसाध्यकाव्याप्त्या साध्यवत्प्रतियोगिकेतिलक्षणावतारणमयुक्तं कपिसंयोगवद्भेदान्तरप्रतियोगिकभेदस्यैव तद्धेतुत्वेनाव्याप्त्या-
भावादव्याप्त्यादिति नवीनानां दूषणोद्भवेनं परास्तम्॥ साध्ये तस्य सिद्धकर्मत्वस्य पतत्यादृष्टान्तरस्य साध्यवत्त्वाभावात्॥ व्यासज्येतीति॥ के-
वलविशेषेऽपि विशिष्टभेदानभ्युपगमाद्विशिष्टाधिष्ठानप्रतियोगिताकान्योन्याभावमादाय न दोष इति ध्येयम्॥ साध्याभाववतीत्यादि॥ व-
ह्निमान्धूमादित्यादावव्याप्तिरेव साध्ये साकल्यविशेषणमावृत्ति*साध्यसाध्याभाववति साकल्याप्रवेशेन संभवति यत्किंचिद्धूमाभावात्।

भ०टी०
२९

धिकरणयत्किंचिद्ध्रदे धूमाभावसत्त्वात्तादृशविशेषेऽनुसंभवति यत्किंचिद्धूमाभाववत्सकलांतर्गतमहानसादौ धूमाभावासत्त्वादिति भावः ॥
गुणादिसाध्यकव्याप्तिवारणाय साध्येन सावकाशत्वेऽपि किंतु साध्याभाव इति सार्वभौममतं तदुपेक्षणीयमित्याह ॥ गुणादाविति ॥ न च
संबंधसामान्यावच्छिन्नप्रतियोगिताकत्वं न तु तादृशावच्छिन्नाभावसत्त्वान्मांतर्गतो न गुणादाविति वाच्यम् ॥ प्रतियोगितावच्छेदक
संबंधेन प्रतियोगिवैयधिकरण्यस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकाभावस्य च निवेशाभिप्रायेणैतदुक्तेः ॥ साध्यता
वच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशे साधारण्यं दोषमाह ॥ अव्याप्तिश्चेति ॥ प्रतियोगितावच्छेदकसंबंधेन प्रतियोगि
वैयधिकरण्यनिवेशे प्रसिद्धानुमाने गगनाद्याश्रयगुणादेः प्रसिद्ध्या नाधिकरणाप्रसिद्ध्या व्याप्तिरित्याशयेनाह ॥ पृथिवीत्वेति ॥ अप्रसि प
द्धेरिति ॥ न च प्रसिद्धे कालो नाधिकरण प्रसिद्धिः इत्यलमिति वाच्यम् ॥ प्रसिद्धे काधिकरणे सावकाशप्रवेशेऽतिप्रसंगेन तस्य वेशे प्रसिद्ध
नुमाने महानसीयवह्न्यभाववाधिकरणसकलांतर्गतपर्वतादौ धूमाभावसत्त्वादव्याप्तेः ॥ सकलेति ॥ अभावेति ॥ यावद्धूमाभाववतां ध्व
तर्णेऽपि यावद्धूमाभावे संपर्कः ॥ अव्याप्तिरिति ॥ साध्यमात्रप्रतियोगिकाभाववानिवेशे एतद्रूपादिव्याप्तौ एतद्रूपवज्जलावृत्त्यभावस्य तथा मथा
भाषा वेनासंभवादित्याशयः ॥ अविशिष्टेति विशिष्टाभावो विशेषणाभावरूपे संपर्कः ॥ तेन विशिष्टाभावमादाय नाव्याप्तिः ॥ अ श
तिप्रसंगः स तु तेषामतिरिक्तत्वाभिप्राय इति नताद्रूप्येण ॥ यत्र तु प्रतीति ॥ अयमेवं वह्निधूमोभयवान्पर्वत इत्यादावतिप्रसंगश्च एम
व्याप्यस्य पक्षतिधर्मावच्छिन्नप्रतियोगिताकस्य वह्निधूमान्यतरत्वावच्छिन्नप्रतियोगिताकाभावादेरपि गोत्वेन्द्रियाणाभावसत्त्वादिति चेन्न २९

अयोगोलकान्यत्वविशिष्टवह्निधूमान्यतराभाववत्त्वेन तादृशस्यायोगोलकसत्त्वात्॥

वक्ष्यमाणदोषेणैतस्याप्युपलक्षणत्वात्॥ जातिमानिति॥ अत्रोपक्रान्तवह्निसाध्यकानुमाने सागे किं बीजमिति तु नाशंक्यम्॥ सकलवह्नेरेकक्ष
णवृत्तित्वाभावेन एकक्षणवृत्तित्वविशिष्टवह्न्यभावस्य सकलवह्निप्रतियोगिकत्वासंभवेन तत्राव्याप्तेरसंभवात्॥ अत एवाव्याप्तिरित्यपि संगच्छते॥ पू
र्वक्षणवृत्तित्वे हेतोरिति॥ अथ व्यासज्यवृत्तिधर्मानवच्छिन्नतत्स्यैव प्रतियोगितायां वैशिष्ट्यानवच्छिन्नत्वनिवेशान्नदोष इति चेन्न॥ तथापि वह्निधूमोभ
याभाववह्नेरित्यादावुक्तरीत्यातिप्रसंगात्॥ अतिव्याप्तेरिति॥ साध्यतावच्छेदकातिरिक्तवैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वनिवेशे तु नेति गौर
वमित्याशयेन॥ यथाश्रुतस्य॥ हेत्वभावे प्रतियोगिवैयधिकरण्याघटितस्य व्याप्यत्वमिति॥ साध्याभावनिष्ठं साध्यतावच्छेदकसंबन्धेन हेत्वभा
वनिष्ठं हेतुतावच्छेदकसंबन्धेनेत्यर्थः॥ क्रमेण तयोरप्रयोजनमाह॥ तेनेति॥ नष्टेति॥ जातिव्याप्यसंगतिः॥ परामर्शानुपपत्तेरिति॥ तत्सद्
लपृथ्वीप्रतियोगिकपरमपार्थक्येनेन साध्याभावस्यैव पर्याप्त्यवच्छिन्नत्वादिति भावः॥ विशेषणयोः प्रतियोगि प्रतियोगिकत्वविशेषणयोः
प्रतियोगितावच्छेदकावच्छिन्नत्वहेतुतावच्छेदकावच्छिन्नत्वयोरिति यावत्॥ असत्त्वेपीति॥ इदमुपलक्षणम्॥ पृथिवीकपिसंयोगादिसाध्ये
निरुक्तसाध्याभाववति जलादौ प्रतियोग्यनधिकरणगुणादिवृत्तिकपिसंयोगाभावस्य सत्त्वेपीत्यपि द्रष्टव्यम्॥ पक्षत्वलाघवेन साध्याभा
वहेत्वभावयोः साध्यताहेतुतावच्छेदकावच्छिन्नवैयधिकरण्यं निवेश्य साध्यतावच्छेदकावच्छिन्नाधिकरणं यावत्तद्धर्मावच्छिन्नाना
धिकरणं तद्धर्मवत्त्वमेव सम्यगिति दीधितिकृदुक्तिसंगतेति॥ तदसत्॥ एतस्य लक्षणान्तरत्वेन मूलोक्तप्रतियोगितत्त्वस्य व्याप्ति
त्वानुसारेण दीधितिकृदुक्तिसंगतेः॥ निर्धूमत्वादिति॥ अत्रेदं ध्येयम्॥ पितादृशसाध्यवत्साध्याभाववति पर्वते तत्तद्वह्न्यभावमे

भ०टी० ३० रस्यतादृशस्यसत्तानमात्रपलक्षणस्य मन्येपेक्षयम स्यास्तित्वस्यापि प्रतियोगितावच्छेदकत्वं संबंधेन प्रतियोगिवैयधिकरण्यं निविष्टं प्र
तियोगितायां च हेतुतावच्छेदकसंबंधावच्छिन्नत्वं निविष्टं चतुर्थाभावभेदस्य न तथेति तात्पर्यान्नात्स्य संगतिः॥ ननु सत्ताभाववतोऽद्रव्यस्य समस्त
स्थले न्याय्याभावान्वितयं चेत्पर्यवसितप्रतियोगितायां अत्र स्वार्थस्य सत्ताभाववद्वृत्तित्वात् अभाववत्तायां चावच्छिन्नत्वसंसर्गितान्वयात् सत्ताभाववत्तायां अवच्छिन्नप्रति घ
योगिताकत्वाभेदे सत्ताभाववद्वृत्तिसाध्यसमस्तस्थले प्रतियोगितावच्छेदकप्रदाभावेन तद्गतासंभवान्न तद्गतासंभवः॥ न चैवं संसर्गतया
तद्गतनासंभवः॥ नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादित्याह॥ अत्रेति॥ तस्येति॥ अव्युत्पन्नत्वादिति शेषः॥ असंगतादाह॥ घटोनेत्य
त्रापीति॥ कस्यचिन्मते निराकरोति॥ नतीति॥ समवायस्यैव घटेन्द्रियसंनिकर्षनियामकत्वेनोपन्यस्तत्वादाह॥ एवमिति॥ इतरविशे
षणस्यापि पारतंत्र्येणेतरविशेषणतयान्वयसादाह॥ पदार्थैकदेशान्तेति॥ पदार्थस्य पदार्थैकदेशेन्वितस्यापि पदार्थेऽन्वयस्याव्युत्पन्न
त्वादिति भावः॥ नामार्थस्थल एवेतस्यार्थज्ञानस्य हेतुत्वे त्वाह॥ विशेषणेत्यादेः॥ यत्र नीलो घटो नास्तीति प्रयुक्ते नीलरूपस्य साघटेना
स्तीति प्रतिपत्तिर्न अघटपदस्य घटत्वमात्रसांनीलसाकांक्षत्वेन व्यभिचारदर्शनात् साकांक्षत्वप्रयुक्तेत्यर्थः॥ नन्वन्यथानुपपत्त्याह॥ अवधिमत
इति॥ इदं च भेदस्य सावधिकत्वमुपेत्य॥ वस्तुतः प्रतियोगितानुयोगित्वं वा यं चमस्यैवोपयुक्तः॥ अपोप्यतानिरूपकालेनेन प्रतिबंधान्व
यसंभवदसाधारण्येनाह॥ योग्यतेति॥ असंबंधतात॥ तद्बंधघटत्वादौ॥ असंबद्धतादिमितपाठेऽवच्छिन्नत्वेऽसंघदतादिसर्वथा एम
तस्यकं चुगोचार्मितस्य॥ अप्रकारतात॥ संसर्गतेनावच्छेदकतोऽप्रकारताभावात॥ संबंधपतथा संबंधघटपर्यायस्य प्रकारतान ३०

पा तेन संबंधेन घटप्रकारकत्वादिति ॥ एवं च तेन संबंधेन घटस्यैवाभावे भ्रमः ॥ अन्यथा तावच्छेदकसमवृत्तित्वघटितत्वं प्रतियोगित्वाभिसेतत्रितयपर्याप्तसंसा
र्गिकविषयतेव न ज्ञानसमभिव्याहारज्ञानकार्यतावच्छेदिका त्रयाणां संसर्गत्वेप्यनुभववलेन परस्परेपेक्षा बोधितसंसर्गतया विषयत्वात् ॥ एतेन त्रितयस्य
संसर्गत्वेप्यन्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेसु सूत्रे भंगएवं निर्धारकात्तिरस्ते साध्यत्व ॥ तदभावद्वित्वासंभवेन द्विवचनानुपपत्तेः हा
द्विवचनस्येति ॥ चेत्सपधिकरणाकांक्षापन्नेरस्वरसाद्वाह ॥ केचिदिति ॥ अवच्छेदकावच्छेदेनान्यधेकेवलघटपटत्वविति तादृशयोगितानापन्निरस्ते
श्चाह ॥ सामानाधिकरण्येपनेति ॥ जातौ नस्तानाद्वयवेस्त्येति ॥ एकार्थसमवायेन जातिवृत्तित्वस्यसत्तायां सत्वेन संबंधसामान्येन जातिवृत्ति
त्वाभावस्य समवायेन जातिवृत्तित्वप्रसिद्ध्या तदभावस्य च वायोः सत्वेन गगनाभावदसाध्यत्व ॥ प्रतियोगितावच्छेदकत्वस्य ॥ प्रतियोगितावच्छे
दकतापर्याप्त्यधिकरणम् ॥ नाटस्पेति ॥ उभयपदं धर्मत्व [illegible] कृ मितावच्छेदकतापन्नघटत्वपटत्वं च प्रतियोगितावच्छेदकत्वं च त्रितयं तादृक
भावाप्रत्येक्षुवृत्तित्वात्मकस्य वृत्तित्वे तेन घटत्वपटत्वयोर्विरुद्धत्वेप्युभययोधर्मत्वयोर्घटत्वपटत्वावच्छिन्नत्वप्रतियोगितावच्छेदकतापर्याप्त्यधिक
रणावच्छिन्नत्वं तदुभयमेवेति नाप्रसिद्धिरसाध्यत्व ॥ घटपटोभयमेवेति ॥ प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणावच्छिन्नत्वं न सदेवा
एवमिति भावस्यविरोधो न तु तस्यैवक्तुमपितत्र प्रसिद्धत्व ॥ पुरुषत्वे सामानाधिकरण्ये पदं दंडो विशेषणं दंडिपुरुषत्वं प्रतियोगितावच्छेदकं विशे
षणविशिष्टाभावाप्रत्येकं दंडत्वं दंडत्वं तद्धर्मितावच्छेदकत्वं पुरुषत्वादिषु प्रतियोगितावच्छेदकतापर्याप्तिरिति भावः ॥ ॥ इति सर्वो
पकारित्वोपंचलक्षणीसमाप्तिमगमत् ॥ ॥ लक्षणयोरिति ॥ वक्ष्यमाणे साध्यसामानाधिकरण्ये व्याप्त्यंगीकारे प्रसिद्धानुमाने कोर२
ऽव्याप्त्यसंभवाद्वाह ॥ सत्तावानिति ॥ आह विद्वितीयमिसाध्य ॥ अविवक्षितं चेति अत एव साध्य ॥ अधिकरणएवपदं पदार्थसंबं

कृतार्

तत्र च समवायेन दंडत्वविशेषणं ५

भ॰टी॰ ३१ यस्याकोश्यालम्बनेन साध्यइत्यत्रस्तादाह॥ वस्तुतइति॥ अथ सामानाधिकरण्यप्रतियोगित्वस्य सामानाधिकरण्यघटकत्वेनातिप्रसंगादाह॥
साध्यनिष्ठाभावेति॥ निष्कर्षमाह॥ साध्यनिष्ठाभावीयेति॥ निष्कर्षप्रयोजनमाह॥ इत्थंसत्यादित्यादि॥ अन्यथाऽव्याप्यत्वेन साध्याधिकरणवृत्तित्वाभाव-
नातिप्रसंगः स्यादिति भावः॥ सिद्धं समं तु साध्यत्वमिसाध्यायाह॥ पर्वतीयवह्नित्वेति॥ साध्यतावच्छेदकव्यापकत्वरूपसाध्यनिष्ठत्वोक्त्याच-
प्यासभावादाह॥ किंचेति॥ यत्किंचित्संबंधेनाधेयत्वोत्कृष्टदोषाभावादाह॥ संभवाभावेनेति॥ तेन व्यापकतावच्छेदकत्वविवक्षणेन॥ प्रमेय-
त्वादित्येनेति॥ हेत्वाधिकरणाभावमात्रं प्रसिद्धिवारणायेत्युक्तं निष्ठाभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्यैव व्यापकत्वरूपत्वादिति भा-
वः॥ अत्रचेत्यादिनोक्तस्य सामान्यपदलाभेनतेत्याह्यत्तिमाह॥ आद्यइनेति॥ वृत्त्यनधिकरणधर्मावयवोदेः संबंधसामान्येन निरूपि-
तधर्माधिकरणतावच्छिन्नाभावाभावत्वेन वह्निमान् धूमादित्यादौ इष्टत्वानधिकरणगुणादौ हेत्वधिकरणतावच्छिन्नाभावास-
त्त्वेन द्रव्यं विशिष्टसत्त्वादित्यादौ चाव्याप्तेराह॥ हेतुतावच्छेदकसंबंधनिरूपितहेतुतावच्छेदकावच्छिन्नेति॥ तेनेति॥ निरूढाधिकरणतासामान्या-
भावत्वं विहाय निरूढाधिकरणतावच्छिन्नाभावत्वनिवेशनेनेत्यर्थः॥ वृत्त्याद्यधिकरणताभावस्य तत्सामान्याभावत्वस्य॥ नेनिविष्टमि-
ति॥ प्रयोजनाभावादिति शेषः॥ नेनेति॥ तस्यनिवेशेन वृत्त्यधिकरणताभावासंभवस्यतथात्वेन तथाविधाभावांतरप्रतियोगित्वस्य वृत्त्य-
धिकरणताभावेस्तत्वेनातिव्याप्तिः स्यादिति भावः॥ अन्नेति प्रयोजनकृत्यादित्यादि॥ नचवह्निमान् आकाशात्संयोगेनरूपादेरित्या- राम
वशेति लंगवारणमसत्त्वातिप्रयोजनमितितथाऽन्यथा पक्षधर्मताविरहादेवतत्रानुमितिवारणे आदिपदसत्त्वेपिपक्षताविरहादसायया ३१

साध्यानधिकरणीसाध्यमूलस्यो रूनिष्ठपलक्षणार्थानुयायेकतासंबंधेन न दनुयोगयोग्यं यथाश्रुतलक्षणार्थद्वयं साध्ये सादेरि साद्विना
दीधितावुक्तमनुवादं स्फुटयितुं साध्यानधिकरणे साध्यमूलस्य लेयमावृत्ते। साध्यभिसाध्यगतदभावदृति॥ प्रथमलक्षणावमार्थ इति शेषः
समासेन नञो मध्य निवेशस्यानुसन्धानादाह॥ अनुसन्तिवेचित्र्यादिति॥ यदधिकरणत्वभिसाधनुरोधेन अनुसन्तिसंकोचस्यावश्यकत्वादिति
भावः॥ अनुसन्तिसंकोचमेवाह॥ नञ्समासेति॥ द्वितीयेपि॥ द्वितीयलक्षणेपि॥ तदेव तद्धितार्थतोऽएव॥ नञ्समासेन निर्वाहे नञो
मध्यनिवेशस्याकिंचित्करत्वेन स्यादत आह॥ वक्ष्यमाणेति॥ प्रतियोग्यनधिकरणेत्यादाविति॥ आदिना साध्याभाववद्वृत्तित्वमिसाध्य
परिग्रहः॥ यद्यपि किंचिदिति॥ निरूपकत्वेऽन्वितम्॥ साध्यवद्भिन्ने न तावच्छेदेन॥ तेन नातिप्रसंगः॥ आकाशादेरिति॥ अवच्छेदकाधिकरणसं
बन्धेनैवावच्छेदकत्वादिति भावः॥ विलक्षणम्। अत्यापत्तेर्यद्विधर्मं उक्तमवच्छेदकं तद्विलक्षणम्॥ स्वीकार्यमिति॥ परंतु हेत्वधिकरण
वृत्तित्वस्यावच्छिन्नत्वे हेत्वधिकरणवृत्तित्वाभावो यथाभावरूपतया तदस्वीकारेऽपि न दोष इति नवीनैरुक्तम्॥ तदसत्। तथासति सा
ध्यावेवतादृशाभावप्रसिद्धिसंभवेऽसंबंधान्तरेण वर्तमानपर्वतानुधावनस्य दीधितौ वैयर्थ्यापत्तेः॥ इत्यभिप्रायेणेति॥ यथाभिधानादि
स्वविशेषणान्वितम्॥ तथा चोक्तं यत्र विशिष्टसत्त्वेऽप्यस्फुटत्वमिति भावः॥ विशिष्टस्यातिरिक्तत्वे वाद्विनापि विशिष्टाधिक
रणतया अतिरिक्तत्वस्यावश्याभ्युपेयत्वादाह विशिष्टस्येति॥ तत्कालीनसात्त्वाविषवक्षणसंबन्धेन प्रकारान्तरेणाप्याप्तिनिरूपणासं
बन्धद्वयस्य स्वरसादाह॥ कथञ्चिदिति॥ तेनुद्ध्यमेवगुणादेः साध्यदृष्टान्तासिद्धिः॥ तत्रापि द्रव्यत्वे गुणावच्छेदेन पृथिवीत्वसामानाधिक

प०टी० ३२

रणाभावो विषयस्य स्वरूपसंबंधस्य तदाह ॥ स्यादित्यादि ॥ गुणेति ॥ निर्गुणे सत्यर्थः ॥ तेन जन्यगुणे कालिकेन वृत्तित्वेऽपि न क्षतिः ॥ एवं
सत्तायां भिन्नत्वादिप्रतीतेरन्यथोपपादनेन सामानाधिकरण्यस्याव्याप्तिर्नाभावे ॥ अवच्छेदकताभावस्येति ॥ एवं प्रकारेण मूलावच्छेदेन
वृत्तेः संयोगाभावस्याव्यवच्छेदः ॥ निरधिकरणकयोरभाववृत्तित्वयोर्नैयायिकैरनभ्युपगमात् अत आह ॥ कदाचिदिति ॥ तदभ्युपगम
इत्यर्थः ॥ दीधितावपि प्रसंगाच्चेति ॥ यद्यप्यतीन्द्रियहेतावतीन्द्रियसाध्यघटितसाध्यसामानाधिकरण्याभावस्यासिद्धौ तदधिकर-
णभिन्नत्वस्याप्यसिद्धिरिति कथमयमपि प्रसंगस्तथापि अतीन्द्रियसंगानिर्णयेऽप्यतिप्रसंगसंदेहो दुर्वार एवेत्याशयः ॥ व्याप्योपायमेव
प्रमाणाभावेनोक्तस्थले सामानाधिकरण्याभावस्यासिद्धेः ॥ अनुमानस्य च ॥ गगनादिसंयोगः अव्याप्यवृत्तिः संयोगत्वादित्य-
पि संयोगवृत्त्यनुमानस्य च ॥ ऐन्द्रियकसंयोगस्यैव संयोगत्वावच्छेदेनाव्याप्यवृत्तित्वग्रहादतीन्द्रियसंयोगस्याप्यनुमानसिद्धेरत आह
किं चेति ॥ केवलस्यातःप्रमाणात् ॥ अनुमानादितीति ॥ आकाशाभावः गुरुत्वाभाववद्वृत्तिः वा स्यादित्याशङ्क्य रूपाभाववत् ॥ व
नुमानादेव इत्यर्थः ॥ तत एवानुमानादेव ॥ इदमिति ॥ इदं च कालिकविशेषणतया समवायाभावादिविशेषणतातो वैलक्षण्यपर्य-
वसायी क्रमः ॥ ननु स्वरूपसंबंधे कालवृत्तौ कालतादवेवत्वस्य सिद्धिरत आह ॥ संबंधांतरेणेति ॥ एतेन अवृत्त्यभावस्यान-
वच्छिन्नत्वेऽतिरेकेन ॥ ननु गगनादिरूपावृत्त्यभावस्यानवच्छिन्नत्वेऽपि महाकालरूपावृत्त्यभावस्य कालावच्छिन्नत्वमेव स्यादत आ- राम
ह स्वेन संयोगादिघटितेति सत्त्व आह ॥ तादात्म्येति ॥ वृत्तिनियामकसंबंधेनावच्छेदकाधिकरणसंबन्धस्यैवावच्छेदकत्वादिति भावः ॥ ३२

अत्राधेयतेति ॥ अधिकरणभेदेन भावभेदाभावादिति भावः ॥ आश्रयवृत्तित्वेन ॥ रूपादिवृत्तित्वावच्छेदेनेत्यधिकरणवृत्तित्वे
छे२ समवेतत्वावच्छेदेन तद्भावइति । सातत्त्वेन ॥ तद्भावेति ॥ तथा च भूमिसंयुक्ताभावे तदधिकरणावच्छिन्नत्वाभावप्रयुक्तो भेदा
भावस्तत्राप्यस्तीति भावः ॥ अतिप्रसंगादिति ॥ समवेतसंयुक्ताभावे वह्निवृत्तित्वावच्छेदेनायोगोलकावच्छिन्नत्वस्य सत्त्वे
पि नीलादिवृत्तित्वावच्छेदेन तद्भावसत्त्वेनोभयाभावसत्त्वादिति भावः ॥ न दोषइति ॥ कालो घटवानप्रत्यादिसत्त्वेऽपि परमाण्वव
च्छेदेन प्रत्यक्षवर्तमानकालवृत्तित्वाभावे कालस्यानवच्छेदकत्वात् लक्षणसमन्वय इति भावः ॥ स्वनिष्ठत्वं स्वावच्छिन्नवृत्तित्वे वि
शेषणमिति मूले एणसंकृते ॥ नचेति ॥ ननु भूमवद्धस्वइति ॥ तथा च सुवृत्तित्वस्यानवच्छेदकत्वं विवक्षणीयमिति भावः ॥ अ आ॰प॰४
त्र परे इति मते ॥ गुरुचरणा इति दूषयन्तीति शेषः ॥ अव्याप्तिरिति ॥ हेतोः साध्यवत्कालादिवृत्तित्वेन स्वनिष्ठसाध्य
वद्वृत्तित्वाभावाप्रसिद्धेरिति भावः ॥ ननु कालादौ कालिकादिसंबंधेन वृत्तित्वेपि हेतुतावच्छेदकीभूतसंबंधेनावृत्तित्वपा
नाप्रसिद्धिरत आह ॥ तत्रैसादि ॥ तस्य परमाणुत्वाभावस्य ॥ तादृशेति ॥ दैशिकसंबंधघटितेत्यर्थः ॥ ननु परमाण्वव
च्छेदेन तत्र कालादिवृत्तित्वाभावसत्त्वान्नाप्रसिद्धिरत आह ॥ परमाणोश्चेति ॥ संबंधेनापीति ॥ अपिना दैशिकसंबंध
समुच्चयः ॥ तस्य परमाणुत्वाभावस्य ॥ अवृत्तेरिति ॥ कालिकसंबंधेन कालएव वृत्तेः परमाणोरकालव[illegible]त्वेन

33

भ०टी०
३३

तेनतत्रावृत्तेरिति॥ अर्थः॥ तदेव विवृणोति॥ परमाणोरिति॥ तथा चावच्छेद्याधिकरणासंबद्धतया परमाणोर्नावच्छेदकत्वमिति
भावः॥ अतिरिक्तत्वस्येति॥ संयोगाद्यतिरिक्तस्येत्यर्थः॥ संयोगादीनामपि हेति असयनिष्ठामकत्वे॥ इह घटः भूतले घट इत्यादिप्रतीति
येलक्षणमनुपपन्नमित्याशयेनाह॥ यदि चेति॥ तथाप्रतीतिः इदं हेति प्रतीतिः॥ न चेदं हेति॥ इदं हेति परमाणुविशेषणमेव॥ इत्युच्यत
इति॥ तथा च नाकाशमात्रित्तिरिति भावः॥ अ ओ मित्तिरिति॥ हेत्वधिकरणावच्छेदेन स्वस्मिन्नसाध्यवत्त्वविगलितमलेन स्वनिष्ठसाध्यवत्त्वहि
ताभावाप्रसिद्धिः हेत्वधिकरणाकाशापूनवच्छेदेन तत्प्रसिद्धिं निरूपयति॥ आकाशस्येति॥ गुरुचरणोक्तं दूषणमुद्धरन्नाम परे
हितिमतं परिष्कृतं मतमाह॥ परे त्विति॥ सम्पातिसंतेन॥ हेत्वधिकरणस्येति॥ हेतुतावच्छेदकसंबंधेन साद्धिः॥ वह्निमान् धूमा
दित्यादौ हेतुतावच्छेदकसंयोगेन वृत्तिमतिनो काष्ठादेः हेत्वधिकरणावच्छेदेन वर्त्तमानस्य [illegible] ताभावस्यानवच्छेदकं धूमा
धिकरणमितिलक्षणसमन्वयः॥ पार्थिवपरमाणुवृत्ताविति॥ अनेन पार्थिव = वह्निमत्संयुक्त = परमाणोरवच्छेदकत्वमुक्तम्
तादृशेति॥ हेतुतावच्छेदकसंबंधेन वृत्तिमदित्यर्थः॥ एवमपीति॥ आकाशवृत्तेः तादृशघटत्वाभाववर्त्तमानस्याकाशत्वाभाववद्वृत्तित्वात् भावस्य ४
नवच्छेदकं हेत्वधिकरणघटादीति भावः॥ उक्तक्रमेण॥ पर्वतीयधूमस्य कालिकसंबंधेन महानसवृत्तितया पर्वतीयधूमवृत्ति
वह्निमत्संयुक्तत्वाभावावच्छेदकत्वं हेत्वधिकरणमहानसस्येति दीसा॥ इदमुपलक्षणम्॥ वह्निमान्धूमादित्यादौ धूमादिसंयो राम
गेन कपालादेर्घटादिनिष्ठवह्निमत्संयुक्तत्वाभावावच्छेदकत्वेन सुपिद्धमयमस्या॥ अवेत्ति होति॥ इदमप्युपलक्षणम्॥ ३३

पालादेश्च संयोगेन तद्वत्त्वमिति ॥ केनपानाव्याप्तिरित्यपि द्रष्टव्यम् ॥ विशेषरूपेण संबंधतामुपगमे स्वीयरूपसंबंधेन हेतौ वृत्त्यपरमाणु
त्वाभावादव्याप्तिरसंभवात्त आह ॥ यद्वेति ॥ यद्वा ॥ वह्निमान् धूमादित्यादौ संयोगेन वृत्तिमति नौकादौ द्रव्य=त्व=वधिकरणेन वर्तमानस्य वह्निम
हेतुसंबंधेन॥ कार्यं तु सत्तिनियतस्वरूपेति॥ उत्पत्तिसंबंधावच्छिन्नकार्याभाववैनेत्यस्य स्वरूपइत्यर्थः॥ तेन नानुगमः॥ अत एव वाग्रे साध्यतावच्छेदकाव
च्छिन्नस्य विशेषणतामतो ज्ञानाभावस्येति वक्ष्यति॥ अक्षालनाद्धीति न्यायेन प्रतियोगित्वघटितभावस्येवानौचित्यमुक्तं साहह॥ केचित्तिति॥ ॥
वाहृत्तवृत्तित्वस्य स्वरूपतोऽविरोधित्वादाह॥ विरोधित्वं चेति॥ ज्ञाननिष्ठेति॥ इदं च स्वरूपकथनं ज्ञाननिष्ठविरोधितायास्तद्धर्मस्येवावच्छेदकतया
तादृशवृत्तित्वस्यानवच्छेदकत्वादाह॥ विषयतयेति॥ अधिकरणधर्मावच्छिन्नसाध्याभावे समानाधिकरणधर्मावच्छिन्नत्वेनासकवहितो वृत्ति
न्नप्रतियोगिताकवह्न्यभाववद्वृत्तिर्धूमइत्यादिज्ञानस्यानुमितिविरोधितया निरुक्तवृत्तित्वप्रकृतानुमितिविरोधितावच्छेदकतयाऽव्याप्ते
राह॥ अवच्छेदकतापर्याप्तीति॥ तथा चोक्तस्थले साध्यतावच्छेदकतर्माभेदेनावच्छेदकत्वस्य पर्याप्तत्वाभावादोषइति भावः॥ साध्याभाव
वद्वृत्तित्वस्य॥ तन्मात्रस्यौतयाह्णाद॥ स्वपमेवादीधितिकृतेव॥ उक्तावनीयत्वात् उक्तावपितुं योग्यत्वात्॥ तथा चैतद्दूषणस्यापि दीधितिकृ
तस्यासर्वविषयतैभावः॥ एतेनाग्रे एतद्दूषणस्यानुक्तत्वान्नादसंगतिः॥ पारिहृतेतिध्येयम्॥ प्रकृतानुमितिविरोधित्वमिति॥ प्रकृतल
क्षणे प्रकृतत्वं चानुमितिविरोधित्वमित्यर्थः॥ सद्धेतुनिष्ठसाध्याभाववद्वृत्तित्वस्यानुमितिकारणीभूतज्ञानप्रतिबंधकसमूहालंब
नज्ञानविषयत्वेनाव्याप्तेराह॥ एवं चेति॥ अमात्मकज्ञानमादायाव्याप्तेराह॥ अममितेति॥ तेन॥ अनुमितौ प्रकृतत्वाविवेशेन॥ प
घटाभाववद्वृत्तिमेयत्वमिति॥ ज्ञानस्यादसादिज्ञानस्य॥ आदिना घटाभाववद्वृत्तिर्धूमइत्यादिज्ञानपरिग्रहः॥ असंभवदितिमेय

निरुक्तविरोधित्वाभावात् ५

50

भ०टी०
५०

त्वहेतौ घटाभाववद्वृत्तित्वमेव तत्त्वमिति ज्ञानमादाय प्रथमादिहेतौ घटाभाववद्वृत्तिर्धूम इत्यादिज्ञानमादायासंभव इति भावः ॥ विशेषणान्तरे
ति ॥ सामान्यरूपविशेषणमित्यर्थः ॥ एवमपि । असंभववारणाय साध्याभाववतीत्यस्योपादानेऽपि ॥ असंभवादिति ॥ तथा चानुमितौ प्रक
तहेतुनिवेश आवश्यक इति भावः ॥ हेतुमत्तदन्तर्गतहेतुस्वरूपस्य ॥ भावार्थस्याविवक्षणात् ॥ एवमग्रेऽपि ॥ पंछ ॥ साध्याभाववद्वृत्तिहेतुत्वेन घ
टादिज्ञानस्यापि व्याप्तिज्ञानविरोधितया ताद्रूप्यहेतुत्वेन निरूढविरोधितावच्छेदकताभावस्यैव निविष्टतया हेतुत्वमिति पर्याकृतमेव ॥ व्या
प्तस्यापि ॥ निरूढावच्छेदकहेतोस्यापि ॥ तत्र साध्याभाववद्वृत्तित्वविशिष्टहेतुरूपे हेतुस्वरूपे वा हेतुतावच्छेदके ॥ अपर्याप्तिरिति ॥ तत्र
विरोधितावच्छेदके घटाभाववद्वृत्तित्वस्याप्रवेशादिति भावः ॥ उक्तेति ॥ तेन घटाभाववद्वृत्तीत्यादिग्रंथेनोक्तेत्यर्थः ॥ असंगते
रिति ॥ साध्याभाववतीत्यस्यानुपादानेऽप्यसंभवादित्याशयः ॥ अकृतव्याप्तिज्ञानस्य अनुमितिविरोधिज्ञानस्य ॥ न साध्याभाववद्वृत्ति
त्वे ज्ञानस्य न तन्मात्रवृत्तिज्ञानस्य ॥ ग्राह्याभावानवगाहित्वादिति शेषः ॥ मणिमंत्रादिन्यायेनापि न विरोधित्वमित्याह ॥ नहीति ॥
व्याप्तिग्रहादिति ॥ तथा चमस्मिन्प्रतिबन्धकभावस्यैव तत्रौढ्यापेनप्रतिबंधकतयाग्रहे तदभाव इत्याशयः ॥ अनुमितिविरो
धीति ॥ निरूढानुमितिविरोधित्वविशिष्टसाध्याभाववद्वृत्तित्वज्ञानं ग्राह्याभावावगाहितया प्रकृतव्याप्तिज्ञानविरोधीति भावः ॥ एम
सद्धेतावपीति ॥ सद्धेतुनिष्ठमधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वस्यानुमितिविरोधित्वादिति भावः ॥ इत्यरथा तु ॥ साध्याभा ५०

ववद्वृत्तिसमानाधिकरणघटितलक्षणकरणे।। अनुमितिविरोधित्वरूपव्याप्तेः अकृतव्याप्तिपदार्थत्वे पूर्वदोषसत्त्वादाह।। तद्वेति।। साध्याभाववद्वृत्तित्व
मात्रस्योक्तव्याप्त्यनुमितिविरोधित्वाभावादित्व्याप्तिः साध्यतावच्छेदकावच्छिन्नसांतर्भावेऽसंभवदुक्तत्वादाह।। तथा चेति।। तत्प्रतियोगितावच्छे
दकेति।। सद्धेतौ व्यधिकरणधर्मरूपप्रतियोगितावच्छेदकमादायलक्षणसमन्वयः।। असद्धेतौ साध्यतावच्छेदकत्वेन मानुपपत्तिरित्यः
इत्यतः कारकेति।। केवलान्वयिनि चैत्रमात्रलक्षणस्य प्रसिद्धेर्वा।। नाव्याप्तिदोषः।। नो व्याप्तिरूपदोषः।। सर्वेऽपि भ्रमेमानाभावेनाव्या
प्तिरूपदोषोऽस्त्येवेत्याशयेनाप्युमितिस्वरूपस्य।। ।।अपसेवपदस्याविरूत्तिदानायव्यमिकामारचयति।। साक्षासमिति।। तस्यापि। व्यधिकरणध
र्मावच्छिन्नाभावस्यापि।। सज्जातीयत्वात्।। समानाधिकरणधर्मावच्छिन्नाभावसजातीयत्वात्।। समानासमाने सत्वकर्मधारयेऽसंगतिरत आह
समानं चेत्यादि।। स्थलानुगमदोषः।। स्थलानुगमरूपदोषः।। साध्याभाववद्वृत्तेस्तादृशप्रतियोगितावच्छेदकव्यक्तिसत्वे इति लाभा
ऽभावे वेनासंभवरूपो दोष इति यावत्।। भेदकूटमवेशणेत्याह।। वस्तुतस्त्विति।। वन्यास्वरूपेति।। वह्निसाध्यकाभिप्रायेण।। जलवृत्तित्वे
ति।। द्रव्यत्वसाध्यकाभिप्रायेण।। असंभवदिति।। साध्यतावच्छेदकावच्छिन्नाभावो गुरुधर्मावच्छिन्नसाध्यकेऽव्याप्तिः साध्यतावच्छेदक
समनियतप्रतियोगिताकाभावो न चतादृशतादृशभयाभावादिकमादायवह्न्यादिसाध्यकेऽव्याप्तिरित्याशयः।। अभावमात्रस्यैव
संबंधांतरेणावच्छिन्नाभावमादायासंभववारणायाह।। देशिकविशेषणेति।।तेनापर्हिच्चित्तनिवेशनेन।। मेधे साध्यवच्छिन्नाभाव

51

भ०टी० स्यापोगोलक्षान्यत्वाम्नायस्य च लक्षणघटकत्वाप्याह॥ संयोगेवेति॥ व्याप्यवृत्तितेति॥ एवंच कपिसंयोगाभाववानेतद्वृक्षा इत्यादावव्याप्ति
५१ गारणाप्रसक्ताभावे व्याप्यवृत्तितावच्छिन्नप्रतिषेधस्य॥ अधिकरणेत्यादि॥ आसन्नीति शेषः॥ अधिकरणतायाः संबंधविशेषनियामकोगौरवादि
ति भावः॥ ज्ञानवानयमहाकाल इत्यादौ स्वविरुद्धतया व्यभिचारित्वसंपादनायाह॥ आत्मसमहाकालेति॥ सामान्यतोधूमसंयोगत्वावच्छिन्न
प्रतियोगिताकस्य धूमसंयोगाभावस्यैकाभावस्याभावादाह॥ तद्धूमसंयोगस्येति॥ व्याप्यवृत्तेति॥ प्रतियोगिवैयधिकरण्यघटितव्याप्तिघटके
त्यर्थः॥ तद्धूमसंयोगस्य गुणत्वेन तथा गुणसामान्याभाववत्वाभावात् सकलमिसाधारणेनाह॥ गुणसामान्याभावेत्येति॥ विशिष्टाभावेति॥
न विशिष्टस्याभावे इत्यर्थः॥ यत्किंचिदितीति॥ तथा च वह्न्यादिरूपयत्किंचित्प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्याभावाधिकरणे प्रतियोगिताकत्वाभावः॥ तद्
णाभावस्याव्याप्तत्वादिनाघटाद्यभावस्य॥ एतदर्थमेवाकेवलान्वयिन्यव्यासिद्धिवारणार्थमेवा॥ नासेवोपपादयति॥ अन्यथेति॥ प्रति
योगितेति॥ यादृशप्रतियोगितेत्यर्थः॥ तद्वच्छिन्नेति॥ तद्वच्छिन्नोपस्थापकत्वप्रतियोगिताश्रयस्य इत्यर्थः॥ ज्ञेयत्वावच्छिन्नघटादिसिद्धा
तदनधिकरणत्वस्याप्रसिद्धेराह॥ इत्थं चेति॥ उक्तेति॥ प्रतियोगिव्यधिकरणाद्यत्यर्थः॥ एतद्भावभेदाभावाधिकरणे तद्भाववृत्ति
त्वस्य हेतौ सत्त्वान्नातिव्याप्तिरित्याह॥ अभावमात्रेति॥ केचित्तु एतन्मते नतु लेएतद्भावभेदाभावस्य तद्भावात्मकत्वेपि गुम
भावत्वरूपप्रतियोगिसामानाधिकरण्याभावेन लक्षणघटकत्वानामितिसंगतं॥ केवलान्वयिनि अधिकरणधर्मावच्छिन्नाभा ५१
ग१

वस्य प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यप्रसिद्ध्या प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसमानाधिकरणाभिन्नत्वेन तथा दृश्यलक्षणासहं‍ड़
अत्र प्रकारकप्रमाविशेष्यत्वाभावस्य स्वं देशप्रतियोगिसामानाधिकरण्यात् कालत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च विवक्षितत्वात् अभाववत्
भावो दाह ॥ अत एव भाववृत्ति ॥ तत्त्वाभाववादे रूपीति ॥ पप्पिगो त्वाभाववादे लक्षणाघटकत्वप्रतियोगिसामानाधिकरण्येपादानप्रफलं च
पात्र प्रतिबिंबद्वयोपनततुपादानम् ॥ अत एव दृशीनाभावमुक्त्वा लक्षणघटकाभावमाह ॥ द्रव्यत्वाभाववादे रूपीति ॥ विशिष्टाभावासत्त्वे प्रतियो क
गीति ॥ विशिष्टाभावासत्त्वप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगी सर्वत्र ॥ निरुक्तेति ॥ भाववृत्तिप्रतियोगिसामानाधिकरण्यपने सा
दि ॥ कपिसंयोगाभावासत्त्वकतयेति ॥ अभावमात्राधिकरणकत्वादिति भावः ॥ कपिसंयोगाभाववद्भेदाभावस्य कपिसंयोगाभाववद्वृ
त्तया नातिव्याप्तिरत आह ॥ अकाष्ठाभावस्येति ॥ अत एव व्यापकत्वस्य साध्यतावच्छेदकसंबंधघटितत्वादेव ॥ अ वा प्रागेति ॥
तादृशाभावाप्रसिद्ध्या सादि ॥ व्यापकताघटकसंबंधेनाभावविवक्षणे व्यापकतायां प्रतियोगिवैयधिकरण्यानिवेशेन कपिसंयोगाभावा
देर्लक्षणाघटकतया व्याप्यवृत्तीसादिविशेषणस्य वैयर्थ्यापत्तिरिति सत्त्वरसादाह ॥ केचित्विति ॥ निर्वह्निवृत्तित्वाभावस्येति ॥ निर्वह्निवृ
त्तित्वाभावमात्रस्य सर्वत्र ॥ साध्याभावेति ॥ अधिकरणधर्मावच्छिन्नाभावसाधारण्ये सादि ॥ अभावादिति ॥ उभयवृत्तित्वावच्छिन्न
उभयवृत्तित्वप्रतियोगिकाभावस्यैव तथात्वादिति भावः ॥ वृत्तित्वस्य संयोगादि इत्यत्वे आह ॥ पूर्वलक्षणेति ॥ तादृशाभावमाह ॥ द्रव्यत्वेति ९२
त्वेन निर्धूमवृत्तित्वाभावम् ॥ दोषः ॥ अतिव्याप्तिरूप ॥ विवक्षणे चेति ॥ तद्विवक्षणे चाप्रसिद्ध्यभावेन तद्वारकविशेषणानो

52

भ०टी० ५२ चिसात्मसंबंधरूपष्टं मत्॥ समवायेन साध्यतायामिति॥ द्रव्यं पृथिवीत्वादिसाध्याविसर्थः॥ उत्काभावमत्॥ जातिसामान्याभावमत्॥ एवमग्रिमि
ष्टसत्तायाद्रव्ये सामान्यवृत्तित्वे॥ प्रतीति॥ उभाववैशिष्ट्यस्यावच्छेदकत्वावगाहिनी प्रतीतिरप्यापेतदनवगाहिनी वा स्यादित्यत आह॥ गुणेति॥ अभा
वादिति॥ समवायस्यैव गुणवृत्तितावच्छेदकत्वादिति भावः॥ अंशे आह॥ तादृशेति॥ प्रसपक्षस्य॥ वृत्त्यसामानाधिकरण्यस्य॥ व्यापकत्वेपीति॥ इदं
व्यापकत्वे प्रतियोगिवैयधिकरण्यानिवेशाभिप्रायेण॥ एतेन कालिकसंबंधावच्छिन्नकालत्वाभावाभावस्य कालत्वाभावानधिकरणे दृश्य
त्वे द्वित्वेन महाकालवृत्तितया कथं कालिकत्वया कालत्वाभावस्य महाकालमेत्राभावव्यापकत्वमिति परास्तम्॥ संयोगेन द्रव्यस्य व्याप्यवृ
त्तितामेते प्याह॥ रूपवानड् इति॥ व्याप्यवृत्तेरिति॥ यद्यपि सामान्यतो व्याप्यवृत्तित्वानिवेशे संयोगेन हेतुतायां तादृशाभावीयहेतुता
वच्छेदकसंबंधावच्छिन्नत्वेन विवक्षणीयप्रतियोगितासिद्धिः तथापि किंचिद्व्यक्तिवृत्तित्वघटितत्वन्निवेशे कपिसंयोगाद्यभावस्यापि तथात्वे
नातिव्याप्तितादवस्थ्यं तथापि यत्किंचिद्व्यक्तिवृत्तित्वघटितव्याप्यवृत्तित्वविशिष्टस्याभावस्य व्यापकविवक्षणान्न दोषः॥ तद्भिन्नमिह
स्य कपिसंयोगाभावस्य रूपाभावव्यापकत्वादिसाध्यमर्थः॥ हेतुतावच्छेदकसंबंधावच्छिन्नत्वे प्रतियोगितावकत्वस्याभावविशेषणा॥ एते
नैव स्वरूपसंबंधेन वृत्त्यभावधारणासंभवे हेतुतावच्छेदकसंबंधावच्छिन्नत्वाप्रतियोगितेसे तादृशविवक्षणमफलमत आह॥
संयोगेनेति॥ धूमाभावव्यापकतयेति॥ न च स्वरूपसंबंधेन वृत्त्यभावस्य तथात्वेपि समवायेन व्यधिकरणधर्मावच्छिन्नाभावात्मकस्तो राम
न धूमाभावस्य जातीयत्वमिति नातिव्याप्तिरिति वाच्यम्॥ समवायेनेपि समानाधिकरणधर्मावच्छिन्नाभावस्य न व्यधिकरणधर्मा ५२

वच्छिन्नाभावासत्त्वमिति सांप्रदायिकमतावलंबनेनाति व्याप्तिसंगतेश्च हेतुतावच्छेदकसंबंधेनेत्यादेः फलमाह ॥ संयोगावच्छिन्नेति ॥
व्यभिचारित्वसंपादनायाह ॥ विषयेति ॥ प्रतियोगिवैयधिकरण्यं विनापि लक्षणमते व्यापकत्वस्यैव घटतया व्याप्यवृत्तेरित्यादिविशेषणवैयर्थ्यमित्य
स्वरसादाह ॥ केचित्त्विति ॥ अत एव ॥ तत्रेत्यादिवक्ष्यमाणग्रंथे ॥ प्रतियोगितावच्छेदकीकृत्य ॥ प्रतियोगितावच्छेदककोटौ निवेश्य ॥ तेन प्रतियोगि
तावच्छेदकतावच्छेदकस्यापि प्रतियोगितावच्छेदकत्वोपपत्तिः ॥ समनैयत्याभावे अपमते केवलान्वयिन्यव्याप्तिरसंभवा इत्याह ॥ व्यतिरेकीति ॥ अयं
घटः एतद्घटत्वादित्यादौ घटत्वादिविशिष्टसमवायादिसंबंधावच्छिन्नकालिकसंबंधावच्छिन्नप्रतियोगितायाः स्वरूपसंबंधात्मकयो
रैक्येन तदवच्छेदकमात्रस्यैव लक्षणे छेदककालिकसंबंधेन हेतुव्यापकतावच्छेदकत्वादतिव्याप्तिरित्यस्वरसादाह ॥ केचित्त्विति ॥ ॥ संवलितम्
मिश्रितम् ॥ तथा च वृत्तिमत्त्वेन हेतोर्व्याख्यानं प्रयोजनं नाहेति फलितम् ॥ आसादेः वर्त्तमानस्येत्यादिग्रंथेन वृत्तिमत्त्वे हेतोर्व्याख्यानं प्रदर्शि
तमिति न तद्वैयर्थ्यमिति भावः ॥ दीधितौ न वृत्तिरित्यस्यासंभवदर्थत्वादिति निराकरोति ॥ अत्रेति ॥ कपिसंयोगाभावस्य केवलान्वयित
या व्यधिकरणधर्मावच्छिन्नाभावस्यैव तत्र वृत्तित्वाभावस्य वृत्तिमद्वृत्तितया कपिसंयोगस्याव्यापकत्वाभावादाह ॥ कपिसंयोगाभाववानि
ति ॥ स्वाधिकरणावच्छेदकसंबंधेनेति ॥ एवं च साध्यव्यापकत्वमपि तेनैव संबंधेन बोध्यम् ॥ तेन वह्निमान् पर्वतत्वादित्यत्र कालिकसंबंधेन वह्नि
व्यापकतावच्छेदकं पटघटत्वादिति तद्वच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकाभावस्य समवेतत्वाभावस्य घटसंयुक्तादिवृत्तिरूपनिष्ठस्य हे

भ०टी०
५३

तावत्त्वेऽपि न क्षतिः॥ साध्यव्यापकतावच्छेदकसंबंधेनेति॥ वाकारेणाच्छा पं तेन पूर्वकल्प एवाभिमतः॥ संयोगेन हेतुत्वे अधिकरणधर्मावच्छि-
न्नेतरद्रव्यवृत्तित्वाभावस्यैव वृत्तिमद्वृत्तित्वं च द्रव्यत्वमात्रसंयुक्ताभावेन समानाधिकरणधर्मावच्छिन्न तादृशाभावस्य तथात्वादित्याशयेनाह॥
पर्वतरूपादिसत्त्वेति॥ इत्यर्थः॥ इति फलितार्थः॥ विवक्षणादिति॥ यद्यपि व्याप्यत्वदलेऽपि तत्तत्प्रदानेऽतिव्याप्तिरेव भवति न तत्त्वाभावमादाय
व्याप्तिस्तथापि तत्र तत्त्व सद्रूपत्वेऽव्याप्तिरुक्ता आलोकावृत्त्यभावप्रतियोगितावच्छेदकत्वे तदनिष्टापत्तेः साध्याभाववद्वृत्तित्वं व्याप्य
त्वात्तत्र सदानुपादानेऽपि न तन्मादाय व्याप्तिरत आह॥ आलोकावृत्तित्वेति॥ ननु प्रथमदले तदुपादानेऽपि तत्तदंतर्गत अधिकरणधर्माव-
च्छिन्नसाध्याभाववद्वृत्तित्वे आलोकावृत्तित्वस्य वच्छिन्नाभावप्रतियोगितावच्छेदकत्वेनाव्याप्तिरस्त्येवेत्यत आह॥ तथा च तस्यादि॥
तथा च अधिकरणधर्मावच्छिन्नाभावस्य तत्र साध्याभाववत्त्वेनोपादाने व्याप्यत्वदलेनैव धारणं समानाधिकरणधर्मावच्छिन्नाभावस्योपादा-
ने च व्यापकदलेनैव वारणमिति भावः॥ द्वितीयदले तत्र सद्रूपावृत्तिमाह॥ व्याप्यत्वान्निति॥ तत्रेदंनीति॥ तथा च यत्प्रतियोगिता व्याप-
कं यत्साध्याभाववद्वृत्तित्वे तत्साध्याभाववद्वृत्तित्वे व्यापकत्वप्रतियोगितावच्छेदकत्वं तादात्म्यात्तादृशत्वं व्याप्तिरिति भावः॥ घटत्वेन त-
त्वावृत्तिसाध्याभाववद्वृत्तित्वेन घटाभावयोरैक्येन घटसाध्याधारणप्रतियोगितावच्छेदकत्वस्य साध्याभाववद्वृत्तित्वेऽसंभवाघत एम
प्रतियोगिते साध्याद्यवद्वृत्तित्वेन घटाघभावएव प्रसिद्धः इत्यत आह॥ तादृशेति॥ आत एव॥ गुरोर्द्वैवच्छेदकत्वादेवाधिकरणस्य त्वे न ५३

स्येति॥ तादात्म्यत्वं च तादात्म्यस्वरूपमेव प्रदर्शितादात्म्यमपि घटादिस्वरूपं न तु तद्वृत्तिरसाधारणो धर्मः ४॥ एवं विषयतात्वमपि विषयतास्वरूपं विष
यतात्वमपि स्वरूपसंबंधविशेषो न त्वतिरिक्तमिति साधायष४॥ अत्र तादात्म्यादौ घटादिस्वरूपत्वेन द्वितीयकल्पे समानाधिकरणपदे तृतीयकल्पे च
निहवृत्तिपदद्वयेपि तादृशाभावोऽप्रसिद्धः ४ घटत्वस्याप्यभिन्नतियोगितासमानाधिकरणतया घटस्यैव ततोऽस्मादिवृत्तित्वे स्वरूपत्वेन घटत्व
स्य वृत्तित्वेन तयोर्वृत्तत्वेन तत्साध्याभाववद्वृत्तित्वलाभादतिरिक्तस्य समानाधिकरणवृत्तित्वे वृत्तिधर्मावच्छिन्नप्रतियोगिताकतया घटत्वेन तादृशवृत्ति
त्वाभा = वृत्ति = त्वस्य लक्षणाघटकत्वात्॥ यदि च विरुद्धघटत्वपटत्वाभ्यां तादृशवृत्तित्वरूपतादात्म्याभावो लक्षणघटकः इत्युच्यते तथापि तद् क
धर्मस्वसमानाधिकरणधर्मत्वत्र्यधर्मद्वयस्यैवास्तु अत्रैव वृत्तित्ववृत्तिधर्मत्वत्र्यधर्मद्वयस्यैवास्तु धर्मत्वं च वृत्तिमत्त्वं विरुद्धघटत्वपटत्वयोः ४ काप्यवृत्ति
तया धर्मत्वाभावेन तत्त्वलाभाभाववद्वृत्तित्वलाभातिरिक्तधर्मावच्छिन्नप्रतियोगिताकतया विरुद्धघटत्वपटत्वाभ्यां तादृशतादात्म्याभावसत्त्व
लभत्वात्॥ न च विरुद्धयोरपि स्वस्याधिकरणे वृत्तिमत्त्वमेवाधिकस्यानिवेशनादिति वाच्यम् तथाप्यसिद्धस्य गुणेरनवच्छेदकत्वस्याऽऽगतो
च्छिन्नत्वस्य स्वरसतो लाभः॥ आहुरिति॥ एतन्मतेऽपि वृत्तिमद्वृत्तिपदस्य अर्थस्याभिप्रायेणाह॥ वस्तुत इति॥ तादृशवृत्तित्वं विषयकत्वमिति ला
विषयतास्यैतद्वृत्तित्वातिरिक्तत्वे सह अन्यसंबंधमेयत्वादिसाध्यकस्थले हेतौ साध्यकस्थले हेत्वन्तराभाववद्वृत्तित्वादिसमनियतत्वलक्षणत्वे वृत्तित्वे
त्वावच्छिन्नाभावसमसंख्यत्वेऽपि साध्याभावस्योपलक्षणतया निवेशेन वस्तुगत्या साध्याभावाधिकरणस्याविषयतया महानसवृत्तित्व
त्वादेर्नातिरिक्तत्वसिद्धिरत आह॥ स्वाविषयत्वेति॥ वृत्तिमद्वृत्तिपदस्येति॥ न चैवमपि समानाधिकरणेनेत्यस्य वैयर्थ्यमेव वृत्तित्वेन घटा

54

म०टी०
५४

तावच्छेदकेवलान्वयिनि लक्षणगमनादिति चेन्न। तादृशस्य न विषयतया हेतुतापर्याप्त्यधिकरणतापत्तेरपि वृत्तितासम्बन्धतया साध्याभावरूपेणापि

शेषाभावानभ्युपगमेन वृत्तित्वेन घटाद्यभावस्यादाय लक्षणगमने घटत्वपटत्वोभयाभाववच्छिन्नाभावसंसर्गेण साध्यसामानाधिकरण्येन लक्षणार्थ

स्यात्। साध्याभावरूपेणाविशिष्टो यो भावो यत्र चवह्निमान् धूमादित्यादौ वृत्तित्वेन पर्वतवृत्तित्वे धूमाभावेन साध्याभावाधिकरणवृत्तित्वे तद्वृत्तित्वस्य साध्या

नुनिष्ठप्रतियोगितावच्छेदकस्य वृत्तिताभावे पृथक् निवेशतया केवलान्वयिनि घटत्वेन तद्वृत्तित्वाघ्रभावसंसर्गाभावस्य हेतुत्वस्यावच्छेदकत्वात्। प्रतियोगिता

वच्छेदकादीति॥ आदिना साध्याभावाधिकरणावच्छेदकत्वे परिग्रहः॥ तद्वृत्तित्वस्य आलोका दृश्यमानवृत्तित्वस्य नाधिकरणे रोगे तत्साध्य आलो

कावृत्तितावच्छिन्नाभावरूपसाध्याभाववत्ताद्वृत्तित्वे आलोकावृत्तित्वादिविषयकप्रतीतिविषयत्वस्य त्वेनालोकावृत्तितावच्छिन्नाभावस्य ल

क्षणाघटकत्वादिति भावः॥ सकलमिति॥ एतेन समानाधिकरणादिपदव्यावृत्तिरपि चुलतो दर्शिता भवति यथा चैतन्न्यानुपदमेव विवेचि

तम्॥ वृत्तित्वेन घटाभावेति॥ इदं च विशिष्टस्यातिरिक्तत्वपक्षे एव अतिरिक्तत्वाभिप्रायेण॥ वस्तुतो धूमनिष्ठवृत्तित्वेन घटाभावो

वो ध्वस्तः॥ दूषणान्तरमाह॥ एतत्समानाधिकरणनाम साध्यादिवृत्तिलक्षणार्थ॥ धूमवत्त्वेन प्रमेयसाध्याभावादिकमादाय व्याप्तिर

हितेत्याह॥ वृत्तित्वे इति॥ घटादिवृत्तेरित्यस्यापि हेतुतावच्छेदकसंबंधेन वृत्तित्वे इत्यर्थः संभवति सर्वत्र साध्यदाहः॥ केचिदिति

आधेयता तु पादाने व्याप्तिरिति यदनुपादाने च संभवात् लक्षणपदस्य भयपरतया व्याचष्टे॥ लक्षणेति॥ अवृत्तिसाध्यकेति॥ इदं च एम

संबंधसामान्येन साध्याभाववत्त्वे व्यापकतावच्छेदकमभिप्रायेण॥ यदि च साध्यतावच्छेदकसंबंधेन व्यापकता घटत्वेन हासाधनतोऽभिप्रायेण ५४

साध्यव्यापकत्वाप्रसिद्ध्या नावृत्तिसाध्यके इत्यापत्तेरत आह ॥ अवृत्तिहेतुके वेति ॥ तेनावृत्तिसाध्यके साध्यव्यापकत्वाप्रसिद्ध्या इत्यासेरसंभवदु
क्तिकत्वमेवनिरंकं कनिरस्तं ॥ लाघवादाह ॥ साध्ये हेतौ वेति ॥ आकारश्च विशेषणाधिकरणस्यार्थ इति ध्येयम् ॥ नावृत्तेति ॥ साध्यता हेतुतावच्छेदक
संबंधघटितेत्यर्थः ॥ अस्ति द्रव्यानुमाने संयुक्तत्वावच्छिन्नसंयुक्तत्वाभावस्य स्वत्वात्यन्ताभावसमुदायाधिकरणनिवेशे हि संयुक्तत्वासमनियतत्वप्रति
योगिताकत्वादाह ॥ अमेयमिति ॥ पूर्ववत् ॥ हेतुतावच्छेदकसंबंधमतभेदेयम् ॥ संगच्छत इति ॥ अन्यथा निर्धूमवह्निहेतावच्छिन्नाभावस्याप्र
पादकत्वंगतत्वेनातिव्याप्त्यसंभवादिति भावः ॥ यमते एव ॥ समुदायपदव्यावृत्तिमाह नात्पूर्वमेव ॥ व्यापकप्रतियोगिताक इति ॥ अत्र
ए त केवलसाध्याभावसमुदायाधिकरणवृत्तित्वस्य ॥ एमवोनतुप्रतियोगिताव्यापकत्वविशिष्टस्य तथा सति समुदायस्य वारद्वयं निवेशा
लाभेनाग्निमत्त्वं थासंगतेः ॥ यत्तु वृत्तित्वांशे एकधा निवेशेन समुदायस्याप्येकधैवार्जनिवेश इति ॥ तदसत् ॥ व्यापकत्वस्य व्याप्य
ता व्यापकतावच्छेदकगर्भतया वृत्तित्वांशेपद्विधा निवेशस्यावश्यकत्वात् ॥ विस्तरस्त्वन्यत्र भगवानेकादेः तु संबंधे ॥ उक्त
पदं विवरणयति ॥ वह्निमानित्यादिना ॥ अत एव ॥ व्याप्यदले समुदायपदप्रदानेन पूर्वदलस्य निष्प्रयोजनत्वादेवा ॥ तर्हि पूर्वस्य व्यापकेतिक
समुदायमत आह ॥ व्याप्यदिति ॥ दृष्टान्तायोगेऽमिति ॥ एवं च दोषितत्वभावद्वयाधिकरणत्वेपी सस्याभावद्वयव्याप्यवृत्तिता निरूप
कानधिकरणत्वेत्यर्थ इति ध्येयम् ॥ यथाश्रुतार्थभंगापत्तिभयादाह ॥ वस्तुतस्त्विति ॥ रूपसामान्याभाववान् पृथिवीत्वादित्यादौ जलपद
मात्रे योग्यत्वप्रतियोगितावच्छेदकविशिष्टसाध्यवत्ताग्रहस्याहीदोषिसंबंधेन रूपसामान्याभाववत्पृथिवीवृत्तित्वाभावस्य पृथिवीत्वादौ

मं०टी० वसत्त्वेनाव्याप्तेरिदं हि ॥ तदधिकरणे इति ॥ साध्याभाववद्वृत्तित्वेऽधिकरणेद्रव्यत्वं ॥ सत्ताप्रथमविशेषकत्वं साध्याभाववन्निरूपितत्वेति ॥ तत्रा
५५ स्थले च पृथिवीत्वरूपसाध्याभावाभाववन्निरूपितसाध्याभाववन्निरूपितत्वेन पृथिवीनतदधिकरणं किंतु जलादिकमेवेति तदभावस्य
पृथिवीत्वेन हेतावव्याप्तेः ॥ साध्यवन्निरूपितसंबंधांतरेणाध्यवन्निरूपितत्वेन साध्याभाववन्निरूपितविशेषणत्वमप्रसिद्धमत आह ॥ सा
ध्यतावच्छेदकसंबंधेनेति ॥ साध्याभाववन्निरूपितमप्रसिद्धं नाध्यवन्निरूपितत्वादाह ॥ स्वरूपनिरूपितावच्छेदकविशिष्टेति ॥ साधी
नेऽन्यमते योऽकालादिगुणाधिकरणं गीकारेणवह्निमान्धूमादित्यादौ धूमाद्यधिकरणस्य कालिकादिसंबंधेन वह्न्याद्यभाववत्त्वादधिकरण
त्वासंभवादाह ॥ इत्यत्र गुणादिसादाविति ॥ दैशिकसंबंधेन साध्याभावाधिकरणत्वाप्रसिद्धेराह ॥ कालिकेति ॥ साध्याभावस्याभावे सा
ध्येतदभावस्य साध्याभावस्यैव लोकेऽपि तथादृतेऽधिकरणं जगदिति तदभावस्याधिकरणमप्रसिद्धिः साध्याभावस्येव वृत्तिमद्वृत्ति साध्या
व्याप्तेरत आह ॥ आकाशवृत्तीति ॥ व्याप्यवृत्तित्वं च तन्निरूपकत्वम् ॥ विशेषणमिति ॥ अधिकरणे सादिं ॥ अत एव ॥ व्याप्यवृत्तितानिरूप
कत्वस्याधिकरणेऽनिवेशादेवा आह ॥ साध्याभावमत एवाह ॥ दीधितिकृन्मते साध्याभावाभावस्य साध्यत्वादाह ॥ संप्रदायमतदूषितं ॥ तेनेति ॥ ग
रूप२ गनस्याव्यवच्छिन्नवृत्तिकाभावत्वेन व्याप्यवृत्तित्वमिति भावः ॥ अधिकरणभेदेनाभावभेदात् संयोगसत्वादित्यादौ संयोगाभावसंबंधस्य
पः ॥ तदुक्तमावेन संगृहीतः किंचित्तद्घटितत्वसमानाधिकरणे सादिव्याप्यवृत्तित्वमितिभावेनाह ॥ वस्तुतस्त्विति ॥ संयोगेनवह्न्यादिसाध्य राम
के संयोगसंबंधावच्छिन्नतत्तद्व्यक्तिवृत्तिताव्यवच्छिन्नप्रतियोगिताकतदधिकरणत्वं गुणादावेव प्रसिद्धमत आह ॥ तत्प्रत्यवृत्तीति ॥ तत्पदकीम्. ५५

तमिति॥ नन्वत्र व्यापकत्वं साध्यतावच्छेदकताघटकसंबंधेन वाच्यम्॥ अन्यथा धूमवान्वह्नेरित्यादौ जन्यत्वावच्छिन्नाभावस्यापि लक्षणघट
कतयातिप्रसंगात्॥ तथा च वह्निधूमोभयवान्धूमादित्यत्र व्याप्तिः॥ तादृशपर्याप्तिसंबंधेनोभयत्वस्य प्रतियोगिताव्यापकत्वादिति चेन्न॥ सार्वभौ
मतेउभयत्वस्यैकविशिष्टापरत्वरूपस्य पर्याप्तिभिन्नसंबंधेनैव साध्यतावच्छेदकत्वेनादोषात्॥ उक्तेति॥ निरुक्तैकरूप्याभावेप्यसाहि॥
यद्यपि घटत्वाभाववत्त्वादिना साध्यतायां घटत्वादिहेतावपि प्रतियोगितायां साध्यतावच्छेदकव्यापकत्वविवक्षणप्रयोजनं संभवति पृथिवीत्वादि
व्याप्ये हेतुभेदेन नानाघटसामान्यतद्घटत्वाभावादिघटितकूटाधिकरणाप्रसिद्धेस्तथापि साधनसामानाधिकरण्यविशेषणेन तत्संभवे
इति तदुपेक्षणेनाह॥ साध्याभावस्येति॥ वाच्यम्॥ तत्प्रतियोगिव्याप्तिमत्त्वेन वाच्यम्॥ वह्नित्वावच्छिन्नेति वह्न्यभावविशेषणम्॥ अभाव
त्वमेव तादृशसाध्याभावप्रतियोगितायाः अपि अभावत्वरूपपर्यालिंचितं स्वच्छेदकावच्छिन्नप्रतियोगितात्वेन साध्यतावच्छेदकसमनैयु
त्येनोक्तरीत्या व्याप्तेर्वारणमशक्यमत आह॥ यद्भावीयेति॥ यद्धर्मावच्छिन्नाभावीयेत्यर्थः॥ अभावत्वावच्छिन्नप्रतियोगिताकत्वेन घ
टत्वाद्यभावत्वावच्छिन्नाभावीयेति भावः॥ घटत्वेन वह्न्यभावस्य वह्नित्वेन घटाभावाद्यभिन्नतया वह्नित्वावच्छिन्नघटादिनिष्ठप्रतियोगि
तायाः अपि घटत्वेन वह्न्यभावीयतया तत्त्वेन वह्नित्वादिसमनैयत्यसमत आह॥ यत्किंचिदिति॥ तेनेति॥ यथाश्रुतेतत्त्वच्छिन्नपर्यवसितायाः प्रतियो
गितायाः अनुगतवह्नित्वसमनैयत्येनासंग्रहः स्यादिति भावः॥ नञर्थस्य घटत्वेत्वेति॥ घटत्वावच्छिन्नप्रतियोगितायाः अभेदस्य भिन्ने वाच्यः
त्वात्तत्रापि सत्त्वादिति भावः॥ ननु पृथिवीसमवेतत्वाजन्यत्वेपत्वादित्यत्रातिव्याप्तिः॥ गुणेतरत्वावच्छेदकतया पृथिवीसमवेतत्वावच्छिन्नाभा

56

म०टी०
५६

मायासिद्ध्यासमवेतत्वावच्छिन्नाभावस्य साध्यतावच्छेदकसमनियतप्रतियोगितावच्छेदकत्वाभावेन व्यधिकरणधर्मावच्छिन्नसाध्याभावस्यैव लक्ष्य
णघटकत्वादित्याह॥ पृथिवीति॥ प्रतियोगितेति॥ पृथिवीसमवेताभावसमवेताभावयोः समनैयत्यादिति भावः॥ तयोः समनैयत्येऽपि पृ
थिवीसमवेतत्वस्य समवेतत्वासमनैयत्येनावच्छेदकत्वमेवेत्यपि न संभवितम्॥ पृथिवीसमवेतमिति [illegible]वीति॥ अत्र विषयत्वसंबन्धेन
विवक्षा॥ तेन ज्ञानप्रयातसमवेतमिति धीविशेष्यत्वमेवावच्छेदकं भूतिर्वा नवकाशः॥ लाघवादाह॥ पृथिव्यवच्छिन्नेवेति॥ समवेतत्वसंबन्धे
नेत्यादिः॥ तावच्छेदकसमानवृत्तिकेति॥ तत्वं च व्याप्यस्य वृत्तितासंबन्धावच्छिन्नतास्यतररूपेण स्वावच्छेदकानुत्पत्तित्वं नियमः॥ इत्थं च वा अत्र
लेपत्वोभयोरेव समेयत्वादित्यादौ घटत्वपटत्वोभयत्वावच्छिन्नव्यधिकरणधर्मावच्छिन्नाभावमादाय लक्षणसमन्वय इति ध्येयम्॥ व्याप्यवृत्ते
रवच्छेदकानुपगमे॥ वच्छेदकसमनैयत्यसंभवीत्यस्वरसादाह॥ वेति॥ प्रतियोगितावच्छेदकविशेष्यपर्याप्तपृथिव्यन्यत्वविशिष्टद्र
व्यत्वाभावस्याप्यसंग्रहं विशिष्टस्याप्यकसत्तावृत्तित्वादित्यस्वरसादाह॥ विशिष्टपर्याप्तेवेति॥ लक्षणासमन्वय इत्यत्राहुरिति पाठः॥ स
२ मन्वय इत्यनंतरं मिश्रसुत्रः किंचेतीति पाठः॥ स्वमूले येन प्रविवक्षणेन प्रकर्षः॥ तादृशेन प्रमेयत्वादिना व्यधिकरणस्य सिद्धिर्यासंभवः॥
अव्याप्यवृत्तित्वेऽपीति॥ नवीनमतेत्यादि॥ अत्र यावत्तामिसादि॥ अयमभिलिखितदकाधिकरणवृत्तिसाध्याभावाकृताधिकरणमधिकरणं एम
तेन विवक्षितमिसाध्यमेनाह॥ नन्वावेत्यादि॥ तत्तद्रूपस्यैव ता ह्रिपरमाणुवृत्तित्वेन तद्रूपस्य॥ वृत्तेरिस्यैतेन पृथिवीपदस्याप्रवृत्तिमुक्तौ ५६

सत्तान्यपदस्यावृत्तिमाह ॥ पृथिवीसमवेतेति ॥ समवेतत्वमात्रेति ॥ समवेताभावपृथिवीसमवेताभावयोः समनैयत्यादिति भावः ॥ पृथिव्य
चावृत्तेति ॥ समवेतत्वसंबंधेनेत्यादि ॥ सत्त्वेऽतीतिव्रेति ॥ सत्तान्यपृथिवीसमवेतत्वावच्छिन्नाभावस्य न समवेतत्वावच्छिन्नाभावसमनियतत्व
गुणत्वाभिचारादिति नाऽसिद्धिरिति भावः ॥ पृथिवीपदस्य विनिगमनाविरहेणानंतपृथिवीपरत्वे गौरवादाह ॥ पृथिवीवृत्तिपदं वेति ॥
एवं च दीधितौ सत्तान्यपृथिवीसमवेतत्वस्यसंबंधेसंबंधपाठः ॥ पूर्वोक्तरीत्येति ॥ घटत्वावृत्तिद्वित्वपटत्वावृत्तिद्वित्वादिकमादायेत्यर्थः ॥ संभव
दैकाधिकरण्यानामिति ॥ तथा च यावतामित्यादिना यथोक्तमेव संभवद्यावदैकाधिकरण्यकत्वे विवक्षितमिति भावः ॥ यथाश्रुते पृथि
वीमात्रसमवेतसाध्याभावकूटस्यैकाधिकरण्यवृत्तित्वेऽलीकत्वात्तन्निरासेन यावंतितादृशसाध्याभावकूटानि तदधिकरणत्वं वा
यमुक्तस्थले तु पृथिवीमात्रसमवेतवायुमात्रसमवेतसाध्याभावकूटयोरधिकरणाप्रसिद्ध्याऽतिव्याप्तिनिरासः तथा च तद्दोषोद्धारा
याभिरपि दुर्वारस्तदाशयेनाह ॥ तथा चेत्यादि ॥ यादृशेत्यादि ॥ तथा च परस्परैकाधिकरण्यापन्नसाध्याभावकूटाधिकरणं विवक्षित
मित्याशयः ॥ एतेनात्र यावतामित्यादिनोक्तं यथाश्रुतमेव सूक्तमित्यादि पुनरुक्तत्वेनोपेक्षितमपरविरोधश्च ॥ किंच यथाश्रुते काधिकर
ण्यापि विवक्षणेऽव्याप्त्युद्धारणेतिव्याप्तेरसंगतिः ॥ परस्परैकाधिकरण्यविवक्षणेऽतिव्याप्तेरेवं सूक्तमित्यादिनाऽव्याप्त्युद्धवनस्य चासंग
तिरिति शंकायामनवकाशमाहेतिदिक् ॥ एकत्वादिति ॥ प्रतियोगितावच्छेदकैक्यादिति भावः ॥ ननु साधनसमानाधिकरणत्वेन सा

57

भ०टी०
५८

[redacted] ध्याभावे विशेषिते स्वव्यापके सत्त्वपूर्वोक्तकृत्स्नसमसंगतं ज्ञातिसामान्याभावस्य कृत्स्नत्वप्रकारकत्वसमानविशेष्यतासामाना
धिकरण्यापादनम् आह। इत्थं चेति। आवेदितम् इति। जलत्वसमवेतत्वे ज्ञोसमवेताद्यभावान् आत्मसे कं साधनसमानाधिकरणानां कृत्स्नाधि
करणो साध्यान्याभावे हेतोरसत्त्वाद् इत्यसत्त्वोक्तत्वाद् इति भावः॥ विशिष्टस्यातिरिक्तत्वे त्वाह। गुणत्वेनेति। तत्र पत्रे साध्ये हेतौ च आदिप
दार्थद्वयेति। तथा च तत्र तादृशसाध्याभाववत्त्वप्रदर्शनाधिकरणत्वस्य कृत्स्नत्वेऽपि न्यूनवृत्तित्वेन तद्वृत्त्यभावस्य हेतौ सत्त्वात् ज्ञातिव्याप्तिदुर्वार इति भा
वः॥ ननु यावदन्तर्गतद्रव्यवृत्तित्वाद्यभावस्य हेतौ वस्तुतो इति आस्य संगतिः॥ न चैतस्य साधनसमानाधिकरणत्वाद्यभाववत्त्वाधिकरणवृ
त्तित्वत्वे व्याप्यप्रतियोगिताकत्वाभावान् न यावदन्तर्गतत्वम् इति वाच्यम्॥ आलोकादेस्तु भावे साधनसमानाधिकरणीत्वाभावात् तदधिकरणवृत्ति
त्वाभाव [redacted] त्वाभावेन तत्समाराप्तो ह्यत्रैवाभावेन वृत्तित्वाभावे तद्विशेषणानुपादानाद् इति चेन्न॥ अत एव तत्तत्त्वाभावाद् इत्यादिसाध्य [redacted] स्यापि यदस्य
त्वादिसद्धेतौ द्रव्यवृत्तित्वाद्यभावमादाय व्याप्त्यातद्विशेषणस्य वैयर्थ्यापत्तेर् व्याप्त्यसंगतेः॥ एतेन साधनसमानाधिकरणत्वस्य साध्याभाववि
शेषणत्वे साध्यतावच्छेदकप्रतियोगिताव्यापकत्वं न देयमेव। पृथिवीद्रव्यत्वे प्रकारकत्वसमानविषयत्वाद् इत्यादौ यावदन्तर्गतपृथिवीभिन्नवृत्तित्वाभा
वमादाय न तिव्याप्तिः संगच्छते॥ अस्मिन् कल्पे आलोकादेस्तु भावमादाय व्याप्त्यभावे न प्रतियोगितासंबन्धावच्छिन्नत्वे व्याप्यत्वस्याभिवेशनाद् इत्यपि एम
निरस्तम् इति कृ॥ अपि च कल्पस्य तत्र कृतं भवान् एतद् अकाण्डे नु संधेयम्॥ यावत्त्वस्य घटत्वसाध्याभावे विशेषणत्वाद् आह। फलितेति। जातौ ५७

सेव१

व्यभिचारिणस्तपक्लानुरोधादित्यर्थः ॥ नन्वेवं प्रतियोगितावच्छेदकभेदेन प्रतियोगिताभेदकतादृशप्रतियोगिताकत्वस्य भेदेन साधनसमा
नाधिकरणस्यैकस्याप्यभावस्य यावत्तादृशप्रतियोगिताकत्वाश्रयत्वाभावेनासंभव इत्यत आह ॥ तथा चेति ॥ स्वाश्रयघटकत्वसंबंधेन ॥ स्वाश्रयाभा
एवमन्येपि॰ ववृत्तिसंबंधेन ॥ ननु अभावभेदेन तादृशप्रतियोगिताकत्वस्यैक्यानोक्तेनोक्तातिव्याप्तिरसिद्धेरत आह ॥ भूतत्वेति ॥ ऐक्यात् ॥ प्रतियोगितावच्छेदकै
क्येनैक्यात् ॥ स्वाश्रयाभाववत्त्वस्य संबंधत्वाभावादाह ॥ साधनसमानेति ॥ केचित्तु पावकत्वसाध्याभावविशेषणमेवयादृशसाध्याभावस्तोमाधिक
रणं साधनाधिकरणं तादृशस्तोमवद्वृत्तित्वाभावो लक्षणार्थः ॥ उक्तस्थले च भूतत्वमूर्तत्वोभयघटितसाध्याभावस्तोमाधिकरणं न साध
नाधिकरणं किंतु प्रत्येकभूतत्वादिघटितस्यैव तादृशस्तोमवद्वृत्तित्वाभावस्य हेतावसत्त्वान्नातिप्रसंग इति किंचेत्यस्यावतारणं वदंति तन्मते
कटाक्षयन्नाह ॥ इत्थं चेति ॥ एवं विवक्षणे नातिप्रसंगवारणे चेत्यर्थः ॥ संगच्छत इति ॥ अस्मन्मते पृथिवीद्रव्यत्वप्रकारकप्रमाविष
यत्वादिसाध्ये जलावृत्त्यभावतेजोवृत्त्यभावादिघटितस्तोमाधिकरणं न किमपि साधनाधिकरणं किंतु प्रत्येकाभावादिघटितस्तोमाधिकर
णं प्रत्येकमेव जलादिवृत्तित्वाभावस्य हेतावसत्त्वादेवानतिप्रसंगे तद्विवक्षणमसंगतं स्यादिति भावः ॥ प्रतियोगितावच्छेदकावच्छिन्नप्र
तियोग्यनधिकरणवृत्तित्वरूपेण प्रतियोग्यधिकरणत्वेनाभावस्य विशेषणेऽपि नोक्तातिव्याप्तिवारणसंभव इत्यत आह ॥ उभयाभाव
वत्त्वरूपेणेति ॥ व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावसंग्रहायाद्यदलम् ॥ साध्यवृत्तीति ॥ साध्यतावच्छेदकाधिकरणवृ

भ०टी०
५८

तीत्यर्थः॥ अनेनाकाशत्वे साध्यतावच्छेदकसामानाधिकरण्यप्रदर्शनेन साध्यतावच्छेदकसमानाधिकरणीभूतेति विशेषणस्य साध्यतावच्छेदक-
व्यापकीभूतेति कथनप्रयोजनमपि दर्शितम्॥ धर्मेति॥ स्वसमानाधिकरणधर्मेत्यर्थः॥ वृत्तित्वाभावस्याव्याप्यवृत्तित्वे संयोगाभावे गुणत्वावच्छे-
न तत्त्वेन प्रतियोगितावैयधिकरण्यसंभव इत्याह॥ अव्याप्यवृत्तेरिति॥ किंचिदिति॥ स्वप्रतियोगिरूपम्॥ अव्याप्तिरिति॥ अनेन साध्याभावाधिक-
रणत्वे निरवच्छिन्नत्वविवक्षणेन संयोगस्य कूटांतर्गतस्य निरवच्छिन्नाधिकरणत्वाप्रसिद्धेरिति भावः॥ स्वसमानाधिकरणे सादिरूप(
अव्याप्यवृत्तित्वे विशेषणानवच्छिन्नवृत्तिकत्वनिवेशे बीजमाह॥ संयोगाभावस्येति॥ हेत्वधिकरणेऽनवच्छिन्नवृत्तिकत्वनिवेशप्रयोजनमाह॥ इ-
मइति॥ नातिव्याप्तिरिति॥ अव्याप्यवृत्तित्वनिवेशे संयोगत्वावच्छिन्नाभावस्य लक्षणघटकत्वादतिव्याप्तिः स्यादिति भावः॥ अव्याप्ति-
रिति॥ हेत्वधिकरणेऽनवच्छिन्नवृत्तिकत्वानिवेशे संयोगी द्रव्यादिति संयोगेन हेतुतायां संयोगसामान्याभावस्यापि हेतुसमानाधिक-
रणस्य गुणत्वावच्छिन्नवृत्तिकस्य लक्षणघटकतया तदीयानवच्छिन्नाधिकरणगुणादौ हेतुतावच्छेदकसंयोगेन वृत्तित्वाप्रसि-
द्ध्याऽव्याप्तिः स्यादिति भावः॥ अत्र द्रव्यादित्येव पाठः॥ द्रव्यत्वादिति पाठे संयोगाभावीयानवच्छिन्नवृत्त्यधिकरणे गुणादौ हे-
तुतावच्छेदकसमवायेन पक्षवृत्तित्वं तदभावस्य द्रव्यत्वे सत्त्वेनाव्याप्त्यसंगतेः॥ अनवच्छिन्नवृत्त्यधिकरणमिति॥ तादृशाभावनि- एम
ष्ठायाऽनवच्छिन्नवृत्तिता तन्निरूपकाधिकरणमित्यर्थः॥ न द्वेपक्षे चेति॥ न चोक्तरीत्या मूर्तत्वमूर्त्तत्वोभयाभावादिसाध्यकस्य ५८

र्यवद्द्रव्यत्वादिहेतौ द्रव्यवृत्तित्वाभावमादाय व्याप्तिवारणाय हेतुमेवेति वाच्यम्॥ निरुक्तप्रतियोगिवैयधिकरण्यघटितनिष्कर्षिता
दृशवृत्तित्वस्योपकप्रतियोगिताकत्वेनैव तादृशाभाववारणात्॥ ननु वह्निमान् धूमादित्यादौ धूमनिष्ठवृत्तित्वत्वादिना तादृशवृत्ति
साध्याभावमादाय सम्भवदसंगत आह॥ शेषमिति॥ तादृशवृत्तित्वातिरिक्तसमानाधिकरण्यादिकमित्यर्थः॥ एतेन निर्गलित
लक्षणार्थे साध्यतावच्छेदकसमनियते स्फटिकसंगता पृथिवीत्वसाध्यकोक्तसद्धेताविदानीं पृथिवीभिन्नवृत्तित्वाभावमादा
व
पातिप्रसंगवारणासम्भवादिति निरस्तम्॥ तस्य तादृशवृत्तित्वातिरिक्तसमानाधिकरणधर्मावच्छिन्नतया लक्षणान्तर्गत
तिदि
त्वादिकं॥ अत्रेदं चिन्त्यम्॥ पृथिव्यन्यत्वविशिष्टद्रव्यत्ववद्द्रव्यत्वादित्यत्रोक्तरीत्याऽतिव्याप्तिवारणाय निरुक्तप्रतियोगिवैय
धिकरण्यनिवेशेपि घटान्यत्वविशिष्टद्रव्यसाध्याभावमादायातिव्याप्तिर्दुर्वारैवेति॥ वस्तुतस्तु अतीतोपस्थापकत्वादुक्तरूपेणेत्या
दि॥ तथाच साध्यतावच्छेदकसमनियतेत्यनेन पूर्वोक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसमनैय
त्यमेव वक्तव्यं पूर्वोक्तविशिष्टसत्तातिरिक्तसत्तादिकं चोपेयमित्याशयमिति न कोपि दोषः॥ स्वनिष्ठेत्यादि॥ स्वनिष्ठं यत्साधनसमाना
धिकरणसाध्यतावच्छेदकसमनियतप्रतियोगिताकाभावकं तदधिकरणं यत्साधनाधिकरणं तद्वृत्तयो यावन्तः साध्या
तावच्छेदकसमनियतप्रतियोगिताकाभावाः तद्वत्त्वमित्यर्थः॥ मनोपीति॥ मनोनिष्ठं यत्सत्त्वं तदधिकरणं तादृशसाध्याभावाधि
करणमनोवृत्तितादृशयावदभाववत्त्वमनसि सत्त्वादिति भावः॥ नातिप्रसंग इति॥ कूटपदोपादानमप्येतदर्थमेव

प० टीं० ५९ अन्यथा चैवमनोगगनं चन तादृशांश्वंतद्वृत्ति अधिकरणधर्मावच्छिन्नाभावाधिकरणमनोगगनभिन्नत्वमूर्त्तत्वोभयघ
टिततादृशपावस्याभाववत्त्वस्यमनोगगनयोरभावात्तदंकुतुपृथिव्यादिचतुष्कमेवतादृशंस्वतद्वृत्तिसाभाववस्य हेतोस्तत्राद्वृत्ति
व्याप्तिः स्यात् तद्रूपोहानेचमनोगगनयोरपितादृशस्वत्वेनव्याप्तिरितिव्याप्तिःस्वनिष्ठेति॥ स्ववह्निमत्त्व॥ साध्याभावेकदेति॥ अ
धिकरणधर्मावच्छिन्नाभावात्मकेस्यादिः॥ अव्याप्तिःस्यादिति॥ स्वपदेननिर्वह्निरूपादानेतत्भिन्नवह्निसामान्याभावघटि
तसाध्याभावकूटाधिकरणंसाधूनाधिकरणभवासिद्धाभिति वह्निमद्वैगतादृशस्वंतद्वृत्तिसाभावस्य धूमादावसत्वाद्व्या
प्तिः साधनसमानाकरणपदादानेवह्निसामान्याभावस्यसाधनसमानाधिकरण्याभावेनअधिकरणधर्मावच्छिन्ना
भावस्यैवतथात्वेननिर्वह्नित्वरूपादानसंभवेनाव्याप्तिरितिभावः॥ यावद्रूपसाध्याभाव [illegible] घटितेति॥ रूपाभाव
साध्यकेयावद्रूपघटितस्यैसत्त्वादिसाध्यकेसाध्याभावघटितस्यसत्त्वात्॥ जगद्वेति॥ महानसादिभिन्नानांनिर्व
ह्न्यादिभिन्नानांचतादृशसाध्याभावानांप्यधिकरणधर्मावच्छिन्नप्रतियोगिताकानामेवधूमादिभिन्न वत्तादृ
शकूटाधिकरणसाधनाधिकरणवृत्तितादृशपावेदभाववत्त्वस्यजगतएवसंभवादितिभावः॥ विपक्षएवेति॥ एम
साधनसमानाधिकरणाधिकरणधर्मावच्छिन्नाभावस्यैवसपक्षनिष्ठतयातद्घटितकूटाधिकरणसाधना ५९

धिकरणाव्यभिचारनिरूपकाधिकरणवृत्तिसमानाधिकरणधर्मावच्छिन्नसाध्याभावघटितयावदभाववत्त्वस्य पक्षेऽसंभवादिति
भावः ॥ तादृशधर्मस्य साध्यतावच्छेदकसमनियतप्रतियोगिताकत्वेऽपि दूषितत्वात् व्याप्तस्य संभवेन सत्त्वलांतरे व्याप्तिमाह ॥ स्प॰
मूर्त्तत्ववेगादि स्याद्यादाविति ॥ द्वितीयतादृशधर्मस्य तस्यैव व्याप्तिमाह ॥ मूर्त्तत्वमनस्त्वादिसाध्य इति ॥ अव्याप्तिरिति ॥ न च मूर्त्त
त्वत्वमनोन्यत्वोभयाभावादिघटिततादृशसाध्याभावकूटाधिकरणत्वस्य मनस्यसत्त्वान्नाव्याप्तिरिति वाच्यम् ॥ एवमपि तन्मनस्त्वादिहे
तावव्याप्तेः संभवात् ॥ अव्याप्तेर्वारणायेति ॥ न च मूर्त्तत्वमूर्त्तत्वोभयघटिततादृशसाध्याभावकूटाधिकरणत्वस्य पृथिव्यादिचतुष्टये
वसत्त्वान्नाव्याप्तिरिति वाच्यम् ॥ स्पर्शवदन्यत्वशब्दस्य भूतान्यपरत्वात् ॥ एवं च ॥ लक्षणस्य स्वत्वघटितत्वे च ॥ न क्षतिः ॥ न पर्वतादि
वृत्तित्वाभावमादाय असंभवः ॥ तस्य महानसादिवृत्तित्वसाधारणत्वेन वृत्तित्वसमनियतप्रतियोगिताकत्वाभावादिति भावः ॥
साध्याभावस्येति ॥ द्वितीये साध्ये ॥ अथ प्रमाभावेत्यादिवेनोक्ताऽव्याप्तिवारणसंभवात् ॥ साध्यतावच्छेदकसंबन्धेनेति ॥ इदं चेद्व्यकालत्वा ति
दिसाध्ये कालिकादिसंबन्धेन द्रव्यत्वावच्छिन्नाभावेऽप्रतियोग्याधेयतायामुभयाभावासत्त्वेनातिव्याप्तिवारणाय ॥ आधेयतायामे
तत्सामान्ये ॥ तेन संयोगेनाभावगुणस्य संयोगेन सामान्याभावरूपप्रतियोग्याधेयतायां हेत्वधिकरणनिरूपितत्वघटितोभयाभाव
सत्त्वेपि न क्षतिः ॥ व्यभिचारिणि समानाधिकरणधर्मावच्छिन्नाभावसंग्रहाय प्रथमदलम् ॥ यत्किंचिद्धेत्वपि यत्किंचिद्धेतुक
व्यक्त्यर्थकम् ॥ तस्यैव संग्रहाय व्यधिकरणधर्मावच्छिन्नाभावसंग्रहाय द्वितीयदलम् ॥ व्याप्यत्वमिति ॥ व्यापकत्वदलघटि

60

भ०टी०
६०
लक्षणत्वेनैव॥ इत्यत आह हेतुतेति॥ हेतुतावच्छेदकसमवायेन वृत्तिमद्भिन्नेऽसाध्याभाववद्वृत्तित्वाभावस्य अधिकरणधर्मावच्छिन्नाभाव
स्येव संभवेन वक्ष्यमाणरीत्याऽव्याप्तिसंभव इत्यत आह॥ इत्यत्र लक्षणकारकेति॥ घटत्वं घटत्वाभिन्नसमवेतोऽभयाभावे इत्यादौ॥
समवायेन साध्यतायामव्याप्तिमुक्त्वा संयोगेन साध्यतायामाह॥ एवमिति॥ तद्वृत्तितद्भिन्नवृत्तीति॥ अत्र सकलवृत्तितत्वमपि विशेषणं ध्वलात
द्वृत्तितद्भिन्नवृत्त्युभयस्याप्रसिद्धतेन तद्वृत्त्यनधिकरणहेत्वधिकरणे तद्वृत्तितद्भिन्नवृत्त्युभयाभावघटितकूटवत्त्वस्य तत्रापि नाव्याप्त्यसंगतिः॥
ता दृशेति॥ हेत्वभिमतेत्यर्थः॥ ननु घटत्वघटभिन्नसमवेतोऽभयाभावस्य घटत्वघटभिन्नोभयत्वावच्छिन्नाभावसमनैयत्येन तदुभयप्रत्य ए
मेव प्रतियोगितावच्छेदकं एवं तद्वृत्तितद्भिन्नवृत्त्युभयाभावस्यापि तद्वृत्ति॰तद्भिन्नोभयत्वावच्छिन्नाभावसमनैयत्येन तदुभयत्वमेव प्र
तियोगितावच्छेदकं तथा चाभावादिसाधारण्यात्तादृशाभावप्रतियोगितायाः साध्यतावच्छेदकसमनैयत्यमिति नोक्ताव्याप्तिरत
आह॥ किंचेति॥ ननु तादृशं यद्धत्वं तावदन्यतमदृष्टित्वत्वसमनियतजातियोगिताकत्वं यथा अभिमतिति नोक्तविकल्पावसर इत्यत आह॥ के
मेयमिति॥ यत्किंचिदिति॥ तथा च वह्निमान् धूमादित्यादौ स्वघटितेन निवह्निर्नोपात्तुं शक्यः अतः लिङ्गसाध्यसामान्याभावघटितसा
ध्याभावकूटाधिकरणत्वस्य साधनाधिकरणेऽसत्त्वात् किंतु वह्निमानेव तद्वृत्तित्वाभावस्य अधिकरणधर्मावच्छिन्नसाध्याभाव
एव साधनसमानाधिकरणवृत्तिमद्वृत्तिरितितमादाय लक्षणं अभिधारितं तु नसाध्यवतत्स्वनिष्ठअधिकरणधर्मावच्छिन्नं एम
नाभावकूटाधिकरणसाधनाधिकरणवृत्तिसाध्यसामान्याभावघटितसाध्याभावकूटानधिकरणत्वात् किंतु साध्यक्रू ६०

सत्ता
नेवतद्वृत्तित्वसामान्याभावस्यहेतावभावान्नातिप्रसंगः॥गुणावृत्तीत्यादि॥गुणावृत्तिद्रव्यत्वाभावएतदुभयाभावकर्मावृत्तिद्रव्यत्वाभावए
तदुभयाभावघटितेत्यर्थः॥साध्यतावच्छेदकव्यापकप्रतियोगिताकत्वरूपाणांयोभयाभावप्रतियोगिकोटौगुणवृत्तिरूपादानम्॥केवलगुण
णावृत्त्यभावाद्देवद्रव्यात्मकत्वनिष्ठत्वमतोद्रव्यत्वाभावोपादानम्॥एकविधोभयाभावघटितकूटाधिकरणत्वस्यसाधनाधिकरणगुणकर्मणोः
सत्वेनतद्वृत्तेःसाध्यसामान्याभावघटितकूटस्याधिकरणेनद्रव्यमितिद्विविधोभयाभावोपादानम्॥सत्तावन्मात्रमेवेति॥मात्रपदंयाव
दर्थकंकस्यचिदेवसत्तावतस्तादृशत्वेनतद्वृत्तित्वाभावस्यसमानाधिकरणधर्मावच्छिन्नाभावस्यापिसत्तावदन्तरेतादृशवृत्तिमत्ति
वृत्तित्वेनातिप्रसंगासंभवात्॥एवमग्रेऽपि॥एवकारेणसामान्यादिव्यवच्छेदः॥तन्निष्ठस्यसाध्यसामान्याभावसामान्यावृत्त्यभा
वादिघटितकूटाधिकरणत्वस्यक्वापिसाधनाधिकरणेऽसत्वेनतस्यस्वरूपोपादानासंभवात्॥अग्रेचरमदलेच॥यस्यमार्गे
ति॥साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्तित्वसाध्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभाववत्त्वरूपेत्यर्थः॥तादृशविशे
षणोपादानेकथमुक्तातिव्याप्तिवारणंतत्राह॥तादृशेति॥अधिकरणेति॥तस्यचहेतौसत्त्वान्नाव्याप्तिरितिभावः॥प्रतियोगिव्य
धिकरणेतीति॥साध्याभावेद्वयमितिशेषः॥यथाश्रुतेनोक्तातिप्रसंगवारणमित्याह॥तदर्थश्चेति॥साध्यतावच्छेदकाश्रयेति
वदुपलक्षितेत्यर्थः॥एतदुभयेति॥प्रतियोगितायांसाध्यतावच्छेदकविशेषणसाफल्यायप्रथमम्॥अधिकरणधर्मावच्छि
न्नाभावसंग्रहायद्वितीयम्॥अप्रसिद्धमेवेति॥तथाचतत्रतादृशत्व=समनैयत्य=क्रान्तस्याप्रसिद्धत्वादेवनातिप्रसंगइति

61

भ०टी० ६२ भावः॥ एकविपक्षस्थलेऽप्रसिद्ध्यभावेनाव्याप्तिमाशङ्क्य निराकरोति॥ एतदिति॥ साध्यवत्प्रेति॥ हेत्वधिकरणावच्छेदेन संयु
क्तो गुणवृत्तौ साधुपदर्शितेति भावः॥ प्रतियोगिवैयधिकरण्येनेव वारणं तदुक्तौ च हेत्वधिकरणताव्यापकत्वस्य साध्यवद्वृत्तित्वेला
भेन तेषां संग्रहेण तत्साफल्यमिति भावः॥ प्रथ्यालनादीति प्रायेनैवेप्रथमपादीह॥ अखण्डेति॥ तथा च हेत्वधिकरणावच्छे
देनेष्टकोचप्रश्नः तस्य सत्त्वादिह॥ तथेति॥ विवक्षितरूपेणेत्यर्थः॥ पृथिव्यादेरपि हेत्वधिकरणान्तर्गतत्वेन हेत्वधिकरणता
व्यापकत्वरूपं तन्नास्तीति भावः॥ व्यापकत्वं चात्रावच्छेदकतासंबंधेन बोध्यम्॥ अत एव गोप्रदर्शितरीत्यातिव्याप्तेः स्वविशेषेती
ति॥ तथा च स्वविशिष्टहेत्वधिकरणं जलादेव तु पृथिव्यादीति पृथिवीत्वविशिष्टद्रव्यत्वाभावादेस्तथात्वान्नोक्तरीत्याति
व्याप्तिः इति भावः॥ तादृशसाध्याभावेति॥ अधिकरणधर्मावच्छिन्नाभावोऽसत्के साधने॥ अभावविशेषणाम्॥ साध्याभाव
विशेषणम्॥ उभयाभाववत्त्वमिति॥ अत्रापि पृथिव्यन्यद्रव्यत्ववत्त्वद्रव्यत्वादिसंग्रहे वक्ष्यमाणरीत्यातिव्याप्तिवारणाय प्र
थमदलम्॥ अधिकरणधर्मावच्छिन्नाभावसंग्रहाय द्वितीयम्॥ पृथिव्यन्यत्वविशिष्टद्रव्यत्वाभावस्येति॥ आदिना तत्ताद्दि
पक्षान्यवृत्तित्वविशिष्टद्रव्यत्वावच्छिन्नाभावपरिग्रहः॥ साध्यतावच्छेदकविशिष्टेतीति॥ एवं च पृथिव्यन्यत्वविशिष्टद्रव्य
त्वाद्यभावस्यापि साध्यतावच्छेदकविशिष्टसाध्यवद्वृत्त्यभावे सोऽभावप्रतियोगिवैयधिकरण्यमस्तीति स्वनिष्ठतादृशसा एम
ध्याभावकूटाधिकरणसाधनाधिकरणवृत्तिनिरूपितप्रतियोगिव्यधिकरणसाध्याभाववत्कूटाधिकरणाप्रसिद्ध्या ६२

नातिव्याप्तिरिति भावः॥ व्यासज्येत्यादेः फलमाह। तेनेति। व्यापकतां स्य पूर्वोक्तैव व्याप्तिर्वैशिष्ट्यागना व्याप्तिरितीति। किंचेत्यस्यावता
रणामिति शेषः॥ ननु संयोगीसत्त्वादिसाध्यकव्याप्तिवारणाय वृत्तित्वाभावस्याप्यवृत्तित्वमुपेयत इत्यत आह। प्रथमत एवेति। व-
क्ष्यमाणेति। महाकालोऽयं घटादिसाध्यकव्याप्तौ सत्यर्थः॥ अलग्नकृतेति। अनेन मरूमपाप्याश्रितस्फलमप्याह। किंचेति। वक्तव्य-
त्ति॥ केचित्त्विति। पूर्वोक्तमतरीत्या सत्त्वादि॥ ननु महाकाले कालिकसंबंधेन कस्यापि वृत्तेर्मानाभावः॥ इदानीमित्यादिप्रतीतेः सर्वाधिकरणत्वादि
विषयकत्वेनैवोपपत्तेः॥ तथा च महाकालान्यत्वे साध्ये कालिकेन घटादेः सद्धेतुत्वमेवेत्यत आह। इदमिति। दीधित्युक्तस्वरूपलक्षणनिरा-
सेनेदं लक्षणं परिष्कृतं। वृत्तित्वाभावस्येत्यादिना। हेत्वधिकरणमहाकालेति॥ न च हेत्वधिकरणस्य खंडकालादेरवच्छेदकत्वे समस्तैवे-
ति वाच्यं। हेत्वधिकरणावच्छेदकेनेत्यस्य हेत्वधिकरणत्वव्यापकावच्छेदकताकत्वार्थकत्वात्। हेत्वधिकरणावच्छेदकेनेति। तत्सामान्यावच्छे-
देनेत्यर्थः॥ नश्वदतिव्याप्तिः॥ अत्र संयुक्तसाध्यवच्छिन्नाभावस्य महाकालावच्छेदेन घटादिनिष्ठत्वेपि महाकालादेर्हेतुतावच्छेदकवृत्ति-
नियामकसंयोगादिनाऽघटत्वानधिकरणत्वेन निरूपकवृत्तिमद्वृत्तित्वाभावेन तेन संबंधेन घटाद्यधिकरणभूतकालावच्छेदेन घटादिवृत्ति-
त्वरूपनिरूपकवृत्ति[illegible]मद्वृत्तित्वान्तस्य ज्ञगतसंयुक्तत्वाभावादेर्व्यधिकरणधर्मावच्छिन्नाभावस्य केवलान्वयितया घटकत्वादिति भावः॥ यद्धे-
त्वधिकरणावच्छेदेन॥ यद्धेत्वधिकरणत्वव्यापकमिति पाठः॥ इत्थं च। तादृशवृत्तित्वावच्छेदकतासंबंधेनाभावविशेषणे च। अ-
साधौ हेतुतावच्छेदकसमवायेन वृत्तिमत्त्विनाशादौ वृत्तिरिति शेषः॥ वृत्तीति। वृत्तित्वाभावविशेषणमिति शेषः॥ ननु एवं लक्षणेऽ

तत्सामान्यावच्छेदेन३

62

भ०टी०
६२

त्तिमद्वृत्तिपदद्वैयर्थ्यमत आह ॥ लक्षणस्येति ॥ शेषमिति ॥ तादृशवृत्तित्वसमनियतप्रतियोगिताकत्वं पूर्ववत् ॥ ॥उपदर्शितरीत्या म
हाकालान्यत्वादिसाध्यकस्य कालिकेन घटादिहेतोः सद्धेतुत्वादाह ॥ एवमिति ॥ एतद्रूपाभिन्नं गुणत्वात् = द्रव्यभिन्न = ज्ञानादेस्साधवति
प्रसंगस्य पूर्वमुक्तत्वेन तदुपेक्ष्येश्वरज्ञानभिन्नं घटादिस्तद्गुणत्वे बीजमाह ॥ एतद्रूपेति ॥ अप्रसिद्धेरिति ॥ नास्त्याप्रसिद्धिरित्येनेनान्व
य ॥ अत एवेत्यादिना वक्ष्यमाणास्वरसामाह ॥ यादृशेति ॥ अत एव ॥ यादृशेत्यादिविवक्षणादेव ॥ इत्थं च ॥ साध्यतावच्छेदकसंबंधे
न साध्याभावविवक्षणे च ॥ इत्थं च ॥ साध्यतावच्छेदकसंबंधेन साध्यव्यापकत्वविवक्षणे च ॥ एतद्विवक्षणे संयोगेन व्यापकस्याप्रसिद्ध्या
यं प्रतियोगिवैयधिकरण्यनिवेशस्यावश्यकतया धूमाभावस्यैव लक्षणघटकत्वमुपेत्यातिव्याप्तिर्वारणीयेत्यक्रमेव याप्यवृत्तित्वं
नाव्यम ॥ तद्विवक्षणे च विशेषणतया योगोलकान्यत्वाभावस्यापि लक्षणघटकतया नातिव्याप्तिरिति भवत्स्फुटं म इति भावः ॥ तेने
ति ॥ स्वसमानाधिकरणेत्यादिव्याप्यवृत्तित्वनिवेशेऽपि च संयोगेन द्रव्यत्वस्याप्यवृत्तितया धूमाभावादेर्लक्षणाघटकतया तिव्याप्तिरिति
भावः ॥ तद्विशिष्टस्येति ॥ निरुक्तव्याप्यवृत्तित्वविशिष्टस्येत्यर्थः ॥ एवमन्येऽपि ॥ एवं च साधनाधिकरणवृत्तित्वं साध्याभावकूटाधिक
रणत्वं च निरवच्छिन्नं ग्राह्यमिति फलितोऽर्थः ॥ क्रमेण व्यावृत्तिमाह ॥ तेनेत्यादि ॥ साध्यव्यापकतेति ॥ तत्र संयोगाभावत्वस्यापि
प्रतियोगिवैयधिकरण्यादिघटितव्यापकतावच्छेदकत्वसंभवादिति भावः ॥ साध्यतावच्छेदकेति ॥ तत्र संयोगाभावस्य विशेषणता
ताविशेषावच्छिन्नाभावस्यैव तत्र संयोगासत्त्वादिति भावः ॥ नातिव्याप्तिरिति ॥ साध्यतावच्छेदकसंयोगसंबंधावच्छिन्नप्रतियो

स्म
६२

गिताकस्य तन्नसंयोगाभावाभावस्य लक्षणघटकत्वेपि केवलान्वयितया तद्वृत्तित्वाभावस्याधिकरणाधर्मावच्छिन्नाभावस्यैव वृत्तिमद्वृ
त्तितया तस्य च हेतौ सत्वादिति भावः ॥ नाव्याप्तिरिति ॥ यथाश्रुते तु सत्तिकालावच्छेदेन साध्यसमानाधिकरणस्य गुणादेर्व्याप्यवृत्तेर्गुण
सामान्याभावस्य लक्षणघटकतया तदधिकरणानिरूपद्व्यातिरिक्तवृत्तित्वाभावस्य हेतुतावच्छेदकसंबंधेन वृत्तिमद्भिन्नसद्रूपसम
वेते यत्ने सांनस्य हेतावसत्वादव्याप्तिः अस्तु मा नाम तादृशविवक्षणे च व्याप्यवृत्तित्वविशिष्टगुणसामान्याभावाधिकरणगुणावृत्तित्वाभा
वस्य द्रव्यत्वे सत्वान्नाव्याप्तिरित्याशयः ॥ साध्यव्यापकतेति ॥ एतन्मते व्यापकताऽन्योन्याभावघटिताऽतो न व्याप्यवृत्तिपदवैयर्थ्यं
एकविपक्षके तद्विपक्षावृत्तित्वावच्छिन्नाभावाधिकरणतद्विपक्षवृत्तित्वाभावस्य हेतावसत्वान्नाव्याप्तिरत आह ॥ नानाविपक्ष
केति ॥ अन्योन्याभावघटितव्यापकतायामेकावच्छेदकत्वावस्याधिक्येन गौरवमिति लाघवात्संताभावघटितायाः अतिरोगि
वेपधिकरणघटितायाः एव व्यापकतायाः अवश्यं नैव सामंजस्ये व्याप्यवृत्तिपदोपादाने वैयर्थ्यमिसस्वरसादाह ॥ आहुरिति
विवक्षाद्वयेपि व्याप्यवृत्तित्वविशिष्टस्य साधनसमानाधिकरणत्वं व्याप्यवृत्तित्वविशिष्टतादृशाभाववद्वृत्तित्वं चेति विवक्षा
द्वयेपि ॥ आस्तां वेति ॥ न चैतत्तद्विपक्षावृत्तित्वावच्छिन्नाभावघटितसाध्याभावकूटाधिकरणत्वं न ज्ञातसाधारणमिति वाच्यम् ॥ साध्य
तावच्छेदकसमवायसंबंधावच्छिन्नप्रतियोगितकतद्भावकूटस्य तत्र संभवात् ॥ अव्याप्तिरिति ॥ एकाधिकरण्यापन्नपृथि
वीमात्रसमवेतघटितसाध्याभावकूटाधिकरणपृथिवीवृत्तित्वाभावस्य हेतौ सत्वादिति भावः ॥ तद्देव ॥ तादृशकूटाधिकरणवृ

भ०टी०
६३

निरुक्तस्य हेतुतावच्छेदकसंबंधाविवक्षणमेव॥ विशेषाभावातिरिक्तस्य विशेषरूपेणाभावाभावस्याभावादाह॥ स्वीकारेत्विति॥
विशेषणांतरनिवेशापेक्षया=वच्छिन्नत्व=निविष्टविशेषणस्यातिप्रसंगवारकांशेति रकल्पनमुचितमित्याशयेनाह॥ वृत्तिमद्वृत्ती
सनेनवेति॥ वृत्तिमत्वस्येवेति॥ महाकालवृत्तित्वावच्छिन्नाभावस्य कालिकसंबंधावच्छिन्नवृत्तित्वावच्छिन्नाभावत्वमनियतत्वादि
तिभावः॥ पूर्वोक्तविवक्षयैव सामानाधिकरण्यस्याव्याप्यवृत्तित्वमतेतिसादिपर्वोक्ताविवक्षयैव॥ वृत्तित्वाभावेवावत्वविशेषणांशे
यंतदभावेपितादृशसाध्याभावकूटसाध्यसामानाधिकरण्यप्रसिद्धेर्व्याप्तिव्यासेरभावादाह॥ केचित्विति॥ असंभवविशेषइति॥ अ दलत्वलाय
भावत्वप्रकारकत्वंविशेषः॥ ननुविशेष्येविशेषणमितिन्यायेनविषयताया अभावज्ञप्त्यानुरोधेन तद्भेदत्वभावयप्रकमतया आ
ह॥ विशेष्येति॥ तत्र समवायितया अवृत्तेन्नास्तीत्यादे॥ तादृशेति॥ विशेषदर्शनवृत्त्यादिस्यादिः॥ नस्यातंत्र्येणेति॥ नंवपर्य
नोचनयाघटत्वादेः पारतंत्र्येणप्रतियोगितावच्छेदकत्वमितिलभ्यम्॥ तच्चेतरविशेषणतावच्छेदेनावच्छेदकत्वमेवेत्याशयेनव्या
चष्टे॥ विशिष्टवैस्यापीत्यादि॥ यादृशप्रकारतेति॥ द्वंद्वपारतंत्र्येणप्रकारते [illegible]तिभावः॥ ननुतज्ज्ञानस्यप्रतियोगिनिअधि
करणधर्मवैशिष्ट्यांशेभ्रमत्वेप्यधिकरणधर्मस्य प्रतियोगितावच्छेदकांशेनभ्रमत्वमत आह॥ प्रतियोगिनीत्यादि॥ वैशिष्ट्ये एम
ति॥ अवच्छेदकवैशिष्ट्येलक्ष्य॥ उक्तिभंग्या॥ प्रक्रियेत्यर्थः॥ तस्य च॥ प्रतियोगिनिवैशिष्ट्याघटितावच्छेदकत्वस्य[illegible]च॥ प्रकृते॥ अ ६३
धिकरणधर्मावच्छिन्नाभावस्थले॥ अभावात्॥ अधिकरणधर्मेऽभावात्॥ भ्रमः॥ अधिकरणधर्मस्यप्रतियोगितावच्छेदक-

तांशोऽभ्रमः॥ तत्र समानाधिकरणधर्मावच्छिन्नाभावस्थले॥ अत्र तु व्यधिकरणधर्मावच्छिन्नाभावस्थले तु॥ आहुरपीति॥ एवं च दीधितौ स्व-
रसवाही स्मान्नाहार्य इत्यर्थः॥ तादृशानुभवः॥ घटत्वेन पटो नास्तीत्यादिरनुभवः॥ घटत्वेन घटो नास्तीत्येव पाठ इति घटत्वेन पटो नास्तीति पाठोऽप्रा-
फलत्वादृशाभावानभ्युपगमे चापत्तादेः घटत्वाभावावगाहिताया एव स्वीकारादिदमभिमानः॥ अनुभवविरुद्धस्य व्यधिकरणधर्मस्यावच्छेदक-
तावगाहितया अनुभवसिद्ध इत्यर्थः कतया घटत्वाद्यनुपस्थितिदशायां घटत्वेन पटो नास्तीत्यादिप्रतीतेः पटादौ घटत्वाद्यभावावगाहिताया
असंभवात्॥ घटत्वेन पटो नास्तीति पाठः साधुः घटत्वेन घटो नास्तीति पाठे तु दृष्टवानेव स्वरसः स्यादहः॥ वक्ष्यतीति॥ ॥इति महादेव-
विरचितायां भवानंदीव्याख्यायां सर्वोपकारिण्यां व्यधिकरणधर्मावच्छिन्नाभावव्याख्या॥ ॥ननु इदमप्येतल्लक्षणोपलक्षणं भविष्यतीत्यत आह
केवलेति॥ हेतुतावच्छेदकसंबंधेन तदधिकरणवृत्तित्वलाभार्थकत्वाच्च तद्द्व्यपर्यमत आह॥ इत्यमिति॥ तदभाववत्त्वे हेत्वधिकरणतायाः स्व-
रूपसंबंधरूपावच्छे[illegible]दकत्वे नानाभावदलाघवं नाह॥ अनतिरिक्तवृत्तित्वमिति॥ तथा चेत्यादि॥ येषामिति॥ बहुवचनेन साध्यवदन्न्यो-
नां पावत्त्वरूपबहुत्वलाभेन तादृशपावत्त्वावच्छिन्नाभावस्य केवलान्वयितया निवेशासंभवेन येन येनेत्यादिवीप्सया सामान्यतया साध्यवद्वृत्तित्वा-
वच्छिन्नाभावनिवेशासंभवेन च तादृशाभावसमुदाय एव निवेशनीय इत्यर्थः॥ एवं च तस्य तादृशाभावसमुदायत्वेन तत्तद्व्यक्तित्वेन वा नतिरि-
क्तवृत्तित्वं विवक्षितं आद्येऽतिव्याप्तिरपि अन्त्येऽव्याप्तिरेवेत्यसांगत्यं लाघवार्थः॥ अन्यूनवृत्ति[illegible]त्वमिति॥ एवं च व्यापकत्वरूपमन्यूनवृत्तित्वं ता-

64

२

म०टी० ६५ दृष्ट्याभावसमुदायत्वेन तत्तद्व्यक्तित्वेन वा विवक्षणीयमुभयथापि न क्षतिरिति भावः४॥ दूषणांतरमिति॥ आत्मत्वसमवेतत्वाद्यपेक्षया
लघुतया समवेतत्वादेव प्रतियोगितावच्छेदकतया साध्यवत्समवेतत्वत्वाद्यवच्छिन्नाभावरूपसाध्यवद्वृत्तित्वाप्रसिद्ध्या पूर्वोक्तानियमाद्येर
संभवादित्याशयः४॥ निर्विषयकमेवेति॥ यद्यपि तद्व्यक्तिः स्वतद्व्यक्तिस्वरूपतया तद्व्यक्तित्वेन दूषणं स्मरणमपि घटभिन्नाविष
यकं तथापि तद्व्यक्तित्वं तद्व्यक्तिवृत्ति साधारणधर्मस्वरूपमित्याशयेनेदं मं॥ न चैवं घटमात्रविशेष्यकज्ञानसंभवेन विशेष्यतया साध्य
वद्वृत्तेर्विशेष्यतयाभावो वक्तव्य इति वाच्यं॥ विषयताया विषयतात्वेनैव संबंधत्वं न तु विशेष्यतात्वादिनेत्याशयात्॥ तेनेत्यादि वक्ष्य
माणस्वरसादाह॥ पूर्वोक्तेति॥ सर्वेभ्यो दर्शपौर्णमासादिभ्यस्तेषु सर्वेषु स्वर्गकारणतोक्तौ तत्र पूर्वोक्तव्यभिचारिणामेव प्रक्रांततयोते पर
न तत्त्वमेव सर्वेषां दृश्योचितमिति भावः४॥ क्षतिः४॥ न सर्वेषां दृश्यासंगतिः४॥ हेतुसामानाधिकरण्यस्यावच्छिन्नेत्यस्य फलमाह॥ तेने
ति॥ हेतुतावच्छेदकावच्छिन्नेत्यस्य फलमाह॥ नवेति॥ अत्र हेतुसामानाधिकरण्यस्यावच्छिन्नेत्यस्य सत्त्वेऽपि हेतुतावच्छेदकावच्छि
न्नेत्यस्य सार्थक्यं अन्यथा समवायादिसामानाधिकरण्यस्य द्रव्यत्वादिनाभावस्य द्रव्यत्वादिसामानाधिकरण्याभावप्रकृततयाऽसंभवा
दिति भावः॥ तस्यापि हेतुतावच्छेदकावच्छिन्नेत्यस्य चरमं व्यावृत्तिरूपमा॥ दण्डिनीत्येवेति॥ समवायेनेत्यादि४॥ चरमध्वंसादेरिति॥ रम
आदिना खंडप्रलयकालीनजलपरमाण्वादिक्रियापरिग्रहः४॥ कालेन महाकालो देशो नातिप्रसंगः इति॥ अन्यथा संबंधसामान्येन प ६५

थिवीत्ववतिमहाकालेहेतुतावच्छेदककालिकसंबंधेनवृत्तित्वाभावस्यावृत्तिमात्रनिष्ठतयातिप्रसंगः स्यादितिभावः ॥ अतएवाह
थिवीत्वेसाध्येगुरुत्वेसानतिप्रसंगादित्यु॥ तत्रत्वे॥ द्रव्यत्वादेरितिसत्त्वे॥ तत्र॥ गुणत्वस्यात्र ह्वाहतमिति॥ अन्यतरपीतिन्यायादितिभावः॥ इत्स
नियामकसंयोगेनसाध्यतायांतेनसंबंधेनवह्निमतिकालेकालपरिमाणस्यमहत्त्वापेनयत्नेनमेयेसवत्त्वाह॥ स्पंदत्वमिति॥ हेतोः प्रविष्टे
त्वेनहेतुतावच्छेदकसंबंधेनवृत्तीयाथोघटितत्वंस्यव्याप्यत्वाभावेऽपि तत्रव्याप्यत्वेऽव्ययः॥ तथाच संबंधविशेषेणसाहित्यघटितत्वं यस्य हेतु
तावच्छेदकसंबंधघटितत्वोपपदाद्वितिव्याप्तिलाभोपेसर्थः पर्यवसितइतिध्येयम्॥ व्याप्तिरिति॥ साध्यसामानाधिकरण्याभावस्यहेतु
तावच्छेदकसंबंधेनावृत्तिमात्रनिष्ठत्वादितिभावः॥ केवलान्वयिसाध्यकेलक्षणवृत्तित्वेनैवावच्छेदकत्वयासाध्यवृत्तित्वहावच्छिन्नाभावाप्रसिद्ध्याऽ त्व
व्याप्तिरूपदोषसत्त्वादाह॥ सत्त्वमिति॥ एतद्रूपसम्यकारकप्रमाविशेष्यत्वादेःसाध्यसामानाधिकरण्याभावस्यत्वादितिभावः॥ संभवतीति॥ धा
दित्वान्यइतिशेषः॥ व्याप्तिरिति॥ इदमुपलक्षणम्॥ नवाऽव्याप्तिप्रसिद्धिरपिद्रष्टव्यम्॥ सामान्यतइदंसर्वस्याव्याप्यवृत्तित्वाप्रसिद्धेः॥
सत्तामत्त्वंत्वहेत्वेन्वयधर्मनिरूपणसाह॥ सामान्यतोनेति॥ ननुयुज्यवतीति॥ अन्यथाचेत्यत्रैवावत्रपुत्रवतिदेशेतत्पादयोगात्तदुपपत्तेरितिभा
वः॥ प्रतियोगितावच्छेदकत्वंतत्तात्पर्यास्यपिकरणं॥ तथाचवह्नितावच्छिन्नस्यातयात्वान्वेषइतिभावः॥ मतांतरंप्रसन्नत्वादेतद्वस्तुत्वमिति म
एवंचसाध्यतावच्छेदकेतादृशप्रतियोगितावच्छेदकत्वाभावावच्छेदकत्वंनिविष्टमितिभावः॥ द्वितीयप्रसिद्धंतलक्षणमतांतरंयंडनमस्वर

65

म०टी०
६५

सद्साध्ययेनाह॥ अन्यद्इति॥ तद्धिकरणादृत्तित्वरूपवैयधिकरण्यमहत्त्वेनविवक्षसिद्धम्भसाध्ययेनाह॥ मूलमितिति॥ तद्वृत्तिमूतसंबंधि
त्वम्॥ तेनतादृशसंबंधेनसाध्यतायांनाव्याप्तिः॥ अनधिकरणेसंयोगेनेतिवृहेदृत्तावपीसत्वेनान्वितम्॥ नक्षतिः॥ नासंभवः॥ तादृशेतीति॥ अ
नवच्छेदकत्वपर्यंतविशेषणेनरूपवान्पृथिवीत्वादित्यादावतिव्याप्तिवारणेपिद्रव्यंपृथिवीत्वादित्यादावव्याप्तिवारणायमात्रपदोपादानमि
रा तिध्येयम्॥ अन्यथासंबंधेत्वमात्रोक्तौ॥ इतिमत्वरूपस्यधर्मत्वोक्तौतुदोषाभावादाह॥ एवमितिति॥ अतिव्याप्तिरितिति॥ साधनसमानाधिकरण
भूतलत्वाद्येनधिकरणमात्रसंयुक्तत्वशून्यभूतलवृत्तिघटादौवर्त्तमानतयाद्रव्यत्वस्यनिरुक्तावच्छेदकत्वासंभवादितिभावः॥ गुणत्व
मादायैवद्रव्यत्वस्यावच्छेदकत्वंस्यादतआह॥ तादृशेति॥ अथसिध्येति॥ नचैवंयावद्द्रव्यवर्गतगुणत्वादिनिरूपितवैयधिकरण्यावच्छेद
कात्प्रसिद्ध्यैवनातिव्याप्तिरितिवाच्यम्॥ यावत्पदस्यसामान्याभावस्फोरकत्वेवल्प्येतिव्याप्तेः॥ संयोगेनसाध्यतायामतिप्रसंगमुक्तास्व
मवायेनसाध्यतायांतमाह॥ एवमितिसाध्येना॥ अवच्छेदकत्वेति॥ अवृत्तिरूपतादृशावच्छेदकत्वस्यधर्मत्वेसत्वादितिभावः॥ अवच्छेदक
त्वशरणाव्याप्तिरितिति॥ अत्रेदंचिंत्यम्॥ अवृत्तिगगनाद्युणत्वमादायद्रव्यत्वस्यावच्छेदकत्वासंभवेपिघटत्वादिधर्मावच्छिन्नाद्यधिकरण
मात्रसमवेतत्वशून्यधर्मेघटरूपादौसमवायेनवृत्तिरूपत्वादितदन्यद्रव्यत्वस्यावच्छेदकत्वासंभवात्॥ अन्यथासमवायेनवृत्तित्वसाध्यव राम
पिधर्मत्वादेर्महानसादिवृत्तिमत्त्वाद्यावच्छेदकत्वासंभवेनसाध्यावच्छेदकलक्षणसंगमनानुपपत्तेरितिति॥ वस्तुतस्तु उत्ताद्याइत्येवमिसा ६५

द्रिवक्ष्यति॥ यावत्स्वाश्रयकत्वमिति॥ अत्र वह्निमान् धूमादित्यादौ धूमादिसमानाधिकरणमहानसत्वाद्यनधिकरणमात्रवृत्तित्वाभा
वदेत्तिमत्वोभयाभाववत्सर्वतीयवह्न्याद्यात्मकमपि किंचित्स्वाश्रयकत्वस्य वह्न्यादौ सत्वेनावच्छेदकत्वापत्तिरतो यावत्वं स्वाश्रयविशेषणम्॥ ए
वं च यावद्वृत्त्यन्तर्गतमहानसीयवह्न्यादेरुभयाभाववत्वाभावान्नाव्याप्तिः॥ संबंधविशेषेण॥ विशेषणताविशेषेण॥ सत्वादिति॥ आभावीयविशे
षणताविशेषवृत्तिमत्त्वीयविशेषणताविशेषयोर्विभिन्नरूपेणैव प्रतियोगितावच्छेदकसंबंधतयाऽयकसंबंधावच्छिन्नोभयाभावस्यैकत्वाने
पिवादित्तिभावः॥ अन्यतरेति॥ अन्यतरत्वेनाभावप्रतियोगितावच्छेदकसंबंधत्वस्येष्टार्थः॥ अनभ्युपगमादिति॥ अन्यथा संयोगसमवाया
द्विनामप्यन्यतरत्वेनैव संबंधतापत्तेरितिभावः॥ ननु तादृशधर्मावच्छिन्नकरणमात्रवृत्तित्वाभावप्रकारकप्रमाविषयत्ववृत्तिमत्वस्य कारकप्रमा
विषयत्वोभयाभावस्य यावत्स्वाश्रयकत्वं तदवच्छेदकत्वं वाच्यं प्रमाविषयत्वीयविशेषणतया चोभयाभावो वाच्य इत्यतो नोक्तदोष इत्यत आह॥ एवमि
ति॥ तादृशी॥ साधनसमानाधिकरणधर्मानधिकरणमात्रवृत्तिः॥ विवक्षितत्वादिति॥ समुदितलक्षणार्थतया स्यादिः॥ तथा चोक्तस्थले सम
वायादिना घटत्वावच्छिन्नाधिकरणतायास्तादृशत्वेन समवायादिना घटत्वावच्छिन्नप्रकारकज्ञानभेदस्य कालिकेन विषयतया च घटत्वावच्छि
न्नप्रकारकज्ञाने सत्वेन नाव्याप्तिरितिभावः॥ उपरिष्टात्॥ अवच्छेदकलक्षणे॥ तत्कृत्यसाघटत्वादेरवच्छेदकत्वमादायैवोपपत्तौ नावह्न्यादेस्तु धावम
मनुचितमित्यस्वरसादाह॥ कश्चिदिति॥ तथा चैतत्प्रत्येकरूपेण॥ तथा च॥ एतावन्मात्रस्फोरणे च॥ बोधनायेति॥ तथा च यावत्पदं तादृशाव

छेदकभेदे यावत्त्वलाभतात्पर्यकमिति भावः॥ प्रतीतिबलादिति॥ वह्नित्वं न तादृशावच्छेदकमिति प्रतीतिबलादित्यर्थः॥ तदवच्छिन्नेति॥ तादृशावच्छेदका
वच्छिन्नस्यार्थः॥ संभवतीति॥ तथा च यावत्तादृशावच्छेदकावच्छिन्नभेदनिवेशः॥ किमिति रूपेऽस्तु तदिति भावः॥ तदनभ्युपगमेन॥ प्रत्येकं
व्यासज्यवृत्तिधर्मावच्छिन्नभेदानभ्युपगमेन॥ अयमाशयः॥ एकोनद्वावितिप्रतीतौ द्वित्वोपभाव एव विषयो न तु द्वित्वावच्छिन्नभेदः॥ अस्तां
ताभावेऽव्याप्यवृत्तित्वस्य त्वदुक्ततया व्यासज्यवृत्तिधर्माधिकरणे प्रत्येकमात्रवृत्तिधर्मावच्छेदेन व्यासज्यवृत्तिधर्मसत्ताभावस्य संभवेऽप्यन्यो
न्याभावस्याव्याप्यवृत्तितया तद्धर्माधिकरणे निरुक्तधर्मावच्छेदेनापि तद्धर्मावच्छिन्नाभेदासंभवादिति॥ आत्माश्रय इति॥ वह्निनिरूपितवह्निनिष्ठव्या
प्तिलक्षणे घटितत्वात् आत्माश्रयो दुष्टः॥ अन्यत्र तदसंभवात्॥ घटकत्वादिति॥ अस्यापि धूमसामानाधिकरण्ये धूमनिष्ठव्याप्तिनिरूपकत्वेन घटित
त्वादिति भावः॥ एषा श्रुतमात्रेणान्योन्याश्रयापातात्॥ एवमेकान्तरघटितत्वेऽपि चक्रकादि दुष्परम्॥ आहारुपाधीतरमाह॥ अत एव हि तोपस्थि
तस्य व्याप्यवृत्तेरखंडस्य च तत्पदेन संग्रहभ्रमनिरासायाह॥ तत्पदेनेति॥ तत्कपिसंयोगिवद्भिन्नेति॥ अव्याप्यवृत्तिप्रमाविष
यत्वस्याव्याप्यवृत्तितामतेन तत्कपिसंयोगाभावप्रमाविषयत्वाभावस्याव्याप्यवृत्तितया न व्याप्यवृत्तित्वं न व्याप्यवृत्तिमते च तत्कपिसंयोगाभावप्रमा
विशेष्यत्वं व्याप्यवृत्ति केवलान्वयीति तदभावाप्रसिद्धेरतो भेदानुधावनम्॥ गुरुत्वानुसरणमिति॥ विशेष्यतया नानात्वेऽपि तद्भिन्नतादृशविशेष्य
तात्वस्याननुगततया तदवच्छिन्नप्रतियोगिताकाभावस्याखंडत्वं संभवतीति भावः॥ द्वित्वाद्यवच्छिन्नाभावस्य सर्वैरभ्युपगमेन यदि च संभवदुक्तिक

संगतेसत्वआह। गद्वित्वेत्यादि। केश्चिदिति। सिद्धांतग्रंथेतादृशाभावानभ्युपगमोदित्यस्यवक्ष्यमाणत्वादितिभावः॥ नच्छतिः नासंभवइति॥
संबंधभेदमादायाप्यसंभवतादवस्थ्यादाह। प्रतियोगिवृत्तेरिति॥ चनवच्छेदकत्वेति॥ साध्यसाधनभेदेनव्याप्तिभेदान्नासामञ्जस्यमितिभावः॥ विरहत्वे
ति॥ मूले प्रतियोगितावद्रूपतयानिरुक्तेत्यर्थः॥ देशांतरमेवेति॥ धूमवान्वह्नेरित्यादावपिव्याप्तिः साध्यसमानाधिकरणाभाववद्वृत्ति
त्वाभावस्य वृत्तिमत्त्वाप्रतियोगितयासाधनसमानाधिकरणाभाववद्वृत्तित्वस्यवह्निमद्वृत्तितयाप्यधेराभावादित्याशयः॥ प्रतियोगिसं
बंधेप्यधिकरणेऽभावस्यकालिकादिसंबंधेनदृष्टसासंभववारणायाभावबत्तानियामकसंबंधेनेववृत्तित्वं वाच्यमित्याशयेनाह। भावबत्तानि अ
यामकेति॥ प्रतियोगिमत्तामहविशेषितानियामकेत्यर्थः॥ भावरूपाभावप्रतियोगित्वस्यलक्ष्यत्वेतस्यपादत्वेऽसमत्वमपृत्यर्थरूपा
स भावप्रतियोगित्वस्यापिनादृशत्वस्यस्वावच्छेदकतयासंबंधेसादेः प्रतियोगित्वरूपत्वासंभवएवेत्याशयेनाह। यदिअभावादिति॥ यत्प्रति
योगित्वेति॥ यद्धर्मावच्छिन्नप्रतियोगिताकत्वेनत्यर्थः॥ तेनविशिष्टाभावाभावादिप्रतियोगित्वेनाव्याप्तिः॥ अप्यवृत्तेःप्रागभावादिस्व
प्रतियोगितायाः संग्रहायाह॥ नतदृत्पत्तिकालावच्छिन्नेति॥ यद्भावानुयोगिकत्वविशेषणं यद्भावेतस्यचयद्धर्मावच्छिन्नाभावेत्यर्थः॥
तेनोभयाभावादिकमादायनासंभवः॥ अनुयोगिकत्वेति॥ अनुयोगिकत्वसामान्येत्यर्थः॥ तेनसमवायादिनिष्ठानुयोगित्वेनैकभा
वमादायनपटादेः संयोगेनपटाद्यभावप्रतियोगित्वापत्तिः॥ एवमन्यत्राप्यूह्यम्॥ तस्यतद्धर्मावच्छिन्नस्यतद्भावप्रतियोगित्वमू
यद्भावाधिकरणपदार्थेकदेशयद्भावाधिकरणत्वविशेषणम्

तद्दा

५०८१० तद्धर्मावच्छिन्नाभावप्रतियोगित्वम्॥ यद्दिति॥ आसाद्यसर्पस्थ॥ तद्दिति॥ तद्धर्मसमानाधिकरणसाद्यीयप्रत्यभावस्थ॥ स्वचितेति॥ तत्परिहार
इ सत्रतत्पदस्ने साध्यस्थ॥ यन्निष्ठाप्यसमानाधिकरणाभावाप्रतियोगी भावात्॥ आदिनो वह्निमान्धूमादित्यादौ द्रव्यत्वादौ प्रतियोगितया साधना
व्यापकत्वगुणसंभवपरिग्रहस्थ॥ असंतत्पदं साध्यव्यापकत्वादिदलीयासंतपदम्॥ सामान्यधर्मस्य धंसंसर्गाभावप्रतियोगितान
वच्छेदकत्वेन धूमवान्वह्नेरित्यादावीश्वरज्ञानादेर्निरुक्तसाध्यव्यापकत्वे न तत्रोपाधित्वसंभवेन निरुक्तानुधावनमफलमत आह॥ तद्धूमवा
प्रतियोगितावच्छेदकेश्वरज्ञानादिधनत्वावच्छिन्नत्वात्॥ न चापि॥ तद्धूमवान्वह्नेरित्यादौ॥ निरुक्ताधारतेति॥ इदमुपलक्ष
णम्॥ तद्धूमादिसाध्यके चार्द्रेन्धनसाहिताः निरुक्तावृत्तिधर्मेणापि तादृशेन्धनादेरुपाधित्वं द्रष्टव्यम्॥ ननु संबंधसामान्येन सा
धनाव्यापकत्वमिति वेद्यात्तत्र मित्रौषिधिकरणान्यसोपाधित्वं न संभवति अपि गोलकान्यादेः समवायादिनावृत्त्यादिव्यापकत्वाद
त आह॥ साधनेति॥ तद्दिति॥ साध्यवदित्यर्थस्थ॥ तत्तेन॥ व्यभिचाराधिकरणान्यत्वेन साध्यवेतद्भिन्नत्वेन वा॥ संभवसेवेति॥
एतदसंभावना योन्याभावयोर्इयोरपि साध्यसमव्याप्तिभावस्थ॥ तदा रणम॥ भेदप्रतियोगितावारणम्॥ अफलमि
ति॥ तन्त्रसंग्रहेप्पति व्याप्यादेरभावादित्यभावस्थ॥ आसादेस्थकालोपाधित्वानेगोकारेपावद्धमाधिकरणध्वंसानंतरं चरमधूमा राम
धिकरणे सत्ति संभवा नायं च धूमवान्वह्नेरित्यादौ धूमधूमवद्भिन्नतरादेः कालिकादिसंबंधेन साधनव्यापकत्वासंभवा ६७

स्याह ॥ २ इदं जन्यत्ववदिति ॥ साध्यव्यापकत्वादिति ॥ तथा च भेदप्रतियोगितासंग्रहे जन्यत्वादिसाध्यके ऽनित्यात्मापसात्तत्कारणतयासं
तत्पदमुपादायभेदप्रतियोगितावारणं सफलमिति भावः ॥ नन्वेवं साध्यव्यापकत्वदले ऽसत्पदं व्यर्थमेवेति वाच्यम् ॥ इष्टापत्तेः ॥ तादृशसंबंधेने
ति ॥ साध्यव्यापकताघटके साध्ये ॥ व्यक्तमिति ॥ परमाणुभिन्नादेः साध्याधिकरणपरमाण्वादिनिष्ठभेदप्रतियोगित्वादिति भावः ॥ संबंधविव
क्षायाः ॥ साध्यव्यापकत्वसाधनाव्यापकत्वयोरेकसंबंधविवक्षायाः ॥ संबंधविवक्षणे ॥ तयोरेकसंबंधविवक्षणे ॥ स्वरूपमेव ॥ प्रतियोगिति कृते वा ॥ व
क्ष्यमाणत्वात् ॥ वस्तुतस्तु साध्यसत्पदानुपादानस्य वक्ष्यमाणत्वात् ॥ ननु जन्यत्वादिसाध्यके व्यभिचाराधिकरणान्यादेरनुपाधित्वेऽपि व्यभि
चाराधिकरणवृत्त्यादेरेवोपाधितासंभवेनासत्पदमुपादायभेदप्रतियोगितावारणमफलमेवेसतस्तस्याप्युपाधित्वासंभवं दर्शयति ॥ २ व्यभि
ति ॥ व्यापकनिष्ठभेदेति ॥ व्यापकस्य संबंधसामान्यात्तर्गतसमवायेन परमाणुवृत्तितया संबंधसामान्येन परमाणुवृत्तित्वावच्छिन्नभेदस्य
व्यापकनिष्ठत्वादिति भावः ॥ स्वरूपसंबंधेनेति ॥ परमाणुवृत्तीत्यनेनान्वितम् ॥ निर्घटत्वे ऽप्रयोजकोटौ वाच्योवेति सती साध्यसाधनाभा
वान्यतावच्छेदकस्य न घटाभाववात्मकत्वं किंतु घटाभाववात्मकत्वमेव ॥ तथा च घटाभावान्योन्याभावोपाधिः स्यात् संगतमिति सर्वं रसादृहा ॥ के
चिदिति ॥ एककालावच्छेदेनेति ॥ कालो लक्षणम् ॥ तेन स्थूलकालावच्छेदेनेकाल्पनिकप्रतियोगिज्ञाने तदभावज्ञानयोर्द्वयोरपि

अ०टी०
६८

नष्टमिति॥ तदविवक्षणे॥ व्यापकताघटकसंबंधावच्छिन्नत्वस्य प्रतियोगितायामविवक्षणे॥ अयोगोलकस्य धूमवद्‌संबद्धतया नावच्छेद
कत्वमत आह॥ तन्मात्रस्यैवेति॥ प्रतियोगितावच्छेदकत्वादिति॥ भेदस्यासमानाधिकरणत्वादेशात् सिद्ध्या काले कालिकसंबंधावच्छिन्नभेदत्वावच्छि
न्नाभावस्यासंभवेनायोगोलकावच्छेदेन कालवृत्तेः कालिकसंबंधेनायोगोलकभेदाभावस्य प्रतियोगितायां शुद्धभेदत्वस्यैवावच्छेदकत्वासंभवा क
दिति भावः॥ संयोगेन साध्यतायामप्रसिद्धिमुक्त्वा समवायेन साध्यतायामाह॥ एवमिति॥ द्रव्यत्वस्यापि हस्ति संभवादित्यत्र परिहरति॥ गृह्यमानि
ति॥ दोषाभावादिति॥ अयोगोलकभेदत्वादेः धूमवन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषसंबंधादिघटितो क्षोपाधितावच्छे
दकत्वानपायादिति भावः॥ समानाधिकरण्यतावच्छेदकत्वपर्याप्त्येकाधिकरणत्वेन च प्रतिबध्यप्रतिबंधकभावः॥ वैशिष्ट्यतावच्छेदकस्य तत्पुरुषीयत्वादे
श्चानिवेशेन लाघवादृसाध्येन तत्पुरुषीयत्वमत आह समानाधिकरण्यतावच्छेदकतापर्याप्तिव्यापकत्वं धर्मः भाव इत्याशयेनाह॥ तथापीति॥
पक्षे यद्धर्मपर्याप्तिमिति चात्र तद्धर्मेतरावृत्तित्व॥ अप्रसिद्धिरिति॥ अस्ति च धर्मिकप्रमात्मकज्ञानस्याप्रतिबंधकतावच्छेदकानाकांततत्पातदादाये
वलक्षणसमन्वयादिति भावः॥ गौरवभूतद्रूपरूपगणस्य आह॥ ननु प्रतियोगिताभ्युपगमे तु पर्याप्तिरेव सर्वत्राभावत्वेनैव संबंधेन प्रतियोगिनो मु
मेमात्राभिसम्बन्धसादाह॥ प्रसिद्धेति॥ अभिघाटितविशिष्टधीजनकत्वादिघटितत्वादिसंबंधघटितत्वादिति भावः॥ सांसर्गिकविषय
ता अथ तत्स्वरूपसंबंधत्वस्यैवैतेनानवस्थितत आह॥ गौरवं चेति॥ संबंधत्वनिवेशे गौरवं चेत्यर्थः॥ प्रतियोगिनिष्ठत्वमात्रप्रतियोगिमात्रनिष्ठ राम
६८

त्वम्॥ विशिष्यानुसरणम्॥ सुलानुसरणम्॥ अभावसंबंधिता दिशाऽत्रस्याविषयसत्त्वादिति भावः॥ तदेव स्वाभावसंबंधिताद्विकमेवा॥ देतेपी
ति॥ स्वेपिना प्रतिबंधकत्वघटितप्रतियोगित्वपरिग्रहः॥ न च प्रतिबंधकत्वघटितप्रतियोगित्वं गौरवेणाऽपूर्वमेव दूषितमिति वाच्यम्॥ स्वाभावसंबंधि
तादृशे घुते पिप्रविबंधकघटितप्रतियोगित्वेतस्याप्रवेशेन लाघवस्याप्रयोजकत्वादयोरलक्षणत्वं स्वत्वमिसाशयात्॥ तत्र प्रवेशाइतिभ्रम पि
निरासायाह॥ तत्र षष्ठ्यर्थ इति॥ षष्ठ्यर्थप्रतियोगितालक्षणेऽस्यर्थः॥ सकारेति॥ संस्कारतानुमापोरानुबंधिनी॥ गुरुर्वचनादिति॥ तथा च तत्र
प्रतियोगितापवेशे स्वाववक्षकत्वेतिभावः॥ अथ प्रतियोगितालक्षणेप्रतियोगितायाः प्रवेशेपि न क्षतिः तस्याः संसर्गतया प्रवेशेन दुर्लभ
लाघभावेनात्मत्वाश्रयाप्रसंभवादिति चेन्न॥ लाघवेन स्वरूपसंबंधस्यैव प्रतियोगितारूपत्वे नत्वभावविरहात्मकत्वस्य संसर्गतास्वीकारात्॥ षष्ठीसमासेति
पदस्य साध्यमिति सामानाधिकरण्यार्थकषष्ठीसमासे सत्यर्थः॥ सलोहेति॥ सोपाधेरपि तथात्वादित्यादिनेत्यर्थः॥ प्रतियोगितावच्छेदकमात्रस्येव
ति॥ न धर्मिमात्रस्यैवेत्येवकुतो नोक्तमिति वाच्यम्॥ धर्मत्वेन लक्षणेऽभिवेशात्वान्न तु हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमात्रस्येत्ये
व तु संचितलक्षणे तदेवाभवेशदित्याह॥ तथाचेति॥ स्वतएवमितो के मुतिकन्यायो दिति भावः॥ तथात्वम्॥ साध्यसमानाधिकरणाभावप्रति
भागेवा २ योगितावच्छेदकत्वम्॥ वस्तुतस्तु तिगंधप्राप्याव्यसरे॥ द्दिर्शितम्॥ अन्यमात्रस्यैव कालोपाधितपेसादिनोऽसमवायेन साध्यतायां ज्ञातित्व
भेद १ स्य साध्यवन्निष्ठप्रतियोगितावच्छेदकत्वसंभवादाह॥ तादात्म्येनेति॥ सप्रकारेति॥ आह[illegible]नेकत्वांशपरिग्रहः॥ विशेष्येति॥

69

म०टी०
६९

इदं च विषयिताया विशेष्यिताख्यविषयितादिना संबंधत्वमुपेत्योक्तम्॥ यत्त्वतो विषयितेत्येव सम्यक् तेन संबंधेन ज्ञाते ऽभावस्य तत्त्वान्निःसादिना।
निःसगुणत्वादिविषयकज्ञाने सत्त्वादिति ध्येयम्॥ न च विशेष्यितादेर्नियामकत्वाकल्पकप्रतियोगि॥ तावच्छेदकत्वं भिन्नत्वात्कथम्॥ आचार्याणां वृत्ति
नियामकसंबंधस्याप्रतियोगितावच्छेदकत्वस्य पाठसंमतत्वात्॥ अनिःसंसंयोगादिगुणविशेष्यकज्ञानविषयस्य विषयिताख्येन संबंधेन ज्ञाते इ
ज्ञावस्य प्रतियोगितावच्छेदकं भिन्नत्वमेव न तु तत्त्वघटितं ज्ञातत्वमित्याशयेनाह॥ निःस्येति॥ ज्ञाततस्यैवेति॥ एवकारेण समवेतत्वेनाज्ञत्वं व्यवच्छे
द्यं॥४॥ प्रतियोगितावच्छेदकत्वादिति॥ समवेतत्वावच्छिन्नं निःसगुणस्य विशेष्यितया तत्र ज्ञातेनापि समवेतत्वावच्छिन्नाभावस्य तत्रास
त्त्वादिति भावः॥४॥ स्वरूपसंबन्धेति॥ तथा च मेयत्वावच्छिन्नप्रतियोगितावच्छेदकस्य ज्ञातिह्वस्य साध्यसमानाधिकरणाभावप्रतियोगिता
वच्छेदकत्वान्नियमे व्यभिचार इति भावः॥ असंकोचेनैवोपपत्तौ संकोचो व्यर्थ इत्यस्वरसादाह॥ कश्चिदिति॥ असिद्धेरिति
गुरुधर्मस्य गगनादौ तच्चेतास्वरूपेण विशेषितया च तादृशाभावप्रतियोगितावच्छेदकत्वासिद्धेरित्यर्थः॥ अभिचारिणीति ग्रंथस्यापि
लक्षणे व्याप्तिप्रसंगः भावभेदकसंकल्पनया तदतिव्याप्तिं परिहारमाह॥ ३ अविवक्षणादिति॥ लक्षणदूषकस्यैवेति॥ पञ्चाङ्कते
नेतुद्देश्यविधेयभावव्यतिरेकेण विपरीतयोजनया चेल्लक्षणादूषणं व्याप्तेः संग्राभावप्रदर्शनं संभवान्नेत्यर्थ इति भावः॥४॥ वस्तुत
इत्यादिध्येयमिदृशादिसंग्रहस्यासामान्येत्यादिग्रन्थे केषांचिन्मतमाह॥ अन्ये सादिनावहद्वत्स्वमृतेन॥ अविवक्षणादिति॥ तथा केतो

२१ राम ६९

त्यमेवेति भावः ॥ न त्वाहुः ॥ लाघवाभावात् ॥ अत एव ॥ कात्मनिकत्वादेव ॥ उक्तोलितः ॥ उपरि लिखितः ॥ तादात्म्येनावच्छेदकत
यावायौ गोलत्वभेदसावच्छेद्यत्वं यथाप्रयोगोलक[illegible]भेदनिरुपकारणादेर्विशेषणतया योऽभावस्तस्य समानाधिकरणे सं
बंधावच्छिन्नप्रतियोगितानाकाभावेऽननैकेवलान्वयिताभावेन चायोगोलकभेदत्वादेः तत्प्रतियोगितावच्छेदकतयानन्तलक्षणप्रवच्छेद
कतापांसंबंधेष्वविवक्षणस्यावश्यकत्वेन नाव्याप्तिसंभव इति वस्तुतः[illegible]प्राचः समीचीनएवेत्यस्वरसोद्धारः ॥ वह्न्यादि इति ॥ यावत् सादि
त्संत्स्वादिविशेषणतावमेएकव्यक्तिसाध्यकेऽव्याप्तिरेकव्यक्तिसाध्यकेऽभिचारिणीपतिप्रसंगश्चकर्मधारयपक्षे चासंभव
इति भावः ॥ संहतलक्षणे केवलान्वयिन्यव्याप्तिमुपपादयति ॥ केवलान्वयीति ॥ अनुपादानादिति ॥ योऽपि तुमिसंनेनान्वयः
अनुपादानस्योऽननापामप्रयोजकत्वेऽपि विकल्पप्रयोजकत्वेन विशिष्टप्रयोजकत्वाच्चानुपपत्तिः ॥ न्यूनताभिति ॥ साध्याश्रय योजना
साध्यसमानाधिकरणयोः कालत्वानुक्तेरिति भावः ॥ परिहर्तुमपरिहर्तुं च ॥ साध्यमित्यति ॥ साध्यतावच्छेदकावच्छिन्नेतिशेषः
तेन विशिष्टसत्तादिसाध्यके नातिव्याप्तिः ॥ पृथिवीत्वसमानाधिकरणजातीनामेकाधिकरणासिद्ध्याप्यथाश्रुतेऽतिप्रस
संभवेन सामानाधिकरण्यं विहाय व्यापकत्वमुक्तम् ॥ तथा च पृथिवीत्वव्यापकतामात्वाद्वैतगगनादिवारणे जातिपदं व्यर्थमतआ ब
ह ॥ पृथिवीत्ववदित्यादि ॥ असंगतिरिति ॥ एकव्यक्तिकहेतुस्थलेपि साध्यस्य कालस्य संभवादिति भावः ॥ परमतीति ॥ न्यूनताभं

भ०टी०
७०
गायेति भावः ४ ॥ तदेवं लक्षणासत्त्वमेव ॥ इदम्मं लक्षणसत्त्वम् ॥ तद्दोषस्य ॥ एकमात्रवृत्तित्ता व्यक्ते ॥ व्याप्तिरूपदोषस्य ॥ चतुर्थे वृत्त्यादिसमाना
धिकरणानां यावतामेकाधिकरणप्रसिद्ध्याव धृतो दोषासाध्यस्थला द्भवति आद्विवेर्नसंभवतिरसतस्तदाएयमाह ॥ साध्येत्यादि ॥ पावद्वंश्यापकेऽपर्यव
सितमसाध्येन दोषितावच्छेसाध्यंग्रात्र प्रतियोगितावच्छेदकधिकरणघटितलिङ्गलक्षणे गगनत्वविशिष्टस्य सवह्न्यन्द्रव्यत्वादिस्याद्भवतिप्रा
प्तिवारणाय तद्धर्मावच्छिन्नसामानाधिकरण्यमेव वाच्यं प्रकृतलक्षणे च तद्धर्मावच्छिन्नसामानाधिकरण्येऽत्र साध्यपूर्वदलेनैव तत्रातिव्या ल्वे
प्तिवारणासंभवेन तद्धर्मावच्छिन्नसामानाधिकरण्यनिवेशप्रयोजनाभावेन तद्धर्मावलीढेऽस्यैवाभिमतिश्चेयम् ॥ गौरवमेवप्रकृतस्थले एव इति ॥ इ
दं च यथाश्रुताभिप्रायेण ॥ वस्तुतो वक्ष्यमाणलक्षणस्यैव प्रतियोगिवैयधिकरण्यप्रवेशतात्पर्यत्वम् ॥ अत एव व्याप्त्यनुगमग्रन्थेषु समानाधि
करणा ४ सर्वसाध्यसमानाधिकरणेत्यनेन प्रकृतलक्षणमेव दर्शितमिति कृतावच्छिन्नमितिध्येयम् ॥ साध्यं यिनेतीति ॥ अत्र साध्यमितिपद
णं अभावस्य विना एतत्पदार्थत्वे भावपदार्थवृत्तित्वे तस्यान्वयोनुपपन्न इत्यत आह ॥ अत्रेति वस्तुगत्या भावव्यापकीभूते साध्यं लाभायाह ॥
अत्र विसादिर्नो विभावइत्यत्रेन तत्प्रश्लेषमभिप्रेत्याह ॥ तथा च साद्दि ॥ प्रतियोगित्वम् ॥ प्रतियोगिस्वरूपम् ॥ अर्थासंगते ४ ॥ येनकेनचिदि
र्थासंगते ४ ॥ एकनिरूपितसामानाधिकरण्यस्यान्यनिरूपितत्वापि लाभाव इति भावः ४ ॥ आह ॥ व्याप्तिव्यभिचारेण व्यभिचारग्रहस्या ९म
हेतुत्वमाह ॥ पक्षधर्मताधीरिति ॥ अनुमितिजनिकात त्रैतिशेषः ४ ॥ वाच्य इति ॥ तथा च साध्यसमानाधिकरणवृत्तिपदं तु तावच्छेदकेत ७०

इत्यवच्छिन्नवत्ताज्ञानजन्यानुमितौ तद्धेतुतावच्छेदकावच्छिन्ने व्यभिचारज्ञानाभावः कारणमिति भावः ॥ वह्निसमानाधिकरणेति ॥ तथा चैतादृश
ज्ञानजन्यानुमितेरसंग्रह इति भावः ॥ तेन रूपेणेति ॥ तथा च वह्निसमानाधिकरणवान् पर्वत इति हेतुतावच्छेदकाविषयकज्ञानजन्यानुमितौ वह्निस
मानाधिकरणतावच्छिन्ने विशेष्यके व्यभिचारग्रहाभावस्य सत्त्वात् तद्रूपेण हेतुत्वं व्यभिचारिति नोक्तदोष इति भावः ॥ वह्निमद्न्यवृत्तित्वप्रकारेण वह्निमद्न्योन्य
त्वरूपहेतुतावच्छेदकप्रकारेण न व्यभिचार इति तथा च न तदनुरोधेनाव्यभिचारज्ञानस्य हेतुत्वमिति भावः ॥ परमेश्वर इति ॥ व्यापकज्ञाने हेतुतावा ना ४
च्छिन्नसामानाधिकरण्यज्ञानस्य हेतुत्वं नोपेयते इत्यर्थः ॥ इदं सामानाधिकरण्यस्य निरुक्तव्याप्तिस्वरूपत्वात् तद्रूपेणेति ॥ कारणतायामिति पू
र्वेणान्वितम् ॥ ज्ञानस्य व्यभिचारज्ञानस्य ॥ हेतुत्वे हेतुमत्ताभावप्रतियोगितया वेद्यो ॥ कारणतान्तरेति व्यभिचारज्ञानाभावस्य तन्त्रेषु लाघवा
न्निश्चयत्वघटकतद्भावाप्रकारकत्वापेक्षया लाघवात् ॥ अतिगौरवादिति ॥ अव्यभिचारनिश्चयत्वघटकसंसर्गापेक्षया व्यभिचारज्ञानीयभ्रमत्वनि
श्चयत्वघटसंसर्गस्यातिगुरुत्वादिति भावः ॥ सत्वमिति ॥ अथ व्यभिचारसहप्रतिबंधकतावच्छेदकीभूताभावप्रतियोगिभ्रमनिश्चयेऽप्रमाज्ञानमा
त्रमुत्तेजकं अव्यभिचारनिश्चयकारणतावच्छेदकीभूताभावप्रतियोगिभ्रमत्वे ज्ञाने तु भ्रमत्वनिश्चयोत्तेजकत्वं व्यभिचारनिश्चयहेतु
त्वे गौरवमिति चेन्न ॥ अनवस्थाभयेन क्वापि भ्रमत्वे ज्ञाने भ्रमत्वज्ञानादेरनुत्तेजकत्वात् परं मणिदोषे संसर्गांतरसत्त्वेऽप्यनुमित्यादेरसत्त्वे कारणत्वे
तथाभ्युपगन्तुः ॥ तादृशविषयविशेषाभ्युपगन्तुः ॥ अभ्युपगन्तुरित्यनेन तादृशविषयविशेषमानाभाव इति सूचितम् ॥ दृष्टत्वादिति ॥ तादृश
स्थलविशेषलाघवेन व्यभिचारज्ञानाभावस्य हेतुत्वेऽपि सर्वत्रैव ज्ञानीयसाऽव्यभिचारनिश्चयस्यैव हेतुत्वमुचितमिति भावः ॥ अनुमितौ व्याप्तिज्ञाने

71

म०टी० ७१ वेतिमतमेदेनेदम्॥ व्याप्तिज्ञानाप्रतिबंधकत्वेति॥ नु एवं तर्हि तदानीमनुमित्सनुदयप्रसङ्गानुभवसिद्धत्वेनप्रतिबंधकत्वकल्पनस्यावश्यकत्वं
सूचितम्॥ एकविधमिति॥ यादृशव्यभिचारज्ञानस्यैव हेतुत्वं तत्प्रतियोगिभेतमिसूर्त्वः॥ साध्यसामानाधिकरण्यविशिष्टहेतुमत्वं साध्य
त्वविमानत्वेम्भवती साधारण्येनाह॥ तत्त्वेति॥ तज्ज्ञानस्यैवेति॥ नचैवं व्यभिचारज्ञानकालेप्यनुमित्सा निर्वृतिका स्यादिति वाच्यं मैवं गदाधरोक्तत्वात्॥ व्यभिचार
ज्ञाने हि अन्यत्रैवप्रसक्तोपि साध्याभावो न विषयतोति संभावनाद्वारानुमित्सनुत्सादकं यो ज्ञात्वं साध्यसामानाधिकरण्यविशिष्टहेतुमत्वाभि
ण्येचनैतादृशी संभावनासंभवतीत्याशयात्॥ विनेतीति॥ तथानुमित्सां विनोक्तोप्यनुमितिर्नस्यादिति भावः॥ अत्रायम्भिचारितुसाध्य
सामानाधिकरण्यग्रहहेतुत्वेनाभिचारस्य साध्यविशेषणत्वेन सामानाधिकरण्यस्य चोपलक्षणत्वमिति तदुपलक्षितहेतुनिश्चयः पक्षे साध्य
निर्णयं विनैव संभवतीति हृदयम्॥ सामानाधिकरण्यस्यैवेति केवलान्वयित्वस्य विशेषणत्वोपलक्षणत्वाभ्यां विकल्प्य॥ मतम्॥ मूलोक्तं केचिन्म
तम्॥ दूषयति॥ साध्यवत्तावच्छिन्नभेदेनिवेशेमूलोक्तदोषासंभवेनकेवलान्वयिसाध्यसंबंधदृशन्नमूलेदोषानुक्तश्चाप्यपवक्ष्यमाणोपेक्षयागौरवे
णदूषयति॥ केवलान्वयिन्यग्रहेऽ॥ सामानाधिकरण्यविशेषणतापक्षे साध्यविशेष्यकेवलान्वयिन्यग्रहेऽ॥ एवं च दीधितावप्यग्रहइत्यस्यतादृश
साध्यइत्यादिः॥ वृत्तिमत्वेति॥ असंताभावविशेषणतये त्यादिः॥ साधनवतइतीति॥ प्रथमम्भिन्नेसतद्वृत्तित्वस्येति दिक्॥ नीयमभिन्नेसत्किं
पृथगिति॥ तथा च मूलोक्तकेचिन्मते साध्यवद्वृत्तित्वज्ञानस्य हेतुत्वांतरकल्पनोत्तवैमेवदोषइति भावः॥ लाघवांतरमाह॥ एकस्येति
वेति॥ ॥ ॥ इति श्रीपुरणामकरमहादेवरचितायां सर्वोपकारिण्यां भवानंदीव्याख्यायां पूर्वपक्षग्रंथः समाप्तः॥ ॥ ॥ एम ७२

॥श्रीगणेशाय नमः॥ ॥नञ्समासेति॥ समासस्थाव्यवस्थितस्य पदस्यानुसंधानं एवं च प्रतियोगितावच्छेदकावच्छिन्नं पुनर्भवती
ति फले यत्पदोत्तरनञ्प्रतियोगिपदोत्तरमनुसंधेयं इति भावः॥ अथ नञ्समासेऽपि महानसीयवह्न्यभावप्रतियोगिताव
च्छेदकत्वस्य वह्नित्वादौ सत्त्वेनाव्याप्तिरसिद्धेति चेन्न॥ पर्याप्तिसंबंधेन प्रतियोगितावच्छेदकतावच्छिन्नभेदरूपस्य प्रतियोगितान
वच्छेदकत्वस्य विवक्षणात्॥ प्रतियोगितानवच्छेदकावच्छिन्नेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्मस्तद्धर्मावच्छिन्नेनेत्युक्तौ बी
जमाह॥ वह्निमानित्यादि॥ संयोगेन साध्यतायां दोषमुक्त्वा समवायेन साध्यतायां तमाह॥ पृथिवीति॥ वस्तुतस्तु प्रतियोगितानव
च्छेदकस्य सामानाधिकरण्यनिरूपकतावच्छेदकत्वोक्तावपि दोषमाह॥ पृथिवीतिसुसेवरमणीयम्॥ प्रकृतेति॥ प्रकृतसाध्यता
वच्छेदकावच्छिन्नविधेयकानुमितौपयिकव्याप्तिलाभो वा दिगर्थः॥ तादृशप्रतियोगितानवच्छेदकवह्नित्वावच्छिन्नतद्व्यक्तिसमाना
धिकरणधूमवानित्यादिज्ञानाद्वह्नित्वावच्छिन्नविधेयकानुमितेस्तादृशप्रतियोगितानवच्छेदकद्रव्यत्वावच्छिन्नद्रव्यत्वसमाना
धिकरणगंधवानित्यादिज्ञानात्पृथिवीवृत्तित्वविशिष्टद्रव्यत्वावच्छिन्नविधेयकानुमितेश्चानुदयादिति भावः॥ तद्धर्मावच्छि
न्नेनेति॥ तथा च प्रतियोगितानवच्छिन्नेनेत्युक्तावुपदर्शितानुमित्यापत्तिरिति तद्धर्मावच्छिन्नेनेत्युक्तम्॥ तेन च प्रकृतसा
ध्यतावच्छेदकावच्छिन्ननिरूपितसामानाधिकरण्यस्य प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयकानुमितौपयिकव्याप्तित्वला

72

भेन प्रकृतसाध्यतावच्छेदकावच्छिन्नविधेयकानुमितौ प्रकृतसाध्यतावच्छेदकावच्छिन्ननिरूपितसामानाधिकरण्यात्मकव्याप्तिज्ञा
नस्यैव हेतुताकल्पनान्नोक्तापत्तिः ॥ अत एव तद्धर्माश्रयेणेति नोक्तमिति भावः ॥ निरुक्तसामानाधिकरण्यस्यैव व्याप्तित्वेन तद्रूपवि
शिष्टस्य साध्यत्वकमनर्थकमत आह ॥ तद्रूपेति ॥ लक्ष्यमिति ईदृश इति ॥ तथा च तद्रूपविशिष्टस्य साध्यस्य तद्रूपावच्छिन्न ॥ लिंगकतद्धर्माव
च्छिन्न यावद्विधेयकानुमितिजनकज्ञानविषय इत्यर्थः । कस्य निरुक्तसामानाधिकरण्येऽन्वयेन निरुक्तसामानाधिकरण्यवि
षयतया तद्रूपावच्छिन्नलिंगकतद्धर्मावच्छिन्नविधेयकानुमितिजनकतावच्छेदकत्वलाभेन तादृशावच्छेदकत्वस्य लक्ष्यताव
च्छेदकत्वं पर्यवसितम् ॥ अत एवैतल्लक्षणवाक्यस्यानन्वेनुमितिहेतुज्ञाने काव्याप्तिरितिप्रश्नोत्तरत्वमपि संगच्छत इत्याशयः ॥
द्रव्यत्वेति ॥ धूमत्वघटितव्याप्तेर्द्रव्यत्वावच्छिन्नलिंगकानुमित्यौपयिकत्ववारणायेत्यर्थः ॥ धूमत्वावच्छिन्नलिंगकव्याप्तिज्ञानात्
द्रव्यत्वावच्छिन्नलिंगकानुमित्यापत्तिवारणायेति भावः ॥ तद्रूपविशिष्टस्येतीति ॥ यथा च तद्रूपाश्रयस्य सत्त्वात् तद्रूपविशि
ष्टस्येत्यर्थः तथा तद्धर्मावच्छिन्नलिंगकव्याप्तिज्ञानजन्यतावच्छेदककोटौ तद्धर्मावच्छिन्नलिंगकत्वनिवेशलाभान्नोक्तापत्तिः ॥ अ
त एवानुमितिजनकतावच्छेदककोटौ तद्धर्मावच्छिन्नलिंगकत्वलाभाय यद्दीधितौ तद्रूपविशिष्टसामानाधिकरण्येनेत्युक्तमिति
भावः ॥ तत्रैव ॥ धूमत्वविह्नित्वघटितव्याप्ताविव ॥ तत्तद्वह्नित्वादिनेति ॥ तत्तद्वह्नित्वावच्छिन्नविधेयताकानुमित्यौप[illegible]वारणाये

यिकत्व

सेऽर्थः॥ वह्नित्वावच्छिन्नत्वनिरूपितव्याप्तिज्ञानात् तत्तद्वह्नित्वावच्छिन्नविधेयताकानुमितिः सोपस्थितिकारणमेवेति यावत्॥ तद्धर्मावच्छिन्नेती
ति॥ तथा च तद्धर्माश्रयो यः सन्नुत्पन्नस्तद्धर्मावच्छिन्नेऽस्य तस्य तद्धर्मावच्छिन्ननिरूपितव्याप्तिज्ञानजन्यतावच्छेदककोटौ तद्धर्मावच्छिन्नविधे
यताकत्वलाभान्नोक्तापत्तिरिति भावः॥ व्याप्तित्वम्॥ व्याप्तिस्वरूपत्वम्॥ सामान्यरूपताऽऽवश्यम्॥ तथा चैतत्स्यैव वान्हित्वत्वेसादिना
व्यापकसामानाधिकरण्यविशिष्टधूमत्वादिकं व्याप्तिरिति भाववक्ष्यतीत्याशयः॥ यथाश्रुते सामानाधिकरण्यस्य प्रतिव्यक्तिविश्रा
न्तत्वेनैक्यानुपपत्तेः साध्यसापत्तेरिति॥ दुर्घटमिति॥ तथा च व्याप्तिरिति भावः॥ तद्विशेषणतया॥ दंडविशेषणत्वेन॥ प्रतियोगिता
वच्छेदकतयाभासतद्दसन्नुपपद्यते॥ गुणेन्यत्वस्येति॥ अवच्छेदकत्वं भासतेऽनन्यथा तदसन्नुपपद्यते तथा चोक्ताव्याप्तिर्दुर्वारैवेति भा
वः॥ ननु तद्दंडी नास्ती त्यादिप्रतीतौ दंडी नास्ती त्यादिप्रतीतौ वैलक्षण्यं निर्वाह्यप्रतियोगितावच्छेदकतयाभासमानेनैव लोकसिद्धवि
शिष्टविशेषणत्वेन प्रतियोगितावच्छेदकतया भासमानाविशेषकम्॥ न चोपलक्षणतया तत्त्वभानेनैव वैलक्षण्यमिति वाच्यम्॥
अभावप्रतियोगितावच्छेदकेऽउपलक्षणतया तत्तद्धर्मान्तरभानेऽस्यानभ्युपगमादित्याह॥ किंचेति॥ समवायेनेत्यादि॥ सं
योगेन हेतुतायां समवायेन साध्यगगनादौ व्यभिचारेऽत्र समवायेन हेतुतायां संयोगेन साध्यतायां च तेन संबंधेन साध्या
धिकरणेऽप्यव्यवयवविशेषे व्यभिचारादिति भावः॥ उक्तप्रकार[illegible]ति॥ उक्तप्रकारसदृशप्रकारेसर्थः॥ यो येश्रुते तन्नावि

म०टी० ८३

विष्टदंडएवप्रतियोगितावच्छेदकरसाध्रुत्वप्रकारस्यात्राप्रसक्त्याऽसंगतेः॥ परंपरासंबद्धमिति। अत्र परंपरासंबंधेनेत्युक्त्वा
वह्निवृद्धिरेकदेशान्वयश्चेतित संगः॥ साध्यतावच्छेदकतानिरूपकइति॥ समवायेन वह्न्यादिसाध्यकसद्धेतौ विषयितया व
ह्न्यादिमज्ज्ञानाभाववत्तादृशव्याप्यतादृशसंबंधावच्छिन्नत्वस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणत्वादिति भावः॥ नन्वे
वं व्याप्यतावच्छेदकप्रकारेणैव व्यापकस्यानुमितौ भाननियमेन दंडवानित्येवानुमितिः स्यादित्यसाधारणमित्यपरिहा
रादिति। दंडत्वसामानाधिकरण्येनेति॥ विशेषदर्शनदशायां दंडिमानित्यनुमितेरनुभवसिद्धत्वे विवादादाह। येदिच्चेति
अवच्छेदकतानव्यासज्यवृत्तिः किंत्वेकमवच्छेदकमपरमवच्छेदकतावच्छेदकमेवेति पक्षमवलम्ब्याह॥ हेतुसमानाधिक
रणेत्यादि। तत्रानुमितावपि। तद्व्यापकताज्ञानजन्यानुमितावपि। एवमग्रेऽपि। अत्र चेति। व्यापकताज्ञानइत्यग्रिम
णान्वयः॥ तथैवेति॥ तस्य भानमिति प्राक्तनमनुषज्यते॥ द्वितीयमुल्लेखं करोति। नत्वेति। तेन संबंधेन। निरूक्तसंबंधे
न। तत्र। दंडत्वे॥ अनवच्छेदकत्वमानमिति। अनुमितिहेतुत्वेनोक्तमितिशेषः॥ सामानाधिकरण्यप्रतियोगि
तयाभाससमानेसाध्येयत्प्रकारतापन्नत्वेवत्तादृशाभाववत्प्रतियोगितानवच्छेदकत्वभानस्यानुमितिहेतुत्वादिति भावः॥ एम ८३
पर्याप्तत इंडिनि दंडत्वस्य प्रकारकारत्वेऽपि दंडत्वेऽनवच्छेदकत्वग्रहे बाधकाभावेनासंगतेः॥ नन्वेवं दृष्टांते दंडत्वादे

नोल्लेखवद्दृष्टांतिकेपि तथोल्लेखः स्यादत आह ॥ तयोरिति ॥ दृष्टांतदार्ष्टांतिकयोरित्यर्थः ॥ तत्र दृष्टांतिके ॥ दृष्टांते तु दंडत्वस्येतरवि
शेषणतानोपस्थितेर्वद्दंडांशे स्वातंत्र्येण प्रकारतया दंडवानित्युल्लेख इत्याशयः ॥ तयोः ॥ उक्तव्यापकताज्ञानयोः ॥ तत्राद्यस्मे ॥
प्रथमेत्युक्तस्थले साध्यदंडवान्निराकार इति व्याख्यानं तु न सत् ॥ तयोर्भेदस्य पक्षव्यापकताज्ञानद्वयसाधारण्यपूर्वमेवोक्तत्वेन पौन
रुक्त्यापत्तेः ॥ आह इति ॥ अत्रैतन्मतेपि दंडवान्निरनुमितेर्विलक्षणविषयताकज्ञानजनकमेवं दंडिमानित्यनुमिता
वपीत्यर्थः स्यादभेदविनाऽनिर्वाहे गाभावे दैवमनुपादेयमेवं च पूर्वोक्तमेव सम्यक् ॥ एतन्मतेनुमितेर्द्वैविध्येन कार
णताद्वैविध्येन गौरवं चेत्यस्वरसो बोध्यः ॥ सत्तासमवायविशिष्टसत्त्वस्य गुणत्वे हेतुसाध्यगुणत्वावच्छिन्ने इत्यसंगतमतो व्या
चष्टे ॥ अवृत्तेरिति ॥ तदेव विवृणोति ॥ तथा चेति ॥ विशिष्टसत्तासंबंधाभावादिति ॥ न च विशिष्टस्यानतिरिक्तत्व
पा सत्तासमवायात्मकविशिष्टसत्तासंबंधस्य गुणे सत्त्वेन कथं तदभाव इति वाच्यम् ॥ विशिष्टनिरूपितसंबंध
स्य विशेष्यसंबंधरूपत्वेन गुणे विशेषणाभावेन विशिष्टसंबंधाभाव इत्याशयात् ॥ व्यक्तिभेदविवक्षितैवैतद्गत ए

74

भ०टी० वच्चतुष्टयाम्।। ननु निरूपकतावच्छेदकत्वादिकं न स्वरूपसंबंधरूपं मानाभावात्।। नाप्यनतिरिक्तवृत्तित्वमन्यूनवृत्तित्वं
७४ वान्यूनवृत्तित्वानतिरिक्तवृत्तित्वोच्चातिप्रसंगात्।। नाप्यन्यूनानतिरिक्तवृत्तित्वं निरूपकतावच्छेदकत्वमभिमतधर्मेऽतिप्रसंगात्
अत आह।। निरूपकतावच्छेदकत्वमिति।। सामानाधिकरण्यप्रतियोगिनि वह्न्यादौ समवीवलात्प्रकारीभूतभा
समानेतद्व्यक्तित्वाद्यावतिप्रसंगवारणाय संसृष्टं गगनाद्यावतिप्रसंगवारणायेविशिष्टेत्युक्तम्।। भासमानत्वं च प्रमित
त्वम्।। तेन भ्रममात्रविषयीभूतेनोक्तदोषतादवस्थ्यम्।। ननु एवमपि प्रमेयत्वाद्यवच्छिन्नप्रसंगो वारणेऽपि सामग्रीवशेन तादृशभा ३
समानत्वस्यापि तत्र संभवात्।। एवं च वह्निमान् धूमादित्यादौ धूमादिव्यापकत्वे धूमादिविशिष्टवह्न्यादिव्याप्तिनिरूप
कतावच्छेदकत्वापत्तिर्दुर्वारैवेति चेन्न।। तादृशप्रतियोगितानवच्छेदकत्वविशिष्टत्वनिरुक्तभासमानत्वेतारसपीत्
सामानाधिकरण्यान्तःनिवेशस्य।। तादृशधर्मस्य।। तेन गगनाद्येनातिप्रसंगः।। एकनिरूपकतेत्यादि।। अत्रेदं बो एम
ध्येयम्।। तदाक्षेपस्य।। व्याप्तिज्ञानानुपपत्तिरूपाक्षेपस्य।। अनुद्धारादिति।। एवं वह्नित्वं धूमस्य वह्नित्वधूमवाद ७४

निरूपकतावच्छेदकादेरैक्यप्रतिपादकत्वेपि सामान्यलक्षणायाः प्रत्यासत्तित्वानभ्युपगमेन व्याप्तिज्ञानोपपादक
त्वाभावात्तत्स्फूर्तिभावः ॥ भानमिति ॥ तथा चैकैकवह्नौ साहित्यस्य धूमत्वाद्यधिकरणतावच्छेदकैक्यप्रतिपादकस्य धूमत्वा
दिघटितपरंपरासंबंधेन दृष्टांतीयहेतुनिष्ठसाध्यसामानाधिकरण्यस्य पक्षीयहेतुवृत्तित्वप्रतिपादनद्वारा पक्षीय
हेतौ व्याप्तिज्ञानोपपादकतया नासंगतिरित्याशयः ॥ अत्र च सामानाधिकरण्यमुपलक्षणं तथा संबंधघटकं तेनैत
त्संबंधस्य मीमांसकीयत्वेन तन्मतेऽन्यथाख्यात्यापत्तिरिति निरस्तम् ॥ साक्षात्संबंधेनेति ॥ अन्यथातिप्रसंगा
दिति भावः ॥ दीधितौ रासभेपि सत्वादिति रासभेपि सत्वेन रासभो वह्निव्याप्य इति व्यवहारापत्तिरित्यर्थमभि
प्रेत्याशंकते ॥ न चेति ॥ तत्सत्वेपि निरुक्तसामानाधिकरण्यसत्वेपि ॥ न क्षतिः ॥ न रासभो वह्निव्याप्य इति व्यवहा
रापत्तिः ॥ तावता ॥ तद्रूपविशिष्टस्य सादिकरणेन ॥ व्यवहाराभावेति ॥ तद्रूपविशिष्टस्य सादिकरणेन समभि
व्याहृतपदोपस्थाप्यतावच्छेदकत्वोपलक्षितधर्मावच्छिन्नव्यापकसामानाधिकरण्यस्यैव व्याप्तिपदार्थत्वला

भ०टी०
७५

भादितिभावः॥ पक्षधर्मतांशे व्याप्तिप्रकारतयेति॥ एतत्त्वमनुमितिलक्षणे निरूपितम्॥ अनुमित्सापत्तेरिति॥
यद्यपि तद्धर्मावच्छिन्नव्यापकसामानाधिकरण्यविशिष्टतद्धर्मावच्छिन्नवत्ताज्ञानत्वेनानुमितिहेतुतोक्तौ नोक्तापत्ति
स्तथापि पक्षधर्मतांशे पक्षधर्मप्रकारकज्ञानत्वेनानुमितिहेतुतास्यैव व्याप्तितया निरुक्तसामानाधिकरण्यमात्र
स्य व्याप्तित्वे पक्षधर्मतांशे तत्प्रकारकज्ञानत्वेनैवानुमितिहेतुतया तस्य च धूमव्यापकवह्निसमानाधिकरण
धूमवानिति ज्ञानमिव धूमव्यापकवह्निसमानाधिकरणत्वेन ततोनुमित्सापत्तिरित्याशयः॥ स्वरूपतः प्रका
रत्वमिति॥ ज्ञाते स्वरूपतः प्रकारत्वं समवायातिरिक्तसंबंधानवच्छिन्नमिति नियमस्य साक्षात्संबंधवि
षयकत्वादिति भावः॥ संकोचासहिष्णुरहं गदाधरस्येति॥ तादृशनियमस्य साक्षात्परंपरासाधारण
संबंधविषयकत्वेन धूमत्वस्य सामानाधिकरण्यसंबंधेन स्वरूपतः प्रकारत्वासंभवेपीत्यर्थः॥ धूमीये एम
ति॥ आधेयतासंबंधेन धूमविशिष्टस्येत्यर्थः॥ सामानाधिकरण्यमिति॥ व्याप्तिरित्यनुषज्यते॥ तत्प्रकार ७५

कमिति॥ क्रमेण धूमत्वविशिष्टसामानाधिकरण्यप्रकारकं धूमीयतादृशसामानाधिकरण्यप्रकारकमित्यर्थः
तत्प्रकारकाराकज्ञानं चेति॥ तत्प्रकारकपक्षधर्मताज्ञानं चेत्यर्थः॥ धूम इति व्याप्तिविनाशात्तेभीनाशे भाविधूमत्व
विशेषकसामानाधिकरण्यप्रकारकज्ञानस्यापि धूमो वह्निसमानाधिकरण इति ज्ञाने एव पर्यवसानादिति
भावः॥ ज्ञानोत्तरेति॥ साध्यसामानाधिकरण्यविशिष्टधूमत्वस्य व्याप्तित्वेन तत्प्रकारकज्ञानस्य विशिष्टवै
शिष्ट्यबोधरूपत्वादिति भावः॥ कालीनमिति॥ अनुमितौ हेतुरिति आगुक्तमनुषज्यते॥ तत्रापि॥ द्वितीयक
ल्पेपि॥ नगौरवमिति॥ प्रथमकल्पापेक्षयेत्यादिः॥ विनिगमनाविरह इति॥ विनिगमनाविरहस्य युक्तेर
धिकत्वकल्पे दूषणमित्यर्थः॥ रासभस्यापीति॥ अपिना धूमपरिग्रहः॥ तद्वारणेति॥ रासभवारणे इत्यर्थः
तथा च हेतुतावतो रासभस्याज्ञवेशे धूमरासभयोर्द्वयोरपि महानसवृत्तित्वेन विशिष्टत्वेन हेतुतापातः तद्रूपनिष्ठतद्
नुयोगितावच्छेदकवह्निसामानाधिकरण्यस्यैक्येन वह्निमान् धूमादित्यादौ धूमरूपहेतुनिष्ठस्यापिता

76

अ० टी० ष्ठसामानाधिकरण्यस्य एसभेसत्त्वेन प्रवैक्ष्यानुमित्यापत्तिः॥ हेतुतावच्छेदकवतीसम्बन्धप्रवेशे तु प्रकृतहेतुताव-
७६ च्छेदकधर्मावच्छिन्नतादृशसामानाधिकरण्यस्य एसभेऽसत्त्वान्नोक्तापत्तिरिति भावः॥ एतेन वह्निमान्मेहान-
सवृत्तित्वविशिष्टाद्यौ दिसाद्देशस्भस्याप्रिहेतुतयालक्ष्यत्वेन तद्वारणमसंभवे हेतुतावच्छेदकवतीसम्बन्ध-
वेशेपि तद्वारणासंभवश्च तस्यापि महानसवृत्तित्वविशिष्टरूपहेतुतावच्छेदकज्ञानपाधात्साधकाया
ऽनवकाशः॥ कथमिति॥ एकावच्छेदेन भावाभावयोर्विरोधेन सर्वावयवावच्छेदेन संयोगसत्त्वे संयोगसा-
मान्याभावासंभवादिति भावः॥ तर्हि॥ इष्टे संयोगसामान्याभावसत्त्वे हि॥ तद्देशेन विरोधाभावप्रसंगमर्ष्यमनि-
रस्यायाह॥ तत्रैव वृक्षे वेति॥ नयोग्येति॥ यावत्प्रतियोगियोग्यत्वाभावेनेत्यर्थः॥ मतेन॥ वर्द्धमानोपाध्यायम-
तेन॥ तयोः संयोगसामान्याभावस्याप्रत्यक्षत्वे॥ यावत्प्रतियोगियोग्यत्वेनैव तज्ज्ञानसामग्रीसत्त्वे कस्यचिन्मतमा- एम
ह॥ उद्भूतेत्यादिना कश्चिदित्यन्तेन॥ यावत्प्रतियोगियोग्यतासंपादनाय समवेतान्तं संयोगविशेषणम्॥ ७६

कश्चिदिति॥ अत्रोपक्रान्तसंयोगसामान्याभावस्यैवाप्रसक्तत्वमुपपादनीयं न तु भावान्तरस्येत्यस्तु रसो वो ऽप्य॥४॥प
थाश्चैतेष्वपि योगिन एव प्रत्यक्षत्वात्सामान्यानि वेत्येतत्सामान्याभावो विशिष्टाभावावच्छिन्नावच्छिन्नाभावमादाय घटे रूपी पृथ्वीयाव
च्छिन्नेषु तेषामभावसत्त्वेन रूपसामान्याभावस्य तद्व्यभिचार॥४॥ विशिष्टाभाववाद्दुत्ताद्यवच्छिन्नाभावमादाय तद्वारणे तत
थैव संयोगसामान्याभावस्य वृक्षे सत्त्वात्सिद्धसाधनमतस्तद्वारणाय धर्ममेव पदेतत्सामान्याभावमुपादाय व्याचष्टे॥ यो धर्मेति॥
सत्तावच्छिन्नाभावादिकमादाय सिद्धिवारणाय सामानाधिकरण्यमुपेक्ष्य व्याप्यत्वमुक्तम्॥ तेनेत्यादि व सामान्येषां द
ह॥ एकावच्छेदेनेत्यादि॥ एतत्पूर्वमत्र यद्यपीत्यादि तथाप्यंतं संपातायातम्॥ तेन॥ एतादृशार्थकरणेन॥ अवच्छेदके वि
रहेपीति॥ व्याप्यवृत्तेरवच्छेदकानंगीकारादिति भावः॥४॥ नाप्रसिद्धिरिति॥ नोपाध्यसत्त्वमित्यर्थः॥४॥ तथा च संयोगाभावस्या
वच्छिन्नवृत्तिताभावेनोभयाभावत्वादुपाधिसत्त्वेन तत्साध्याव्यापकतानिर्वाह इति तद्वद्वितीयदलप्रयोजनमूह्यम्॥
य॥४॥ यत्तावच्छेदेन कपिसंयोगसामान्याभाववति वृक्षे यावद्विशेषाभावं तत्पातित्वद्व्याप्यतत्कपिसंयोगाभावस्य न सा

77

भ०टी० विच्छिन्नवृत्तित्वेनोपाधेर्न साध्यव्यापकतानिर्वाह इति प्रथमदलम् ॥ यत्र वृक्षे मूले नेपि कपिसंयोगः अग्रे च कपिसंयोगसा
७८ मान्याभावः तत्र वृक्षीयतत्तत्कपिसंयोगाभावस्य विभिन्नावच्छेदेन विद्यमानस्यापि मध्यरूपेणावच्छिन्नवृत्तित्वेनोभयाभा
ववत्त्वमक्षतमेव ॥ अत्र सर्वावयवावच्छेदेन नानासंयोगवति वृक्षे यत्रैकविभिन्नावच्छेदेन वृत्तेर्नानासंयोगाभावस्योभया
भाववत्त्वाभावात्साधनाव्यापकत्वं बोध्यम् ॥ संयोगाभाववद्गुणसत्ताभावस्य द्रव्ये गीकारसंभवेन तद्रूपनिर्गुणत्वस्य न
साधनाव्यापकत्वमत आह ॥ निर्गुणत्वमिति ॥ प्रसत्वनुमानम् ॥ साध्यसिद्धिरिति फलानुमानम् ॥ दैशिकेति संयोगसा
मान्यस्येति ॥ वृक्षादेः संयोगस्याभिन्नत्वे पीत्यादिः ॥ ननु वृक्षादेः सर्वावच्छेदेन वृत्तिरेकाग्रे संयोगोव्याप्यवृत्तिरेव अत
एव च तस्यैक्यस्य तथात्वे वृक्षादेः संयोगस्य भिन्नत्वोक्तिरसंगतेत्याशयेनाशंकते ॥ व्याख्यायां न चेत्यादि ॥ आकाशसंयो
ग एवेति ॥ वृक्षादावितिशेषः ॥ यत्किंचिदिति ॥ तथा च स्वविषयप्रवृत्तित्वावृत्तित्ववृत्तित्वोत्तरव्याप्यवृत्तित्वाभावनियमे एम
न तस्याव्याप्यवृत्तित्वमेवेति भावः ॥ ननु लाघवेन तस्यैकस्य व्याप्यवृत्तित्वसिद्धौ नाहं प्राग्निर्णयमेतानाभावस्य तत्त्रा ७८

हग आकाशेऽति॥ वृत्तीति॥ वृत्त्या द्याकाशसंयोगस्येत्यादिः॥ यथा चित् वृत्तेर्व्याप्यवृत्तित्वेपि वृत्तिमतोऽव्याप्यवृत्तित्वं तथा
क्वचिद्वृत्तेरव्याप्यवृत्तित्वेपि वृत्तिमतो व्याप्यवृत्तित्वं स्यादित्याशयेनाशंकते॥ न चेति॥ तत्रापीति॥ यथा च दृष्टांतासिद्धिरिति भा
वः॥ तत्रयोऽन्नाभावादिति॥ संयोगात्मकस्याभावस्य गुणेऽसत्त्वादिति भावः॥ तत्रापीति॥ यथा चेत् तथा गेऽप्यत्यंतो भ
विष्यति॥ एकत्र॥ आद्यापरत्र॥ द्वितीयो स्वरूपेण॥ स्वरूपसंबंधेन॥ अत एव कर्त्तव्यगोऽव्यत महत्त्वादिरूपत्वभिसाध
येनेदम्॥ नन्वतिव्याप्तिसंपादकं तत्र भयघट्टविशिष्टत्वयोरतिरिक्तत्वेऽनवस्थापनीपेतदवच्छिन्नाभावयोरत्यंध
त्वापन्नमव्याप्यमत आह॥ नान्येति॥ प्रतियोगितेनिधाचोभयपाचावच्छिन्नाभावस्याविधिष्ठरूपप्रतियोगि
वैयधिकरण्यान्नातिव्याप्तिरिति तदतिरिक्तत्वेऽनवस्थापत्तं नायुक्तमिति भावः॥ नपुंसकलिंगस्यानतिरिक्त
मिसस्यतदवच्छिन्नाभावत्वसनेनानन्वयादाह॥ अनतिरिक्तइत्यादि॥ ध्वंसप्रागभावादीनामिति॥ आदिना
भेदपरिग्रहः॥ स्वात्मकमेवेति॥ यद्यपि घटाभावादिवृत्तेः घटाभावादिभेदस्य घटाभावादिरूपाधिकरण

78

भ०टी०
७८

स्वरूपत्वं न संभवति तस्याभावमात्राधिकरणकत्वाभावात् घटाभावाद्यात्मकत्वे भावप्रतियोगिकत्वेनाभावमात्रप्रति
योगिकत्वाभावात् च तथापि स्वात्मकभेदस्य तेन तु घटाभावभिन्नत्वाद्यवच्छिन्नभेदोऽस्य पटाभावत्वाद्यवच्छिन्नभेदस्या
धिकरणे स्वरूपत्वासंभवेऽपि न क्षतिः ॥ नन्वेवं घटाभावभिन्नत्वात् घटत्वाभावसंतत्प्रतियोगितावच्छेदकमेवे सुगि
मगंधासंगतिरिति वाच्यम् ॥ तदंशस्याभावमात्राधिकरणकाभाववद्भावमात्रप्रतियोगिकाभावत्वाभावा
धिकरणकाभावप्रतियोगिकोऽप्यभावोऽधिकरणस्वरूप इति मतानुसारेणाधिकरणभेदेनाभावभेद इति म
तानुसारेणासंगमनात् ॥ भावरूपेति ॥ वह्न्यादिरूपे संबंधः ॥ स्वत्वमभिमितेति ॥ वह्निभिन्नत्वाद्यवच्छिन्नभेदस्या
भावमात्राधिकरणकत्वाभावे ॥ न वह्न्यादिस्वरूपत्वासंभवादिति भावः ॥ स्वसमानाधिकरणभेदेति ॥ वह्न्यादि
भेदे संबंधः ॥ तद्देहस्य च ॥ वह्न्यादिभेदभेदस्य च ॥ ननु भावत्वेन भेदस्य नाधिकरणस्वरूपत्वसंभवः । अभाव एम
मात्राधिकरणकत्वाभावादित्यत आह ॥ अभावमात्रेति ॥ पर्वतक्षणादिवृत्तित्वविशिष्टाभावस्य विशिष्टाधि ७८

करणेपि प्रतीसात तस्याधिकरणस्वरूपत्वेत्तरङ्गणेन तत्प्रतीतिवत्तत्करणेपि तत्प्रतीसाप्रत्तिरित्याशये
नाह॥ विधिरूपभावाघनात्मकइति॥ अतएव॥ अभावमात्रस्यैवानतिरिक्तत्वांगीकारादेव॥ अधिकरणा प्रतियोगिकार२
नात्मकत्वादिति॥ तस्य घटप्रतियोगिकत्वेन भावप्रतियोगिकत्वादितिभावः॥ यथाश्रुतेति॥ संबंधभेदान्नैवेत्यने
त्यर्थः॥ हेतुसमानाधिकरणतस्य प्रथमाभावविशेषणेतु ध्वंसानिरुपसाहयो॥ हेतुसमानाधिकरणध्वंसा
दि॥ आवश्यकत्वइति॥ प्रथमाणादित्यसादि॥ नन्वेवं प्रतियोगिसमवायिन एव दैशिकसंबंधेन ध्वंसवत्त्वमितिनि
यमभंगापत्तिरतआह॥ अतएवेति॥ तादृशनियमे मानाभावेन कालस्य दैशिकसंबंधेन ध्वंसवत्वादेवु॥ व
त्तित्वम्॥ दैशिकसंबंधेन वृत्तित्वम्॥ वक्ष्यतीति॥ केवलान्वयिग्रंथे ८॥ धितिकारइत्यादिः॥ विवक्षितमिति
प्रतियोगिवैयधिकरण्यघटितलक्षणेपीत्यादि॥ नित्यसादि॥ हेत्वधिकरणे नित्यस्य प्रतियोगिन एवाऽनित्यस्य

भ० टी
७९

त्वध्वंसस्य दुर्वचत्वादिति भावः॥ प्रत्यक्षणेति॥ लेवोधपूर्वक्षणोत्सर्थः॥ माझेति॥ निसृतांशप्रवच्छेदप्रसंग
नातिव्याप्तिरिति॥ ध्वंसस्योत्पत्ताभावविशेषेण महाप्रलयेणो नोत्पत्तिनियततोसूपपत्साकालिकसंबंधावच्छिन्नप्रति
तावच्छिन्नप्रतियोगिताकध्वंसे विशिष्टसाध्यतावच्छेदकगोलेहेतुसमानाधिकरणतो हध्वंसीयकालिकसंबंधा
वच्छिन्नप्रतियोगितावच्छेदकत्वसत्वादिति भावः॥ स्वेहसत्वादिति॥ महाप्रलये पूर्वं मिसादिहेतरद्वयनाभावाद्यनुप
भादिति भावः॥ ननु घटएकस्य साध्यत्वेपि नातिव्याप्तिः॥ घटएकत्वावच्छिन्नाभावानंतरं स्पंदसत्वादत आह॥
स्पंदैवेति॥ घटएकनाशात् महाप्रलयपूर्वं घटएकत्वावच्छिन्नाभावचरमघटएकनाशजनकस्पंदस्पंदस्यो
तरदेशसंयोगनाश्यत्वेतत्संयोगनाशानुरोधेन पुनः स्पंदान्तरं तन्नाशानुरोधेन पुनरुत्तरदेशसंयोगांतर
मित्यादिरीत्या नवस्तुधा महाप्रलयस्यासंभवइत्ति तस्य स्पंदस्य पूर्वसंयोगस्य च स्वजन्यो पस्कंदाश्यापेक्षे

एम
७९

कर्त्रैव नाशना हिंसाश्रयः ॥ चरमपरमाणुकर्मणोऽग्निसंयोगा दि ॥ चरमद्व्यणुकनाशानुगुणं चरमपरमाणुकर्म
ततः परमाणुद्वयविभागः ततः परमाणुद्वयसंयोगनाशस्ततो द्व्यणुकनाशो ततः संयोगोत्पत्तिः ततः स्कन्धो पद्मद्
व्यापेन कर्मोत्तरसंयोगनाशो सएव चरममहाप्रलयः तत्कर्मनाशानन्तरं तत्कर्मनाशजन्यो न संयोगनाश
लक्षणो वा महाप्रलयः तत्र द्व्यवहितपूर्वक्षणे तत्पूर्वं द्वितीयक्षणे वा स्यादिति द्व्यणुकसान्तच्छिन्नध्वंसस्सत्वा
न्नाशिव्याप्तिरिसाखंडलादिः ॥ महाप्रलयाव्यवहितपूर्वक्षणे इति ॥ द्वितीयपक्षे ऽव्यवहितपूर्वक्षणे द्व्यणुकध्वंसाधा
रणं नोक्तम् ॥ नक्षतिः ॥ नातिव्याप्त्यसंभवः ॥ स्यादिति कारणे खंडप्रलयादौ जन्यज्ञानगोचच्छिन्नध्वंसाभा
वात्क्षुतिभावः ॥ इति भावः इति ॥ तन्मते खंडप्रलयेऽपि मुत्यनुरोधेन जन्यज्ञानस्यावश्यकत्वं स्वमन
ते इदृशा लिनि खंडप्रलयाजन्यज्ञानाभावेन व्यभिचारित्वं संभवतीत्याशयः ॥ स्वसाक्षात्कारेति ॥ अविदि

80

भ०टी० तस्मात्ध्वंसदुःखे मा नाभावादिति भावः॥ तज्जनकेति॥ तादृशध्वंसजनकेत्यर्थः॥ संभवादिति॥ स्वं हेतूपसंहरणापेनेत्यादि
८० उत्पत्तौ तदनतिरिक्तवृत्तित्वरूपावच्छेदकत्वासंभवादाह॥ अवच्छेदकत्वं चेति॥ मतेपीत्यनेनैतत्स्वितमस्य स्वरसं सूचयति॥
यत्तत्वदिति॥ संभवदिति॥ तथा च सकलविशेषप्रागभावेषु स्वसमयसीमान्यावच्छिन्नध्वंसप्रागभावयोः संभवः॥ यथा
महाप्रलयादौ गोत्वावच्छिन्नध्वंसः। एतत्कपालवृत्तिघटत्वावच्छिन्नोऽनुत्पादादृष्टाद्यामेतत्कपालवृत्तिघटत्वावच्छिन्नप्राग
भाव इति भावः॥ नन्वेवं केवलहेत्वन्तरानुवृत्तिरूपमेवैतत्तथा च महीसादिसंभवत्वेनसंगतमत आह॥ अथ
चेदृशत्वस्येति॥ नेदमपि तयोः सामान्याभावत्वादिति भावः॥ अनुपगमादिति॥ अतिप्रसक्तोऽयं चेदृशत्वाभावस्य
सर्वसंमतत्वादिति भावः॥ अपेवं तन्मते ध्वंसप्रागभावप्रतियोगितावच्छेदकत्वस्य सामान्यधर्मेऽनुपपत्तिरेव राम
महाप्रलयादिवृत्तिध्वंसप्रागभावयोः प्रसेकप्रत्ययमात्रवृत्तिप्रतियोगितावच्छेदकतयैतत्कपालस्यापि ध्वंसस्य प्रागभावस्य वा ८०

प्रतियोगितान्यूनानतिरिक्तवृत्तित्वरूपावच्छेदकत्वस्य तत्रासंभवादित्येतिचेन्न। तेषां चरमाद्यव्यक्तिध्वंसप्रागभावयोरेव यावद्व्यक्तिप्रतियो
गित्वोपगमेन तत्संभवात्। परन्तु ध्वंसप्रागभावयोर्व्यधिकरणप्रतियोगिताभावनियमेन चरमाद्यव्यक्तिध्वंसप्रागभावयोर्यावद्व्यक्ति
प्रतियोगित्वं न संभवतीति न क्षोदक्षमम्। तच्चिन्त्यम्। सर्वसिद्धव्यधिकरणप्रतियोगिकेआश्रयनाशजन्यद्व्यणुकगुणादिनाशे व्यभिचा
रेण मानाभावेन च तादृशनियमस्यैवासिद्धेः॥ अत एव इति। आदिना घटाद्यनुत्पाददशायां एतत्कपाले घटो नास्तीत्यादिप्रतीति
परिग्रहः॥ अतीतेत्येवेति। न च तस्याः ध्वंसप्रागभावयोरेव विषयत्वमिति वाच्यम्। सामान्यावच्छिन्नप्रतियोगिताकत्वेनाव
स्यपकलक्षणीयात्यंताभावेनैवोपपत्तेः॥ दैशिकसंबंधेनेति। परन्तु कालिकसंबंधावच्छिन्नगवाद्यभावस्य दैशिकसंबंधेन का
लाद्यवृत्तित्वे इष्टापत्तेः॥ कालस्य कालिकसंबंधेनैव जगदाधारत्वात्तथात्वविरहस्येति॥ तदसत्। तथा सति इदानीं घटो न
चलर इति प्रतीत्यनुपपत्तेः॥ इदानीमपि गवादिध्वंसप्रागभावयोः सत्त्वेन गवाद्यत्यंताभावस्यासंभवात्। कथमिति। तथाच
दृष्टान्तासिद्धिरिति भावः॥ ध्वंसाधिकरणेऽत्यंताभाववत्त्वस्य निरवच्छिन्नतया स्वरूपावच्छिन्नत्वमसंगतमतो व्याचष्टे। स्वस्येति।
कालवृत्तेरिति॥ दैशिकभेदावच्छेदेनेत्यादि॥ प्रतियोगिवैयधिकरण्यम्॥ प्रतियोगिवैयधिकरण्यवृत्तित्वात्यंताभावरूपम्।

81

भ०दी० प्रतियोगिसामानाधिकरण्यमपि ॥ अन्योन्याभावेति ॥ प्रसंगादाह ॥ तादात्म्यातिरिक्तेति ॥ इत्यनेन सूचितमस्वरसम् ॥ आरोपस्यापि प्र
८१ तियोग्यारोपस्य ॥ हेतुतापामिति ॥ अभावप्रत्यक्षइत्यादि ॥ विरहएवेति ॥ एवकारेणाव्याप्तिव्यवच्छेदः ॥ अव्याप्तिरपीति ॥ अपि
नाश्रयोऽपि च विरहसमुच्चयः ॥ कालोपाधावित्यादि ॥ तथा च यथा समवायादिसंबन्धेन तत्तत्पदार्थाधिकरणे एव कालोपाधौ तत्त
त्पदार्थस्य संबंधः स्वीक्रियते अन्यथा मूर्त्तमात्रस्यैव हि गुणाधितया मूर्त्तात्मककालोपाधौ यत्र द्वैधवृत्त्यादेर्दैशिकसंबंधः स्वीकार
स्यावश्यकतापादपे हेतो घटत्वादिकमिति प्रसंगापत्तिस्तथा समवायादिसंबंधेन तत्पदार्थाधिकरणे एव हि गुणाधीनत्वसद
र्थस्य दैशिकसंबंधः स्वीक्रियते अन्यथा इह परमाणौ घटत्वमित्यादिप्रसंगापत्तिरिति भावः ॥ तत्र । मूर्त्ते मध्ये ॥ पञ्चमूर्त्तेतथाधी
त्वं दैशिकसंबंधः स्वीक्रियते अन्यत्र तु इह मनसि विशेषगुणाइति धीर्विरहेणन सह इत्यादयः ॥ जातिमात्रमिति ॥ न च जातेर्व्याप्यवृ
त्तितया तत्ताव्यक्तेः प्रतियोगिवैयधिकरण्यमेव न तु विशिष्टमिति वाच्यम् ॥ एकोऽपि विभागे ज्ञातिप्रसंगाभिधानात् ॥ एवमग्रे
पि समवायसमवायाभावे तत्राजातेरेकाधिसमवायात्संबंधसामान्येन प्रतियोगिसामानाधिकरण्यं आसभावे स्येवेत्त
त्वाह ॥ जातेरिति ॥ तद्भिन्नत्वाभावादिति ॥ अव्याप्यवृत्तिधर्म्मावच्छिन्नभेदस्याधिकाव्याप्यवृत्तित्वादिति भावः ॥ अव्याप्यवृत्तित्वे एम
८१

त्तिधर्मावच्छिन्नासत्ताभावस्य व्याप्यवृत्तितान्न दोष इत्याशयेनाह ॥ तद्वृत्तित्वाभावश्चेति ॥ अत्र प्रति
योग्यसामानाधिकरण्यघटितलक्षणे ॥ प्रतियोगितावच्छेदकोऽपीति ॥ आदिमप्रतियोगिताव
च्छेदकतादिपरिग्रहः ॥ यावद्विप्रतियोगितावच्छेदकानि ऽसेकैकतद्वच्छिन्नानधिकरणत्वादि
कं तु द्वितीयकल्पं वर्णितमेवेति न पृथगुट्टंकितम् ॥ योऽनेयतीति ॥ अतिव्याप्तिरित्यादिएवमग्रे
ऽपि ॥ ननु एकाधिकरणमात्रवृत्तेरभावस्य न स्वीयमत्त्वधिकरणवृत्तित्वाविशिष्टस्वाभा
वरूपप्रतियोगिसामानाधिकरण्यसंभव इत्यत आह ॥ एकाधिकरणेति ॥ कथम
तिव्याप्तिरिति ॥ किंतु प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यानिवेशे
तादृशाभावाप्रसिद्ध्याऽसंभवः ॥ साध्यतावच्छेदकसंबंधेन तन्निवेशे चाभावे साध्यके

82

भ०दी० तदृशसिद्ध्याऽव्याप्तिरेवेतिभावः॥ अतिव्याप्तिपदस्यासंभवपरत्वे संदर्भविरोधं तद्दूषणं चास्वर-
८२ सं हेतुमित्यभिधायाह। वस्तुत इति॥ गगनाद्यभावस्य प्रतियोग्यधिकरणाप्रसिद्ध्या प्रतियोगिवैय-
धिकरण्यासंभवो दुष्ट इत्याह। वक्ष्यमाणेति॥ गगनाद्यभावस्याप्रसिद्धत्वादिति विशिष्टस्याभावलक्ष-
णप्रतियोगिसामानाधिकरण्याद् दुष्ट इत्याह। निरुक्तमेव विशेषणीभूतमभिसन्धाय स्वरूपेणेत्युक्तम्॥ विशि-
रूपस्य विशिष्टाभावाभावस्य विशेषणविरहव्यानतिरिक्तत्वादिति भावः॥ तर्हि तस्याधिकरणप्रसि-
द्ध्याभावेन विशेष्यगगनाभावरूपत्वमेवास्तु तत्राह। गगनाभाव इति॥ तस्य विशेष्य- रा म
रूपगगनाभावस्य॥ अतिप्रसक्तेरिति॥ तथा च विशेष्यगगनाभावस्याप्रसिद्धत्वेन ८२

तथापि निरुक्तविशिष्टगगनाभावाभावो नास्तीति प्रसज्यप्रसंगे न निरुक्तरूपविशेषणस्यानतिप्रस
क्तमेव विनिगमकमिति भावः ॥ एवं विशिष्टाभावस्य विशेष्यमात्ररूपत्वे यत्र विशेषणविशेष्यान्यतर
मात्रस्यानतिप्रसक्तत्वं तत्रैव तस्यान्यतरमात्ररूपत्वं यत्र चातिप्रसक्तत्वं तत्र तस्य विशेषणविशेष्योभ
यरूपत्वमेवेत्याशयेनाह ॥ निरुक्तस्येति ॥ संभवात् ॥ नवीनमते संभवात् ॥ लाघवादिति ॥ अत एव घट
पटादिसमवेतत्वविशिष्टाभावादिरूपप्रतियोग्यनधिकरणत्वस्य घटादौ संभवेन घटत्वादिकं कि
मिसुपेक्षितमित्यपि निरस्तम् ॥ घटपटादिसमवेतविशिष्टाभावाभावो हेतुरपि लाघवेन घटत्वादिरू
पत्वादिरूपत्वात् ॥ यादृत्वस्य प्रतियोगितावच्छेदकविशिष्टानधिकरणहेतुमत्त्वादृशत्वच्छेदकभि
न्नं यत् साध्यतावच्छेदकं भिन्नस्यैव सम्यक्त्वे प्रतियोगिताद्यप्रवेशे वैयर्थ्यं प्रतियोगिताविशेषण
त्वेन यथासंनिवेशे वैयर्थ्यं भिन्नसाध्यमेवाह ॥ यादृशसाध्यप्रतियोगितादीति ॥ यत्रेदमवधेयम् ॥ यादृश
त्वेतादृशत्वयोरननुगमेन भेदकत्वावगाहिसमूहालंबनज्ञानस्यानुमितिहेतुत्वे विशिष्टपरामर्श

मं०टी० ८३

स्यानुमितिहेतुत्वानुपपत्तिर्व्योम्नेर्दुर्ज्ञेयत्वं लौकिकत्वयोरैक्यवादिप्राचीनमताभिप्रायेणेदमितिग
म्यधिकमस्मत्कृतभवानन्दीप्रकाशेऽनुसंधेयम्॥ संबंधभेदः॥ संबंधविशेषः॥ नन्विति भानी
य इति॥ संबंधसामान्येनैवाभावस्य वृत्तित्वं निषेधनीयमिमाय एपः॥ इदं च संबंधत्वस्ये
त्याभिप्रायेण॥ वस्तुतस्तस्य वृत्त्याभावेन वक्ष्यमाणरीत्या सावधि वैशेषिकसंबंधस्याभा
वाभावसाधारण्ये वैशिष्ट्यविशेषणताया एव वाभिवेशनमुचितं इति ध्येयम्॥ अयोज्यमा
भावादितित्त॥ कालिकादिना हेतुसमानाधिकरणाभावस्य प्रतियोग्यनधिकरणवृत्ते
र्नवारणादिति भावः॥ अभावस्येति॥ वृत्तानिविशेषः॥ तेन दैशिकसंबंधत्वेन दैशिक
विशेषणतायामहाकालीयं स्समवायादेश्च निवेशेन॥ जातिमाश्रितेति॥ द्रव्यत्वादिः समवा
यादिनैव वृत्तिरित्यादिति भावः॥ न चैवं निरवच्छिन्नविशेषणतया कालिकसंबंधात्वच्छिन्ना
सत्ताभाववान् कालेत्यादिसत्यातिव्याप्तिसंगः॥ सा प्रमाभावस्यापि तत्र कालेदैशिकसंबंधेनास

राम ८३

त्वादित्यत आह ॥ वस्तुतस्त्विति ॥ स्वीकार्यमिति ॥ तथा च भावाभावसाधारणविशेषणतयैवाभाव
स्य वृत्तित्वं निवेशनीयमिति भावः ॥ साध्यवत्ताग्रहविरोधितानियामकसंबंधेन हेतुत्ववृत्तितावच्छे
दकेनाप्यनिर्वाहः साध्यतायेनाह ॥ कालिकसंबंधेनेत्यादि ॥ तद्धसाध्यताभावेति ॥ आत्मत्वाधिक
रणवृत्तित्वस्याभावासमकालीनभावसत्त्वः ॥ व्याप्यवृत्तीति ॥ नचैवं नोपादेयं चेत्संयोगाभावि
रोधइति भ्रमः ॥ तत्र व्याप्यवृत्तिपदस्य स्वसमानाधिकरणाभावाप्रतियोगिपरतयाऽ
त्रैस्य व्याप्यवृत्तिपदस्य निरवच्छिन्नवृत्तिपरतया विरोधात् ॥ संबंधद्वयप्रवेशे स्वलक्षणे संबंधद्वये सं
बंधविशेषविवक्षेत्यर्थः ॥ गौरवात् ॥ पर्यन्तं व्यर्थं गौरवात् ॥ सामानाधिकरण्याद्याविति व्याघ

85

भवानंदी व्याख्या-